नं. ५२६६

नाम ताण्ड्य ब्राह्मण भाष्यं
वेदार्थ प्रकाशः
कर्ता श्री सायणः

पत्र. ४१२ — सं. x

विष. संहिताब्राह्मण भाग:

ताण्ड्यब्राह्मणभाष्यम् दशमाध्याया
न्तम् वेदार्थप्रकाशः

5266

# 305 double and 306 MISSING.

५२६६

F. = 412

Complete

दशमाध्यायपर्यन्त भाष्यं · (श्लोक ७४१५)

पत्रे ४१२

॥ॐन्नमश्रीढुंढिराजायसामवेदाय॥ ॥वागीशाद्याःसुमनसःसर्वार्थानामुप
क्रमे॥यन्नत्वाकृतकृत्याःस्युस्तन्नमामिगजाननम्॥१॥यस्यनिश्श्वसितंवेदायो
१ वेदेभ्योखिलञ्जगत्॥निर्ममेतमहंवंदेविद्यातीर्थमहेश्वरं॥२॥तत्कटाक्षेणतद्रूपंद
धद्बुक्कमहीपतिः॥आदिशत्सायणाचार्य्यंवेदार्थस्यप्रकाशने॥३॥येपूर्वोत्तरमी
मांसेतेव्याख्यायातिसंग्रहात्॥कृपालुर्म्माधवाचार्य्योवेदार्थंवक्तुमुद्यतः॥४॥
व्याख्यातावृग्यजुर्वेदौसामवेदेपिसंहिता॥व्याख्याताब्राह्मणंव्याख्याद्र १
रेभ्योऽत्रबुद्धये॥५॥पञ्चविंशतिरध्यायामहतिब्राह्मणेस्थिताः॥आद्येध्या
येष्वृतामंत्रानुज्ञातुर्य्युरात्मकाः॥६॥येतुमंत्रास्मोत्वरूपाउत्तरासुत्त्वचेषुतेयो

जै १

निबद्धानमृषि च्छापद्धं तेते विषेर्वशात्।।७।। यद्योन्याद्ध्ज्ञानमाम्नातं तदेवोत्तरयो
रुचोः।। गायेदिति सोत्र कृत्स्ने साम्नामूहो विधीयते।।८।। आवृत्तियुक्तं तत्साम स्तोमइ
त्यभिधीयते। द्वयोरध्याययोः स्तोमप्रकारा बहुधा स्मृताः।।९।। चतुर्थोध्यायमारभ्य ग
वामयनिकादयः।। क्रतूनां विषयः प्रोक्ता एषोऽस्मिन्ब्राह्मणे क्रमः।।१०।। प्रथमाध्याय गाम
त्राद्विनियोगपुरःसरं। व्याख्यायन्ते सर्व्वसोमयागेष्वेते गताङ्गताः।।११।। ननु प्रथमाध्या
ये समाम्नातानाम् ऋग्नेवोचे इत्यादीनां मन्त्राणां कृत्स्नमनुक्रमं। क्रतुप्रकरणम
ध्ये पाठाभावात्। चतुर्थाध्याय प्रभृतीनि हि क्रतुप्रकरणानि न दृश्यंति। चतुर्थ
पंचमाध्याये गवामयननामकस्य संवत्सरसत्रस्य प्रकरणं।। गावो वा एतत्सत्र

मासतेस्यारभ्यतयोरर्द्धयोराम्नातत्वात्। षष्ठाध्यायेऽग्निष्टोमप्रकरणे प्रजापति
रकामयत बहुस्स्यां प्रजायेयेति स एतमग्निष्टोममपश्यदित्यारभ्य तस्याध्याय
२ स्याम्नातत्वात्॥ एवमुत्तराण्यपि क्रतुप्रकरणान्यवगंतव्यानि। न त्वेवमप्रथमा
2 ध्यायगतामंत्राद्वितीयतृतीयाध्यायगताविष्णुत्तयश्च कंचित्क्रममारभ्याम्नाताः। तु४
अतो नैतेषां क्रत्वंगत्वं युज्यत इति चेत्। मैवं अनारभ्याधीतानां प्रकृतिगामित्वमि ०
ति न्यायेन क्रत्वंगत्वावगमात्। स च न्यायस्तृतीयाध्यायषष्ठपादस्य प्रथमाधिक २
रणे पर्णवाक्यमुदाहृत्याभिहितः॥ प्रकृतौ विकृतौ वास्याद्यस्य पर्णस्य सोऽविधिः॥
प्रकृतावेव वा तुल्याद्वचनादुभयोरसौ। जुहूमात्रस्य पर्णत्वविधिः प्रकृतिमात्रगः॥

चोदकेनोभयप्राप्तेर्विकृतौ विधिनात्र किं। अनारभ्याधीयते यस्य पर्णमयी जुहूर्भवति।
न स पापं श्लोकं शृणोतीति। तत्राव्यभिचरितक्रतुसंबंधवतीं जुहूमाश्रित्य तद्धेतुः प
र्णत्वं हि तौ वाक्येन विधीयते॥ या जुहूः सा पर्णमयीति वाक्यं च प्रकृतिविकृत्योस्तुल्य
मेव प्रवर्त्तते। उभयत्राश्रयभूताया जुह्वाः सत्वात्। तस्मात्प्रकृतिविकृत्योरुभयो
रप्ययं विधिरिति प्राप्ते ब्रूमः। किमयं विधिर्विकृतौ चोदकात्पूर्वं निविशते। पश्चाद्वा।
नाद्यः आश्रयभूताया जुह्वाश्चोदकमंतरेणासंभवात्। द्वितीये तु पर्णत्वमपि जुह्वा स
ह चोदकेनातिदिश्यते। तत्र पुनर्विधिवैयर्थ्यादयं विधिः। प्रकृतिमात्रगः। एवं
यस्य खादिरः स्रुवो भवतीत्युदाहरणीयं। ननु का प्रकृतिः का च विकृतिरिति चेत्तत्र। उ

ज्ञाते। यत्र कर्त्तव्यं सर्वं प्रकर्षेण कर्मान्तरनैरपेक्ष्येणोपदिश्यते सा प्रकृतिः। यत्र तु वि
शेषरूपमेव कर्त्तव्यं स्योपदिश्यते। इतरत्सर्वं कर्मान्तरादतिदिश्यते सा विकृ
३ तिः। स चातिदेशः प्रत्यक्षश्रुतिवचनाद्वा नामसाम्याद्वा लिंगाद्वावगन्तव्यः। तत्स
र्वं सप्तमाष्टमाध्यायाभ्यां बहुधा विचारितं। प्रकृतिश्च द्विविधा मूलप्रकृतिरवां
तरप्रकृतिश्चेति। सर्वात्मना कर्मान्तरनिरपेक्षा मूलप्रकृतिः। कतिपयेष्वंगेषु कर्मां
तरं चापेक्षते। स्वयं च केषांचित्कर्मणां निरपेक्षणीया भवति। सेयमवान्तरप्रकृतिः। त ३
त्र तिस्रो मूलप्रकृतयः। ताश्चाष्टमाध्यायस्य प्रथमे पादे तृतीयाधिकरणस्य द्विती
यवर्णके विचारिताः। इष्ट्यग्निहोत्रसोमा नाम मूलप्रकृतिता न हि। अस्ति वा नालौकि

कर्त्वादियत्तयावधारणात्। लोकवत्संनिपात्यारादुपकारिद्वयश्रुतेः। इयत्तायानिश्चि
तत्वान्मूलप्रकृतितात्रिषु। अलौकिकत्वेनैतावद्भिरङ्गैः सौकर्यमुपकार इति निश्चेतु
मशक्यत्वात् इत्यादीनां नास्ति मूलप्रकृतित्वमिति चेत्। मैवं लौकिकसदृशत्वात्
यथा लोके भुजिक्रियायामोदनः करणं तस्य सन्निपत्योपकारिणः शाकसूपाद
यः आरादुपकारिणः पीठप्रदीपादयः। तथा नावान्नायां यागः। करणं। अवघाताद
यः सन्निपातिनः। प्रयाजादय आरादुपकारिणः। अतो नात्यन्तिकमलौकिकत्वं। इ
यत्तातु लौकिके यथा प्रत्यक्षेण निश्चीयते। तथा श्रौते श्रुत्या निश्चीयते। तस्मादि
ष्ट्यग्निहोत्रसोमानां मूलप्रकृतित्वमस्ति। तासु प्रकृतिष्वेवमहन्मेवोच इत्यादिमन्त्रा

णामंगत्वेन प्रवेशो वगंतव्यः ।। प्रकृतित्वस्य तत्रैव मुख्यत्वात् । तास्वप्येते मंत्राः सो
४ मयागेनेतुं योग्याः सोमंगमेयमित्याद्दिलिंगसद्भावात् । नानाविधब्राह्मणग
तानामेतदीयविनियोगानामृषिभिः सूत्रितत्वाच्च । तेच विनियोगा अस्माभिस्त
त्रमात्र व्याख्यानावसरे प्रदर्शयिष्यंते । यस्य हुमतौ सोमयागप्रकरणमिदं त
स्य न कोपि संदेहः । सोमयागे चार्त्विजो वरणीयाः । तथाह्यापस्तंबेनोक्तं
सोमेन यक्ष्यमाणो ब्राह्मणानार्षेयानृत्विजो वृणीत इति ।। आश्वलायनोपि दर्शपू ४
र्णमासेष्टि पूर्वकत्वं सोमयागस्योक्त्वा पश्चात्तरोपन्यासपूर्वकमेवमाह । प्रागपि
सोमेनैकेतस्यर्त्विजश्चत्वारस्त्रिपुरुषास्तस्य तस्योत्तरे त्रयो होता मैत्रावरुणोछा

वाको ग्रावस्तुदध्वर्युः प्रतिप्रस्थाता नेष्टोन्नेता ब्रह्मा ब्राह्मणाच्छंस्याग्नीध्रः पो
तोद्गाता प्रस्तोता प्रतिहर्त्ता सुब्रह्मण्य इत्येते ऽहीनैकाहैर्याजयन्त्येत एवाहिताग्नय
इष्टप्रथमयज्ञा गृहपतिसप्तदशा दीक्षिताः समोप्याग्नीस्तन्मुखाः सत्राण्या
सत इति। अस्यायमर्थः। दर्शपूर्णमासाभ्यामिष्ट्वा पश्चाद्द्वादशाहैत यजमानाः पुर
स्ताद्वा सोमेन यजेत। तस्य सोमयागस्य होताध्वर्युर्ब्रह्मोद्गातेति चत्वारः ऋत्वि
जो मुख्या इति च प्रत्येकं। त्रिभिः पुरुषैरुपेताः। तस्य तस्यैकैकस्योत्तरे त्रयः पु
रुषा भवन्ति। त एते होत्रादिनामकाः षोडशर्त्विजोऽहिरात्रादिभिरहीनसंज्ञकैरग्नि
ष्टोमादिभिरेकाहसंज्ञकैर्याजयन्ति। एत एव होत्रादयः षोडशर्त्विजः स्वयमप्या

हिताग्नयः प्रथमयज्ञेनाग्निष्टोमेनेष्ट्वा गृहपतिसंज्ञकेन सप्तदशासीरव्यापरकेणास
हिता द्वादशाहादिसत्रार्थं दीक्षिता स्यस्तस्सीवं धिनोऽग्नीनेकत्रस्थापयित्वा तत्प्रधानाः सत्रा
५ ण्यनुतिष्ठेयुरित्येकाहाहीनसत्रात्मका य एते सोमयागास्तदीयस्य ऋत्विजो होत्रादिरू
पस्य सामान्यलक्षणं द्राह्यायणाभिधो महर्षिश्छन्दोगसूत्रकारस्त्वाह। ऋत्विगार्षे
5 योऽनूचानस्साधुचरणो वाग्मी न्यूनाङ्गोऽनतिरिक्ताङ्ग इति। तादृशमृत्विजं वरीतु
यजमानः सोमप्रवाकं प्रेषयेत्॥ सोमयागहृत्तीतमृत्विजे प्रकर्षेणावक्ती। ५
ति सोमप्रवाकः। स च वरीष्यमाणस्य समीपे गत्वा प्रब्रूयात्। अस्मदीयो यजमान
ः सोमेन यजते स त्वां प्रत्यार्त्विज्यमर्थयत इति। एवमुक्ते इतरो यद्या। ऋत्विज्ये

कर्त्तुन्नेच्छेत्। तदानीं सोमन्नमस्कृत्यार्त्विज्ये परिहरेत्। तत्परिहारनिमित्तं प्रत्यवायमप
पनेतुन्नमस्कारः प्रत्यवायश्चैवं श्रूयते। यशसा वा एषोन्येति य आर्त्विज्येन चरति त
स्य प्रतिरुध्ये यशसा प्रतिरुध्यत इति। अथासावार्त्विज्यं कर्त्तुमिच्छेत्तदा सोममप्रवादेप्र
ति सोमयागविषयं कुशलं सर्वं पृष्ट्वा स्वकीयं हर्षं द्योतयन्महन्मे वोच इति मंत्रं
जपेत्। तदेतद्राह्यायणः सूत्रयामास। अकरिष्यन्नमस्सोमाय राज्ञ इत्युक्त्वा प्र
त्याचक्षीत महन्मे वोच इति करिष्यन्नभिमंत्रयेतेति। आपस्तम्बेपि स्मृतितवा
न्। ऋत्विजो वृणीते यूनः स्थविरान्वाऽनूचानानूर्ध्ववाचोनेगर्हीतान्। सोमपः सोमं
सोमं पृच्छेति कस्त्विजः के याजयतीति कच्चिन्नाहीनः कच्चिन्नस्तमामार्त्विज्यं कच्चिन्न

न्य

ध्यानयोर्दक्षिणा इति॥ छंदोगब्राह्मणं भवत्यथ जपति महन्मेवोच इति॥ यद्यप्याप
स्तंब एतन्मंत्रजपं सर्वेषां द्विजानां साधारणमवोचत् तथाप्यत्र द्राह्यायणः स्व
६ कीयपरिभाषानुसारेणाज्ञातारमभिलक्ष्य तस्य सामप्रवाकविषये प्रतिमंत्रली
विचत्र। परिभाषा चैवमुक्तं। एकश्रुतिविधानान्मंत्रान्कर्माणि चाज्ञाते वकुर्यादना
देश इति। अस्यायमर्थः। महन्मेवोच इत्यादिमंत्रानथ कर्माणि च सामवेदोक्तान्य
ज्ञाते वानादेशे कुर्यात्। कुतः एकश्रुतिविधानात्। एकस्य कर्तुः श्रवणेन निर्देशे ६
न विधानात्। प्रतिमंत्रयतेत्येकवचनेन विधानमुक्तात्तल्लिंगत्वेनात्र परिभाष्य
त इति। नन्वज्ञातपुरुषाः प्रस्तोतृप्रतिहर्तृसुब्रह्मण्या अपि सामवेदोक्तकर्माधि

कारिणो न तु केवलं उद्गातैव। बाढं। तथापि न तेषां वरणं क्रियते। किंतु होत्रध्वर्युब्र
ह्मोद्गातॄणां चतुर्णामेव नियतं। तदाहापस्तम्बः। तान्वृणीते चतुरः सर्वान्वैकैक
श इति। तथा सति प्रस्तोत्रादीनां वरणमावमाश्रित्य कात्यायनेनोद्गातुरेवेदं प्रति
मंत्रणमामन्त्र्यते। यदि तेषामपि वरणमंगीकुर्यात्। तदा स्वकीयपरिभाषानुसारेण
प्रस्तोत्रादिमंत्रमप्येतस्यैवमादिशेत्। तदादेशाभावादुद्गातुरेव वरणे प्रतिमंत्रणं च तन्म
न्त्रमित्यवगम्यते। ननु तस्य मंत्रस्य महन्मे इत्येष ऋग्विदिरिति प्रतीकग्रहणादेवाव
गम्यते। अतस्तु कथमवगम्यत इति चेत्। उत्तरमंत्रस्यादिग्रहणादिति ब्रूमः। उत्त
रादिः पूर्वान्तलक्षणमिति सूत्रकारेण परिभाषितत्वात्। अत्र सूत्रकारादेवो देवमति

स्युत्तरमैत्रा दिग्ग्रहीष्यति। तस्माद्भुद्धिषीयेत्यसोऽर्ववीमेत्रस्यांत इति द्रष्टव्यो। मंत्र
पाठस्तु। महन्मेवोचो भर्गोमेवोचो यशोमेवोचः स्तोमंमेवोच्चो वृक्तिंमेवोचः सर्वं
७ मेवोचस्तन्मावतुतन्माविशतुतेनभुद्धिषीयेति। हे सोम प्रवाकमेम ह्यमुष्मात्रै
7 यजमानस्य मार्त्विज्याया र्च्छियत इति यद्वचनं प्रायोदस्तन्महत्स्वजं सर्वोत्कृष्टमे
वावोचउक्तवानसिनरखच्छेतस्मात्स्वजपतमंवचनं ध्रोकेस्ति। ते त्रिरायेपि वाजपे
यफलत्वेनार्त्विज्यप्रशंसाकृता। तस्माद्वाजपेययाज्यार्त्विजीनः सर्वाध्यस्य वाचो ७
वरूद्धा इति। महाभाष्यकारेणापि व्याकरणाध्ययनफलतयार्त्विज्यं प्रशंसितुमि
दंवाक्यमुदाहृतं। यो वाइमांपदशः स्वरशोवर्णशोऽक्षरशो वाचं विदधाति स आ

र्त्विजो नो भवतीति तस्मान्महद्दुःखवानसि॥ तथा त्वं न गोभिर्युक्तं पापस्य विदारकं दीक्षा
वचनमिममह्यमवोचः। तथा यशो यशस्करं वचनमिममह्यमवोचः। सोमार्त्विज्यस्य
यशस्करत्वं प्रसिद्धं श्रूयते च सोमो वै यशः स एवं विद्वान् सोममागच्छति यश एवै
नमृच्छति इति। तथा स्तोमैः स्तुतिसाधनं त्रिवृदादिकमिममह्यमवोचः। उद्गातृवरण
स्य त्रिवृदादिप्रयोगार्थत्वादेवमुक्तिः। तथा भुक्तिं भोगसाधनं स्वम वचनमिमम
ह्यमवोचः। आर्त्विज्यकरणेन हि भोगसाधनं गवादिद्रव्यं लभ्यते। अतएवोद्गात्रादि
वरणसमये कश्चित्कथ्यात्यां दक्षिणा इति पृच्छति। तथा सर्वमिमेवोचः। किमनया
महद्धर्म इत्यादिपरिगणनया। यद्यदस्माद्भीप्सितं तत्सर्वमपि मह्यमवोचः

योस्मन्म हन्तु भर्गश्चादिश्यस्व विशिष्टं यद्दार्हिज्यमस्ति तन्नाम भवतु मोरः हृतु । रद्वौ चैत
दार्हिज्यमग्नौ विशतु । तेनानुष्ठितेनार्हिज्येन मुक्तिपाय मुक्ताय नोगान्त्रस्य क्तीयानु
८ ज्ञि यातेरा शीर्घिडि बहुलं मिति सिपू इडागमः । उकारादेश श्च छांदसः ॥ अथ ज्ञाघ्या
8 यतो द्वितीय मन्त्रस्य विनियोग मिच्छमाह स्वयं व्रजेत् । क्रयं उप वस च्छेवोदद्रुः वतु
गृहेभ्यः प्रथमं देवो देव मेखि ति । यः सोमक्रयस्य दिवसो यश्चोपवसच्छ्या बस्या
सुत्यादिवसास्त्रयो दिवसस्तयोरन्त्यतरस्मिन्दिवसे । उद्गातास्वयमेव देवय
जनदेशं गच्छेत् । न चान्यं प्रहिणुयात् । गमने चास्ति कश्चिद्विशेषः । यद्यपि स्वगृ ८
हाद् द्विगतो देवयजनं स्यात्तथापि देवो देव मेखि ति मन्त्रेण स्वगृहेभ्यो निर्गत्ह

न्त्रयमेकतिचिन्त्यदान्यदप्स्वार्च्छमुदङ्मुखस्त्वगत्यापश्चाद्देवयजनाभिमुखोभवे
त्। रुत्विग्वरणंसोमक्रययोर्मध्यवर्त्तिनमाध्वर्य्यवंप्रयोगंक्रतुसंग्रहकारःस
चयामाससगृह्योक्तबुद्धिसमाधानायोदाह्रियते। अथाग्निष्टोमसंस्थेनज्यो
तिष्टोमेनयाजयेत्। सद्दर्शमत्स्विन्तोष्ट्वादेवमग्निमवितिश्रयो। दीक्षणीयांनिर्व
पेत्सोपिपत्नीसंयाजसंस्थितिः। कृतेप्राचीनवंशेऽथसंस्कारावपनादयः। कुर्या
दाहावकृतीः कार्य्यादीक्षाकृष्णाजिनादिभिः। दीक्षितोनियमैर्युक्तोभवेत्क्षीरव्रता
दिभिः। द्वादशाहंदीक्षितोथाभिक्ष्विमाद्यमानयेत्। सोमंतस्मैस्यवस्त्रप्प्रविवि
शत्सोमविक्रयी। शंय्वंताप्रायणीयास्याद्क्रयणीयात्क्रयणोपदं। क्रीत्वासोमरथे

क्षिप्त्वा प्राग्वंशाग्रे समानयेदिति मंत्रपाठस्ततः देवो देवमेतु सोमस्सोममेत्वृतस्य
६ पथेति। देवो द्योतमानः सोमो देवं दानादिगुणयुक्तं इंद्रादिकं ऋतस्य यज्ञस्य पथा
मार्गेणादावाहुतिप्रणालिकया एतु प्राप्नोतु। यद्वा दीव्यति स्तौति कर्म्मका देवस्तोता
उद्गाता। अथवा पर्ज्जन्यो मेघ उद्गातेति वरुणमैत्रेश्रवणात्। पर्ज्जन्यात्मकदेवता
रूप उद्गाता देवं दीप्यमानं फलप्रकाशकं वातय्यज्ञमृतस्य संबंधिनायं पादे
व यजमानमार्गेणैव गच्छतु। सोमाभिषवादिसंस्कृतो रसात्मकः सोमं देवतारू
पममृतं द्युस्थानं स्वमत्सर्यंतिर एतु प्राप्नोतु रसात्मकः सोम एवामृतमयो द्युस्था ६
नः सोमो न वक्षित्सर्थः। तमेव खलु देवा उपजीवंति यमाहुतिमःदितयः पिबंती

तिष्ठतेः। व्याख्यायतेः। दूरं व्रजिष्याम्य विहाय दोषकृत्यमिति। यदि दूरमध्वानं व्रजेत्
तदानीमप्रयत्नदेशातिक्रमणादिकमवर्जनीयं स्यात्। ततो यच्छि च्छिद्रं दुःकृतम
वश्यं न वेत्ति। तच्छान्तये विहाय दोषकृत्यमित्येवं मंत्रं जपेत्॥ दुष्कृतस्य नाना दोषकृत्य
तद्विहाय मनसा परिहृत्य देवयजनं गच्छामीति मंत्रार्थः। व्याख्यायतेः। बद्धानामासा
त्तिपन्थानमापद्येति। देवयजनस्य समीपवर्त्तिनं पंथानमासाद्य बद्धेति मंत्रं जपेत्।
मंत्रपाठस्तु। बद्धानामसि स्कृतिः सोमस्य रत्नं सोमं गमेयमिति। हृदेवयजमोनं
र्गलं बद्धानामासि नामशब्दः प्रसिद्धः प्रसिद्धार्थः। बद्ध स्थैर्य्य इति घसतो न्ये
न्योपविश्यंते इति वचनात्। बद्धाः स्थिरा इतरस्माल्लौकिकान्मार्गाद्वत्तर इति प्रसि

होनवति। स्विरफप्राप्तिहेतोर्यज्ञस्यसाधनत्वात्। यद्वावद्धेसेवादेवयजनमार्गस्यवै
दिकीसंज्ञाएतत्संज्ञोत्नवसीत्यर्थः। अथवाबद्धापवर्गस्यव्यत्ययेनपकारस्यस्थानेबका
रः। पद्धानामसेवास्तत्रयदापस्तैबः। यद्वादेवयजनंप्रतिगंताएतत्संज्ञस्त्वमसि। सो
10 मसरणीसोमस्यप्राप्तिसाधनभूतास्तिमार्गेणनवसि। तथाश्रुत्वासोमयागंगमे
यंप्राक्रम्यां। गमिष्यामोऽर्थिर्ज्ञो। शिष्यपउिस्तु। आप्यायत्यः। उत्तरवेद्यंतमाक्रदक्षिणामी
दनमालाः। पितरोमृरितीषि। देवयजनंप्रविश्यमालाः महावेदिपार्श्वमाक्रम्यपितरोमृरि १०
तिमंत्रेणपितॄननुपतिष्ठत। तथाचापस्तंबः। पितरोमृरितिदक्षिणाहतः पितॄननु
पतिष्ठतइति। मंत्रपाठस्तु। पितरोमृः पितरोमृः पितरोमृरिति। हेपितरः इयदक्षि

णांवेद्यंतलच्छ्रणांभूमिर्युष्माकन्निवासायेतिशेषः।कर्म्मसमाप्तिपर्य्यंतमत्रनि
वसतेतिभावः।त्रिरुक्तिरादरातिशयद्योतनार्थापितृपितामहप्रपितामहानी
त्रित्वापेक्षयावा।द्राह्यायणः।यूपमुच्छ्रीयमाणमनुमंत्रयेरन्नमणऊर्द्ध्वम
रसंचेतीति।अङ्क्युर्य्यूपमद्यदोच्छ्रयेत्तदानीमुद्गातारोन्टमणाइत्यनुमंत्रये
रन्न।अत्रापिपूर्ववत्क्रतुसंग्रहः।क्रीत्वासोमंरथेक्षिप्त्वाप्राग्वंशाग्रेसमानये
त्।आतिथ्यांनिर्वपेत्सोममासंद्यामुपसादयेत्।आतिथ्येष्टिरिउंतास्यात्तानू
नप्त्रमवद्यति।दीक्षामवांतरामेतिप्रवर्ग्योपसदःकृतिः।दिनत्रयेणकृत्वातस्या
हेदिर्म्मश्चौंदिनेभवेत्।षड्विंशत्पददीर्घेषुप्राग्वंशात्स्यद्वितःस्थिता।प्रातः

प्रवर्ग्यमुद्वास्यपश्चादुत्तरवेदितः। शाकटेध्वे हविर्द्धाने हविर्द्धानिचमंडपं। पश्चात्स
दस्तस्यमध्ये निखातौदुंबरीमिता। दक्षिणस्यानसोधस्तात्गर्त्तोनुपरवान्स्व
का० ३ नेत्। पिधायफलकैभ्यांतानगेकुर्य्यात्। मदलखरं। निर्वपेद्धिष्ण्यानग्नीषोमीयं
पशुमाचरेत्। प्रयुज्यचित्तपात्राणिदर्शवत्सर्व्वमाचरेत्। आज्यमासादितेवेद्यां
अतेयूपंसमुच्छ्रयेदिति। पाठस्तु। न्यसमणऊर्द्ध्वंनरसंखोर्द्ध्वंतरादशेयमिति। ह
न्यसणः न्यषुयद्रुस्पतैनेत्तषुयजमानेषुमानोनुग्रहबुद्धिर्य्यस्यविष्णुात्मनो ११
यूपस्यसोयन्नसणएतादशावित्क्षुरूपयूपऊर्ध्वेनरसंस्थायूर्द्ध्वमुपरि।नागे
ध्वर्य्युमिन्द्रियमाणीत्वाम्रहयूर्द्ध्वंनराः सत्करशेयं। अनुग्राहकेणत्वयाऊ

र्द्वमुन्नतगुर्लेर्धमितिभार्य्यमाणउर्द्विनरा:धम्रीधातोर्हिह्माशिषिग्रटिप्रास्पेत
दपवादेत्वेनहृयोरगवकक्कव्यइत्यकु।अटितुसतिरुदशोऽडि॰गुणः इतिगुणंस्यात्।
द्राह्यायणः।होताप्रातरनुवाकमन्वाहन्त्यामहुषाइतियदाब्रूयादथवेदिमाक्रामे
युरध्वर्यवोदाशिषिरेतीति।उपवसथदिवसस्यमध्यरात्राद्धूर्ध्वंहोताप्रातरनुवाकम
नुब्रूते।तदाहाश्वलायनः।अथैतस्यारात्रिर्विवासकालेप्रागवयसांप्रवादात्प्रात
या ३ रनुवाकमंत्रितोवाग्यतस्तीर्थेनप्रपद्योत्स्याद्दि।अध्वर्युणामंत्रितोहोप्रोतीतरनुवा
कमन्वच्येतस्यावसानस्यावसानेनगतामनहुषाइत्येतामृचंयदाब्रूयात्तदानी
मुद्गातृप्रस्तोतृप्रतिहर्त्तारोमद्रेतिमंत्रेणवेदिमाक्रामेयुः।क्रतुसंग्रहस्थः।यरपस्यो

छूपणाद्दर्ह्वि समापय्यपक्षं ततः। वैसर्ज्जनानि हुत्वाग्निंसोमं ग्रावाक्षिचानयेत्। हवि
र्द्धाने स्थापयित्वाग्रे [illegible] याद्दक्सती वरीः। प्रयुंज्यात्सोमपात्राणि महा रात्रे खरा
12 दिषु। यावस्कास्थापिते सोमे पक्षिणो ध्वनित पुरा। स्यात्प्रातरनुवाकार्च्छमुपाकरणमा
दरादिति। वैधाक्रमणं मंत्रपाठस्तु। सदा शिशिपिरादेवानां तीर्थे वेदिरसि मा मा हिंसीः
रिति। हवेधास्मिके म्हसे मर्दायज्ञायुधेन खातस्यामृत्स्नयाशिशिपिरा प्रशिष्यिल्लाव यवा
त्वं देवानामुज्ञात्रादीनां सृत्विजोदेवानामेववातीर्थं मवतरणस्थानमसितयावेदिर १२
सि। असुरैरपहृतानां धनानां लं नमिति ख्यासि। यत्तच्छित्तैं वेधमस्मुराणाम विंदंत।

तदेकं वेद्यै वेदिं च मितिश्च यन्तरात् । उत्कलद्वारोगौ त्वाष्ट्वांग्रधितिष्ठंती मामाहिं
सीः । माबाचस्व । इडा ह्यायत एः । हविर्द्धाने प्रवेश्यमाना वसतीवरीरनुप्रविशे
युस्तस्यरराद्दामाल इयाविष्णोः शिर इति । अध्वर्युर्णोप्रातरनुवाक उपाकृ
ते प्रतिप्रस्थाता सवनीयं पुरोडाशं निरूप्यपूपपन्नेजनी नामिकास्त्वप्पुपत्नीस
हितास्तु वसतीवरी नामिका अपो ध्वर्युर्हविर्द्धानमीडयं प्रवेशयति । तदानीमुद्गा
ता दयस्त्रयो विष्णोः शिर इति मंत्रेणररार्ट्यां हस्तस्पर्शं इत्वाहविर्द्धानमडपं
पूर्वया द्वारा प्रविशेयुः । रराटी नाम । हविर्द्धानस्योपरि स्थिता काचित्काशमयी
यष्टिरिति सस्सा पाठ आह । पाठस्तु । विष्णोः शिरोसि यशो यशोमयि धेहीति । हवि
र्द्धा ।

हीनमंडपोद्विष्णुर्वेदेताकचात्विष्णुर्देवताविष्णुश्चैनोपचर्य्यते।वैष्णवंहिदेव
तायाहविर्द्धीनमितिश्रूयते॥विष्णुदेइत्यनेनोपचरितस्यहविर्द्धीनस्यपश्चिस्मिन्न्
द्वारेतिय्येगवास्थितायष्टिर्ल्ललाटवद्वर्त्तते।अतएवतद्वस्थानकरणमतोमं
13 त्रोध्वर्युशाखायामेवमाम्नायतेविष्णोरराटमसीतिललाटस्यशिरोभागवर्ति
त्वंसिद्धंअतोरराटींप्रतिविष्णोःशिरोसीत्युच्यते।हेरराटित्वमन्चेतनापिसती
यशोधाअसिविष्णुशिरइत्येवंभूतस्ययशसोधारयित्रीभवसि।तस्मात्वदीयस्य
शंकुर्ध्वीतिमयिअज्ञातेकुशलइतितादृशंचेद्धिधारयसीपादय।आह्यायणः।इष १३
ऊर्जेइतिप्रविशंतइतिउज्ञातारोहविर्द्धानंप्रविशंतइषऊर्जेइतिमंत्रेणजपेयुः।पाठ
स्तु।इषऊर्जेआयुषेवर्च्चसेचेति।इडेनंऊग्रौसःद्वीराज्यादिः।आयुःप्रसिद्धंव

ऋत्विदशास्त्रात्सिद्धविहितत्वेरूपेब्रह्मावर्त्वेसंचकारात्पुत्रपौत्रादयः।सर्वेसोपत्य
स्के हविर्धानेप्रविशन्तीतिशेषः॥ ॥इतिसामवेदार्थप्रकाशेताण्ड्यकमहाब्रा
ह्मणेप्रथमाध्यायस्यप्रथमःखंडः॥१॥द्राह्यायणः।प्रेतरेहोबाहून्नेवह्
त्यपार्ष्णीरनुघर्षंतेयुनय्याप्रीतिराजानमभिमृशेयुर्योप्रातःसवनायाविनह्य
ऋस्सर्वेन्नन्वेसाधुर्युर्हदिशेनैवेति।हविर्धानमंडपेदक्षिणशकटस्याधस्तात्सन्नि
मभागेनिषेवार्थंसोमोवस्कापितोवर्त्तते।तंसोमंहस्तैस्पृशन्तऋत्विजआदयो [illegible]
मंडपंसंप्राविशन्प्रविश्यशकटस्यपेद्धृईषेदीर्घकाष्ठेविद्येतेतयोर्मध्येऋत्विजआ
दयःस्वकीयंदक्षिणबाहून्नधःप्रसार्यसोमेस्पृशेयुः।तदक्षौऽयंप्युनय्याप्रीतिमं

त्रेः। यदा शकटस्योन्नतत्वेनाधः प्रसारितानी बाहूनी दैर्घ्यमन्नपर्य्याप्तं स्यात्तदा तदानींस्व
पादानीपार्ष्णिर्नागानुच्चमस्य पादाग्रे ऊर्द्ध्वमावस्थानेप्रसज्येत तन्मामदिति पार्ष्णी
रनुद्यछेत इत्युक्तं। स सोमः प्रातःसवनीय विनक्त्युच्चे तदातावंतमेवस्य शेषुः। गप्र
विनागेतुसर्वस्यापि सोमस्य स्पर्शः स्पृशन्तोनप्राप्नुयुश्चे तदा तद्देश प्राप्तिमात्रे
णेवालंतेः स्पर्शोऽत्विवस्थितः। पाठस्तु। पुनर्व्यमि ते पृथिवी मग्निना सह पुनर्व्यमि
वाचा०सह सूर्येण युक्तो वातो तारिक्षेणते सहयुक्तोऽस्ति सोऽविभ्रजः सूर्यस्य
ति। हे सोम आहवनीयादिरूपेणाग्निना सह वेदिरूपामिमां पृथिवीं त्वदर्त्थं पुनर्व्यम १४
ग कारश्छांदसार्त्थः। पुनरयो येवंशारवांतरपाठः। त्वया सयुक्तां करोमि। आग्निर्वे
द्यास्तु संयोगे सतित्वद्विषयायागोनिष्पद्यते। यं तथा सूर्येण सहवाच मन्त्ररूपां

ष्युनक्त्यग्निमयेजयामीति॥ तत्रापि वितत्यच्छाय्युजिधातुर्द्रष्टव्यः। सूर्यसंयोगः कालसा
पेक्षो प्रातःसवनादावुपयुज्यते वाक्सम्प्रयोगेन स्तोत्रशस्त्रादिसिद्धिः। तथोतरि द्वेला
सह वातो वायुस्तेन सह दर्भेष्वयुक्तो योजितः। वायुसहयोगेन वह्निः प्रज्वाल्यते॥ अंतरिक्षस
म्प्रयोगेन प्रवर्ग्यज्वालादेर्वकाशः संपद्यते। यथा सूर्यस्य संबंधिन्यो विम्रजो विशे
षेणं चकारस्य नर्जनेर्विनाशने समर्थोऽस्ति सोऽलोकत्रय प्रकाशिकाः॥ यद्वा त्वत्रोऽत्ति
वा त्र्यादि स्यस्य तेजांसि वसंते प्राग्रे तत्र गायत्री मत्री दिनेशा रद्रपराह्ने इति श्रुत्यं
तरोक्तास्ति स्रोदीप्रयोयुक्ता योजिताः। यद्यप्येतत्सर्वं लोके स्वत एव सिद्धं। तथा
प्युक्त्वा लुप्त मन्त्रपूर्वकानुस्मरणेन सोमः संस्कृतो भवति। नाह्यणायनः। दक्षिण
स्य हविर्धानस्य पश्चात्संव्यावृते उपविशेयुरिते तस्य सदन इति॥ संव्यावृतः संवे

नपात्रेस्वेनावर्त्तमानाः। पाठस्तु। ऋतस्य सदनेसीदामीति। ऋतस्य सोमस्य गृहस्यैश्वर्यं फल
साधनत्वात्सोमः सत्यं सत्यसंबंधिसदनेसमीपवर्त्तिस्थानेसीदाम्युपविशामि। द्रो
णाख्यायणः। अभिषुते राजन्य्येतनपात्रमसीति द्रोणकलशमालभेति। राजनि सोमे ग्राव
15 भिरभिषुते सत्युज्जात्रादयस्तनपात्रमसीत्यनेन मंत्रेण द्रोणकलशमुपस्पृश्य प्राह
युरिति वक्ष्यमाणेनान्वयः। हे द्रोणकलश त्वमृतपात्रे सोमपात्रमसीति मंत्रार्थः। द्रो
णाख्यायनः। वानस्पत्य इति प्राहयुरिति। शकटगताद्धस्य पश्चादवस्थितं द्रोणकलशी
नेयउद्गात्रादयः स्वहस्ते रथोद्देशे तस्माद्वाक्सां च प्राहयुः। प्राग्देशे यथावस्थितो १५
नवति तथा कुर्युः। पाठस्तु। वानस्पत्योसि बार्हस्पत्योसि प्राजापत्योसि प्रजापते मूर्द्धा
स्य यत्रायुपात्रमसीदमहं मां प्राश्च मभ्यो हामितेजसे ब्रह्मवर्चसायेति। हे द्रोणकलश

हे वानस्पत्योसि त्वष्टुः संबंधी नवसि काष्ठविशेषनिर्मितत्वात् । तथा बार्हस्प
त्योसि । बृहस्पतेः संबंधी नवसि । चतुर्विंशतिरात्रकनामसोमयागरूपं सत्र
मनुतिष्ठता बृहस्पतिनासीपादितत्वात्तत्संबंधो द्रष्टव्यः । तदनुष्ठानं चाध्वर्युशा
खायामाम्नातं बृहस्पतिरकामयत श्रन्मे देवा दधीरन् गच्छेयं पुरोधामिति । स एतं च
तुर्विंशतिरात्रमपश्यत्तमाहरत्तेनायजतेति । यद्वा देवानां यज्ञे बृहस्पतेरनुज्ञातत्वा
त्तत्संबंधः । बृहस्पतिर्देवानामनुज्ञाता तद्वचनं क्रीतं । प्राजापत्यः प्रजापतेः संबंधी न
वसि । तत्संबंधश्चाध्वर्योर्द्रोणकलशाभिमर्शनमंत्रेण गम्यते । तथा चाध्वर्युशाखाया
माम्नायते । उपयामगृहीतोसि प्रजापतये त्वेति द्रोणकलशमभिमृशेदिति । प्राजापत्यो

ह्यषदेवतयायद्द्रोणकलशइति ब्राह्मणं तौप्रजापतेर्मूर्द्धाऽसि अस्यतन्मूर्द्धत्वं ब्रा
१६ ह्मणे समाम्नातं। प्रजापतिरकामयत बहुस्स्यां प्रजायेयेति सोऽशोचत्तस्यशोचत
16 आदित्योमूर्द्ध्नोसृज्यत सोस्यमूर्द्धानमुदहन्त्सद्रोणकलशोऽभवत् इति। अस्सर्वे
बाहुल्येनागच्छति। सोमोऽस्मिन्द्रोणकलशपात्रे ततस्त्वमत्र्यायुनाम्नाऽभिधेयं पात्र
मसि इदं सर्वेषां प्रत्यक्षं। यथाऽऽहरमुज्ञातोऽसमीद्रोणकलशी प्राची पूर्वदिगा
मिनंदलो प्रोहामि। तद्ब्रोहणमत्मतेजसेशारीरकांतये ब्रह्मवर्च्चसाय कृता
ध्ययनसंपत्तये चानेवतु। द्राह्मायणः। तानृत्विमश्शयजेपयुर्मरुतइताति। अग्नि १६
त्रिषवसाधनभूतग्रावाणः उक्तात्रैदित्रिरेकत्रयोजितत्वेनप्रकृतत्वात्तच्छब्देनप

17

शमदृश्यंते। तान्यावृणोह स्तेरन्निमदृश्योऽज्ञात्रादयो मरुत इत्यादिकं मंत्रं जपेयुः।
पाठस्तु। मरुतो न पातो पाङ्क्त्याः पर्वतानां ककुत्स्थ्ये नाम्याजिरा एन्द्रघग्नुनावहत
घोषेणासीवाश्चातयद्वय्युक्तास्थवहतेति। ह या वाणः पृषं मरुद्वज्ञान्न पातः ३ न
पतीतीति नपात् तस्य बहुवचनं नपात इति। यथा स्वेद्गतेपत्मादीनि वायुबलेन
पात्यंते न तथा ग्रावाणः। यद्वा मरुतोमित्रराश्विणः नपातो यद्वास्य नपातयितारो
रक्षकाः। अपां जलानां द्वयाः निवासस्थानभूताः। नदीमध्ये घर्म्मकालेपि तत्र तत्र
पाषाणानां संधिषु जलं निवसति। तथा पर्वतानां ककुतः शृङ्गभूताः। ककुतं शृंगे
विदुः प्रधानेपि चेत्यभिधाने। श्येनाः एतन्नामकपक्षिसदृशाः शंसनीयगमनाः॥

अङ्गिराः क्षिप्रनामैतत्। क्षिप्रगमना। एंद्रं नयत उरुलङ्घनगाः स्वयं सोमयागाच्छामिंद्र
माह्वयत केन साधनेन बल्बलावचनेन वाक्यसदृशेन ह्रुनिनेसच्छैः। ग्रावाणो सो
२७ मानिषवध्वनिश्च ता इन्द्र आहूतमिव शीघ्रमागच्छति। घोषेण त्वं वदीयनोग्रध्व
17 निनाअमीवान् रोगवदुपद्रवकारिणोऽसुरान् चातयध्वं पराभूतान् कुरुध्वं।
अतएव ते निर्ऋत्या आमनीता। अद्धा देवस्य यजमानस्यासुरघ्नी वाक्। यज्ञायुधे
षु प्रविष्टासात्। ते सुराया वं तो यतो यज्ञायुधानामुद्धृद्दतामुपाश्लवन्। ते परा २७
भवन्निति। युक्तास्थ वहत इन्द्रमाहूयासुरांश्च पराजावयत तो द्रोणकलशीवोढु
परस्परं सम्युक्ता भवत। सम्युज्य च कलशीं वहत। द्वाभ्यां याचनैः। पश्चाद्दक्षिणतो वा

द्रोणकलशमच्छूहेयुरिदमहमिममितीति। युक्तानां ग्रावाणामुपरिष्टाद्द्रोणकलशं
पश्चाद्धारच्यप्रांवेदस्मिन्नेतच्चारञ्चोदं स्वंवास्थापयेयुः। पाठस्तु। इदमहमिमम्य
जमानं पशुभिश्च्यूहामि पशुषु च मां ब्रह्मवर्चसेति। इन्दुं प्रस्यद्दध्यधाऽवतितपाऽ
हमुऊलाश्रमुपरतोहृश्यमानमिममितिकेषांश्चित्पाठः। यजमानं पशुगोभिश्च्यू
हामि उपरिस्थापयामि। कलशाच्यूहन प्रसादात्मयायजमाने नचपशवोऽलं
श्वंतामित्यर्थः। न केवलं पशुलाभः। किंतु ब्रह्मवर्चसनिमित्तमप्येतदच्यूहनं
चतु। द्रस्यायणः। पवित्रेण द्रोणकलशाऽसम्मुज्य पाहृसवस्येति बुध्न० रेद्रासे
तिमच्छमादिन्यास्येतिबिलमितीति। दशापवित्रनामकोयोवस्त्रखण्डस्तेनो जाता

द्रोणकलशमुल्लमच्छबिलनागान् मंत्रगतैस्त्रिभिर्ज्ञागैः शोचयेत्। पाठस्तु। व
१८ सवस्यागायत्रेणच्छंदसासंमृजंतु रुद्रस्यात्रैष्टुभेनच्छंदसासंमृजंत्वादित्या
स्याजागतेनच्छंदसासंमृजंत्विति। स्पष्टार्थः। द्राघ्यायणः। अथ चयपवित्रमु
दगग्दशमवाङ्नाभिवितनुयुः पवित्रं तदितीति। दशापवित्रस्य मध्येषुरूकामूलीसक्तकसा
18 मवारामावरणं च यजमानो बध्नंती सामानिरिच्छ ज्ञाते। उदीचीनदशमवाचाननना
त्रिचदशापवित्रं कृत्वा। द्रोणकलशस्योपरिष्टादुजात्रादयस्त्रयो वितनुयुर्वितत्य १८
दशापवित्रस्य कोणानुधारयेयुः। तपाम्बब्रस्मलोपवित्रं विगद्दंष्ट्रोहाणतीति। पाठस्तु। प
वित्रं ते विततं ब्रह्मणस्पते प्रभुर्गात्राणि पर्येषि विश्वतः। अतप्ततनूर्न तदामो अश्नु

19

तेश्रृतासइद्वहन्तः संतदाशतेति । हे ब्रह्मणस्पते मंत्रस्य स्वामिन् सोम ते पवित्रं शो
धकं वस्त्रं विततं सर्वत्र विस्तृतं स प्रभुः प्रभविता त्वं गात्राणि योतुरंगानि पर्ये
षि परिगच्छसि विश्वतः सर्व[illegible]तस्त्वततस्य पवित्रं अतप्ततनूः पयोव्रतादिना
असंतप्तगात्रः । आमोऽपरिपक्वो नाश्नुते न व्याप्नोति । शृतास इद्वेश्रृता एव परि
पक्वा एव वहन्तः संतत्पवित्रमाशत व्याप्नुवंति । द्राह्यायणः । संततमायां धारायाम्
मुञ्जातां जपेत् प्रभुर्गात्राणीति दशापवित्रस्योपरि पतत्सोमरसस्य धारासंततामा
व्रते तदानीं मुञ्जातां प्रभुर्गात्राणीति मंत्रं जपेत् । पाठस्तु । प्रशुक्रैतु देवी मनीषास्मद्रथः सु
तष्टो न वाज्यायुषे मे पवस्व वर्च्चसे मे पवस्व विदुः पृथिव्या दिवो जनित्राण्यच्छ एवं स्वा पोषः ।

द्दरंतीःसोमेहोज्ञायममायुषेममब्रह्मवर्च्चसाययजमानस्यओंअमुष्यराज्याये
तिःभक्तस्तुद्धानिर्म्मलाद्देवीद्योतनात्मिकामनीषास्तुतिअस्मदस्मत्तःप्रैतुअगच्छतुसा
१९ मे।तत्रदृष्टांतः।रथोन।रथइवकाष्टशःसुतष्टःसुघृतदृढःक्रियया निष्पादितः।
19 वाजीवेगवान्उग्रबुद्धिपरिच्छाज्यमेममोज्ञातुःआयुषेआयुर्दैर्घ्यउपवस्य
दूतोनवा।तथामेवर्च्चसेब्रह्मवर्चसनिमित्तंघृतोनवा।पृथिव्यादिवअजनित्राया
गद्धारेरुउच्चपादकाद्दशापवित्रादवःद्दरंतीःद्दरेस्यआपःसोमरसात्मिकावि
दुरस्मदीयाममनीषांजानंतुतदर्थंस्तवंतुहेसोमत्वमिहास्मिन्कर्म्मणिउज्ञा १९
यउज्ञानंदत्वाउरुधारयाद्दयमानस्यसोमस्यशब्दउज्ञोयस्तेनस्तूयते।अयते

हि एषवैसोमस्याधीपोयस्यववृत इति।यदुजातत्वंत्वयाकृते।तत्त्वं मयापोजानुरा
युर्वृद्धवर्चसिपद्यते।तथामेब्रह्मवर्चसं संपद्यते।तथायजमानस्य धनधा
न्यादिसमृद्धोसीपद्यते।अमुष्यराज्यायअमुष्यराज्ञोराज्यायअमुष्यैतस्यस्था
नेतस्यराज्ञोनामनिर्दिष्टव्यं।तत्रैवऋत्विजस्यसोमस्यराज्ञोराज्यायेसेवनिर्दिष्ट
व्यमिति सिद्धान्तितत्वात्सूत्रकार आह।अमुष्यराज्यायेति प्रियस्तु राजानमादि
शेद्राज्ञो राज्यायेतिवायजमानस्य राज्ञो राज्यायेति वा सोमस्य राज्ञो राज्याये
तिवासोमस्यैवचन्द्रयाच्चासोमराजा नो हि ब्राह्मणा इति।क्षत्रियवैश्ययोरपिद
द्याब्राह्मणत्वात् सोमस्यैवतयोरपि निर्देशः।ब्राह्मणो वा एष जायते यो

दीक्षित इति श्रुते ब्राह्मणस्य मवसीयते। अत एव सत्रीतरं। तस्माद्राजन्यवैश्या
२० वपि ब्राह्मण इत्येवावेदयतीति॥ ॥इति सामवेदार्थप्रकाशे तांड्ये महाब्राह्म
णे प्रथमाध्यायस्य द्वितीयः खंडः॥ ॥२॥ उद्गात्रा यजमानः। अध्वर्युणा हुते प्रवृत
होमे जुहुयुर्गव्यानु पूर्वेण बेकुरा नामासि स्वर्यामि तीति। अध्वर्युणा विप्रुष हुं४
होमेषु हुतेषु उद्गातारस्त्रयोपि प्रवृत होमे जुहुयुः प्रथम मंत्रो वाग्देव त्यः। तस्मा
ठस्त। बेकुरा नामासि जुष्टा देवेभ्यो नमो वाचे नमो वाचस्पतये देवि वाग्यत्ते वा २०
चो मधुमत्तमस्मिन्माधाः सरस्वत्यै स्वाहेति। हे सरस्वती त्वं बेकुरा। रवकिया
त्मिकमर्थानाम शब्दः प्रसिद्धः। सर्वत्र व्यापनात् बेकुरेति प्रसिद्धा नवसि। देवेभ्य

प्रस्तोता प्रथमं। ततउद्गाता। ततः प्रतिहर्त्ता इत्येवं प्रसर्पणक्रमेण जुहुयुः। ४

स्तेषामच्छीयजुष्टासोत्तमैः स्तुतासि। तस्यैवास्य। वाग्देवतायै नमोस्तु वृत्तिस्यतेये
ब्रह्मणेन मोस्तु। हृदि विद्योतमाने हवाग्देवते। नेतव वाचः शब्दराशेर्य्यं न्मधुमद
तिशयेनमाधुर्य्योपेतं वस्तु स्तौत त्रं स्मिन्नामा माम धानि धेह्यस्थापयतस्यै सरस्व
त्यै स्वाहा। इदं हविस्यजामि। स्वाहेति हविस्त्यागाङ्गी निपातः। द्वितीय मंत्रपाठस्तु
सूर्य्यो मादिव्याभ्यो नागेभ्यः पातु वायुरंतरिक्षाभ्योग्निः पार्थिवाभ्यः स्वाहेति। सूर्य्यः
सर्वस्यप्रकाशकस्थानो देवोमामांदिव्याभ्योदिविनवाभ्यो नागेभ्यः नाशकारिभ्यर
क्षा जातिभ्यः पातु। वायुरंतरिक्षस्थानो तरिक्षाभ्यः तत्रो सत्काभ्यो नागेभ्यः पातु। त
थाग्निर्भूर्स्थानः पार्थिवाभ्यो नागेभ्यः पातु स्वाहा। तेभ्यः सूर्य्यादिभ्यो हविस्त्य

जामीति। ध्रा ख्यायते। सर्वैः पाणिभिः एष ग दक्षिणत एतानि निरस्य मुर्य्या घ सौम्य
२१ इतीति। बहिष्पवमानस्तोत्रार्थं अध्वर्युमनुचात्वालसमीपे प्रसर्प्पति स्त्रयोपि स्वका
येर्व्वामहस्ते मार्गस्थितानि तृणानि दक्षिणस्यां दिशि निरस्येयुः। दक्षिणे हस्ते रन्त्वा
21 रं तृत्वविधानात् सर्वैरिक्ष्यैकैः। पाठस्तु। यो घ सौम्यो वधो घायन्नु मुद्दरते विक्षकुह
स्य धन्वना पतान्वरणो च मदधिति। अघ अस्मिन्नहनि अघायनो अघं हि सौम्यापर्णः
तस्य धन्वना मार्गेण अन्यैरविज्ञायमानेन नोदच्छता स्यर्थः। तात्रवचनमव सौं पिछ २१
सोम तौं संबंधी सौम्यः सोमत्विषयो वधोऽहिंसात तू साधनं वा दूषणात्मकः उदारते ऊर्ज
ति। ईरितो अस्तादिकः। बद्धलेवदसीति शपोऽलुगनावः। वधप्राप्ति साधनमाह। वि

षकुहस्य विष्टविष्वक्सर्वतः। कुहः कुहूनाविचनाय स्य स तथोक्तः। तैव चं वरुणेदुष्टु
तात्तारको देवः अपपद्यमतः। चमतिर्विचकर्मा। अथ हं स्थिरा सर्च्छः। ब्राह्मणायुगः। वातालदे
शं प्राप्याध्वर्यौ वुपविष्टे तस्मात्सर्व्वगुपविशेयुर्यो मन्त्रा सेति स्पष्टार्थः। पाठस्तु। याम
आत्मा यामे प्रजायेमे पशवः स्तेरहं मनो वाञ्चं प्रसीदामीति मन्त्रमोऽजानुः संबिधीयमा
त्मा शरीरस्थितो जीवोऽस्ति। या च मदीया प्रजा पुत्र भ्रातृश्चादि रूपा ये च मदीयाः पशवो
गोहिष्यादयस्तैः सर्व्वैः सहितोऽहं मनो वाचि समाधाय प्रसीदामि। प्रसन्नो भवेचोपवि
शामि। ब्राह्मणायुगः। प्रस्तारे प्रतिगृह्य प्रस्तोता ब्रह्मन्नस्तोष्यामः प्रशास्तरिति स्फुट। तत्र प्र
यच्छेत्सेन दक्षिणेन ग्रहणामुपहत्य सर्वं यथा स्तोममभि प्रसेजसे नीति। उपवेशनानन्तरम दैवेषु

णादत्तं प्रस्तरे प्रतिगृह्योद्गात्रे प्रस्तोता प्रयच्छेत्तेन प्रस्तरेण स्वकीयां जंघां उपस्पृशस्य
उद्गाता स्तोमं युञ्ज्यात्।मंत्रोर्ध्वरणमेव सोमयोगः।तत्साठस्त।अग्नेस्तेजसे द्रस्य
२२ न्द्रियेण सूर्य्यस्य वर्च्चसे साबृहस्पतिस्त्वा युनक्तु देवेभ्यः प्राणायान्विर्य्युनक्तु।तपसा
22 स्तोमेय्यज्ञायवोढवे दधाति इन्द्र इन्द्रियं सच्चाः कामा यजमानस्य संह्विति।
हे स्तोमत्रिहृदादिलक्षणत्वी बृहस्पति र्द्देवादेवेभ्यस्तेषामर्च्छीयाग्नेर्गेजस्सूर्य्यौणी
संबंधिनिस्तेजइंद्रियवर्च्चोति र्य्युनक्तु योजयतु।तेजआदिशब्देरणत्याद्दिदेव २२
तानां सामर्थ्यानि विवक्षितानि।तथा प्राणाय इच्छिणयजमान प्राणारक्षणार्थ
मग्निस्तपसा प्राणधाति वैरिसीता पसामर्थ्येन स्तोमेयोजयतु।किमर्थंयज्ञा

23

यवोदेवाय· ज्ञं वोदं तपेंद्रोदिप इन्द्रियं सामर्थ्यं दधातु सोमं स्थापयतु। उत्त्रद्द
यै स्रु य्येविद्वे सायुन त्रीयस्याप्युपलेदूलं। यजमानस्य कामाः काम्यमानाश्चा
शिषः सत्याः सन्तु यथार्चीनवंतु। आह्वायगः। अन्नंकरिष्यामीति जपेदिति स्तोम
योगादूर्द्ध्वमेतस्य मेवस्य जपः। पाठस्तु। अन्नंकरिष्याम्यन्नमन्नविष्याम्यन्नकम्
नयिष्यामीति। अनेन स्तोत्रेणाहं सुजातावद्भ्यप्राणयुपकाराय प्रभूतमन्नंकरि
ष्यामि तच्चान्नमन्नविष्यामि प्रभूतिः समृद्धिः समृद्धं करिष्यामि। तदन्नं ज्ञानयि
ष्यामि अननेन श्रीह्याद्दिरूपेण पुनः पुनः प्ररोहणहेतुत्वेन करिष्यामि। आह्वायगः।
अन्नमकरमितिस्तुत्याजपेत्। बहिष्पवमानस्तोत्रादूर्द्ध्वमयं जपः। पाठस्तु॥

अन्नमकरमन्नमम्हदन्नमंमिति। स्तोत्रसामर्थ्यैर्नन्नसमृद्धेर्निश्चितत्वाद्भूता
र्थप्रयोगः। श्राव्याय एनः। श्येनोसीति प्रस्तरे यजमानं वाचयेदिति। प्रस्तरे स्पर्श
२२ कारयित्वेति शेषः। पाठस्तु श्येनोसि गायत्रछंदा अनु त्वारभे स्वस्ति मा संपारय।
मास्तोत्रस्य स्तोत्रेणम्याद्रिन्द्रवेतो वने महिमह्ही मा हि प्र जामिष मिति। हवहि
23 ष्पवमानत्वं गायत्राख्यछंदो विशिष्टस्स सन्न् श्येनः श्येनाख्यपक्षि सदृशोसि त
था सबलोसि। सर्वैः। त्वा तथाविधं त्वामन्वारभे आनुकूल्येन स्पृशामि। स्वस्ति
द्रेमो विघ्नाभाव रूपो यथा भवति तथा मां संपारय समाप्तग्रयं कुरु स्य पारं नय। २२
स्तोत्रस्य बहिष्पवमानरूपस्य स्तोत्रयतः स्तोत्र मात्र मा त्व प्रशा दि क मन्त्रे

तरन्नाध्विवेनसंबद्धमस्ति।यद्धास्तोत्रस्यस्तोत्रं प्रशास्ती स्तोत्रंबहिष्पवमाना
दिकंतन्नामागमिष्यात्।आगच्छतु।इंद्रवेतोबहिष्पवमानदेवतारूपेणेंद्रेणात
हूतोवयंवनेमहि।सर्वास्तोत्रदेवतासंनाजमहि।तत्प्रसादात्प्रजांपुत्रादिरूपी
इषमिष्यमाणमन्नीचवनहीमहि।अनुनजेमहि।द्राघ्यायणः।संवर्च्चसेतीहका
सहकारिणश्चप्रेक्षमाणोजपेदिति।स्तोत्रप्रयोगीद्रष्टुमागताइंहकाःप्रस्तोत्रा
दयउपगातारःसहकारिणस्तान्सर्वान्प्रेक्ष्यमाणउजातासंवर्च्चसेतिमंत्रंज
पेत्।पाठस्तु।संवर्च्चसापयसासंतपोभिरगन्महिमनसासं6शिवेनसंविज्ञाने

नमनसश्च सश्चैर्य्यथावोहं चारुतममेवदानीं शोवो दृशोभूयासं सूर्य्यश्च चक्षुषे
२४ वातः प्राणाय सोमोगंधाय ब्रह्मक्षत्रायेति। हे इन्द्रकाः प्रस्तोत्राद्य उपगातारः
श्च वर्च्चसा ब्रह्मवर्च्चसेन समगन्महि वयं संगता अभूम तथा पयसा दक्षिणारू
पाणां गवां हि क्षीरेण समगन्महि तथा केमानुष्ठानरूपैस्तपोभिः समगन्महि त
24 था शिवेन मंगलेन आस्तिक्ययुक्तेन मनसा समगन्महि। तथा मनसः संबंधिभिः
सश्चैर्य्यथाच्छिन्नैः संकल्पैश्च। किंच। यथावो युष्माकं चारुतमं अतिशयेन रम २४
णीयं वदानि तथा वर्चसोविहृत्यायुज्यो। वो युष्माकं दृशे दर्शनाय। इन्द्र इति लुप्तो
पमं इन्द्रवाहं दर्शनीयो भूयासं। सूर्य्य इव चक्षुषे तेजसे वातः वायुरिव प्राणाय प्रा

25

रागनाय जीवनाय सोमो गंधाय सोम इव गंधाय सोमो रसात्मको गंधाय न्नवति। सु
ष्ठात्मा गंधानुपलक्षेः ब्रह्मैव ब्राह्मणा इ पुरोहितत्त्वत्राय बलाय प्रसवि याय वा भूया
समिति सर्वत्र शेषः। द्वाद्यायाय ताः। नमो गंधर्वाय विश्वादित्यसमिति प्रेक्षमाणो जप
दिति। तत्रानु पठ्यते। पाठस्तु। नमो गंधर्वाय विश्वग्वादिने वक्त्रो धाग्नस्य वर्चो
मयि धेहीति। गंधर्वाय ~~विश्वग्वादिने वक्त्रो धाग्नस्य वर्चो~~ मा वो दृष्टुद कानि र
श्मयो वाताना। धारयतीति गंधर्वः। आदित्यस्तस्मै नमो स्तु। गरवि गंधेद्दवइति गोश
प२ ब्द उपपदे धिञ्ञ धातोर्व प्रत्यये उपपदस्य च गंभावे गंधर्व शब्दो व्युत्पन्नः। कथं
भूताय च विश्वग्वादिने वादति येर्गतिकर्मणो। विश्वकसर्वान्यावादित्रेई दृशस्ते

वर्च्चोधा अस्य वर्च्चसस्ते जसो धारयितासि अतो मयि उर्जातरि वर्च्चस्तेजो धेहि नि धेहि ॥
॥ इति प्रथमाध्यायस्य तृतीयः खण्डः ॥३॥ सवनीयपशोर्व्वपायां हुतायां सदः प्र
२५ विशंतो धिष्ण्यानुपतिष्ठेरन् । अहुनामिति सूत्रकारेण शौनकेन शाखान्तरोक्तानियम
ङ्खविषयदा प्रयुञ्जीरन् तदाऽनेन मंत्रेणाग्न्यादिष्ण्योपस्थानमिति विकल्पेनोक्तं । अ
न्येतु ताण्डिशाखाधीतानां यजुषां प्रयोगेपि आम्नानसामर्थ्यात् जैमिनिना
तथैव विनियुक्तत्वाच्च अनेनाग्नीध्रमुपस्थाय इत्याहुः । पाठस्तु । अहुनामह्व २५
पते स्वस्ति मे ऽस्मिन्देवयाने पथि भूयादिति । हे अहुनामह्वपते इमार्गाणामीम
श्वमः प्रशस्तान्तरिक्षमार्गाः तस्य स्वामिन्वयं ह्वाएको ह्वशब्दो नुवादः । अहुनी

यात्तरिक्षच्छेः। वसव्य वो वसुपते वसूनामिति वचनं ममममास्मिन्देवयाने देवा
येनयज्ञलोकेषु न मार्गेण यांत्ति प्राप्नुवंति तस्मिन्यज्ञलोके पथि मार्गे अधेदानींस्व
स्तिहेमे भूयात्। यज्ञस्याप्यायमानः। सम्राडसी स्याहवनीयमुपस्थायेति। उत्तरवेदेः पश्चा
द्वस्थायोत्तरवेदिकमाहवनीयमुपतिष्ठेरन्। पाठस्तु। सम्राडसि कृशानुरिति।
हे आहवनीय त्वं सम्राट् सम्यग्राजमानो दीप्यमानः सन् कृशानुः सर्व्वस्पर्कशी
यिता तन्कर्त्ता। दाहको भवसि। कृशतनूकरणो। अस्मात् अग्न्यादिकआनुपस्त्रायः।
आप्यायमानः। उदंचो गच्छाप्स्तर्व्विचायाखालेशामित्रानुदङ्ङुरवास्तु योनमोऽसम्मट इ
ति। उदङ्ङुरवास्तिष्ठेतः आस्तावदेशेचात्वालेशामित्रंस्तु आदि जिर्म्मंत्रैर्यथाक्रम

मुपतिष्ठेरन्। पाठस्तु। तुथोऽसि जनधायो नमोऽसि प्रतक्वाऽसम्मृष्टोऽसि हव्यसूदन इति।
हे ग्रावस्तावदेशा। त्वं जनधाय्यो जनानां धारकः तुथः तुथतेर्वधकर्मणस्तुथः रक्षः
२६ प्रभृतीनां हंता यद्वा तुन्हिप्रीथ वृत्तिगच्छति देवानिति तुथः थर्वतिर्गतिकर्मा एतत्तूसी
26 ह्नोऽसि। हे चात्वाल त्वं नक्षत्रश्वात्वालादुत्तरवेद्यादिकोपि ष्यानुपवयंति। तेन गतमन्ति
कत्वादवकाशरूपत्वेनांतरिक्तमसि प्रतक्वा। प्रकर्षेण तक्वा स्वावयवैः पांशुभिः स
र्वान् धिष्ण्यान् प्रविशन्नासि। तक्तिर्गतिकर्मा। हे [stain] मित्रदेश त्वं हव्यसूदन हव्या २६
नां हविषां हृदयाद्यंगानां सूदकः पाकेन प्रेरकोऽसि। अत एवत्र असंमृष्टः हविः सं
स्कारत्वेन स्वत एव शुद्धत्वात्। सम्मार्जनसंस्कारनिरपेक्षोऽसि। शाख्यायनः॥

त्वं विभुरसीत्याग्नीध्रीयमुपतिष्ठेरन्। पाठस्तु। विभुरसि प्रवाहण इति। हे आग्नीध्री
न्येषु २ या दौधिष्ण्य घृगन्नयो त्वं वह्निर्यं ते आग्नीध्रीयाद्धिष्ण्याग्निर्हरं तादि प्रत्येतरं ग्र
त एव प्रवाहणः। प्रकर्षेण वोढास्तु तैर्ग्रहैः स्य वा धारको सि। अत्र सत्रं। पूर्व
स्या सदसो द्वारि प्रस्य ग्रुखा स्तिष्ठंतो वह्निरिति होतुर्द्धिष्ण्यमिति उपति
ष्ठेरन्निति शेषः। वह्निरसि हव्यवाहन इति पाठः। हे होत्रीय वह्निर्वोढासि।
एतदेव विवृणोति। हव्यवाहनो हविषां चरु पुरोडाश सोमानां नीवोढासि। हो
त्रीय समीपे स्थितस्य होतुर्धिष्ण्य द्वारेण हि सर्वाणि हवींषि ह्रियंते त्र

त्रस्त्रै॥ स्वाच इति मैत्रावरुणस्येति। स्वात्रोसि प्रचेता इति पाठः। हे मैत्रावरुण
२७ धिष्ण्य। त्वं स्वात्रः क्षिप्रं गता प्रकृष्टचित्तवान् प्रचेताः असि। हे ब्राह्मणाच्छंसि धिष्ण्य
त्वं विश्ववेदाः सर्वज्ञः तुथनामकोसि। हे पोतृधिष्ण्य त्वं उशिक् कमनीयः कविः
27 क्रांतदर्शी प्राज्ञोसि। हे नेष्टृधिष्ण्य त्वं। अङ्घारि। आजुह्वस्तस्य घृतरण
दीक्ष्योरिति अस्य रूपमेतत्। आसमंताद्दीप्त संज्ञः सोमपालोसि। बंभारि २७
रिति। विभर्त्तेः रूपं बंभारि सर्वस्यातिशयेन भर्त्ता एतत्संज्ञः सोमपालोसि।
हे अच्छावाकधिष्ण्य त्वमवस्युः अवो रक्षणं यजमानानामिच्छतीति। अवस्युस्ता

२४

द्दशोऽसि। ध्रुवस्त्वान्द्रुवः परिचरन्तीतद्धां ध्रुवासि। अत्र मन्त्रं। तत्रैव तिष्टं तः। ध्रुवन्ध्यु
रित्ति मार्ज्जालीयमिति। सदस्यो द्वार्य्यं वितिष्ठं तोदक्षिणामिमुखा मार्ज्जालीयमु
पतिष्ठेरन्। ध्रुवन्ध्युरसि मार्ज्जालीय इति पाठः। हे मार्ज्जालीय त्वं धुन्ध्युः शोधयि
ता एतन्नामकोऽसि अत एव मार्ज्जालीयः नक्षितानीग्रहचमसादीनामर्ज्जा
लत्वेन प्रक्षालितत्वाधिकरणत्वेन शोधकोऽसि। अत्र मन्त्रः। ऋतधामेऽस्योदुम्ब
रीमिति। सदस्यो द्वार्य्यं वितिष्ठंतः प्रत्यङ्मुखा अदुंबरीमुपतिष्ठेरन्। ऋतधामा
स्वस्थानं यस्याः सा ऋतधामासि स्वर्ज्योतिरिति पाठः। हे अदुम्बरि त्वं ऋतधामा

का

सती सत्रं यज्ञो वा धामावस्थानं यस्याः सा ऋतधामा ईदृश्यसि । स्वर्ज्योतिः

२८ उन्नतचेतः स्वर्गस्य प्रकाशिनि वसि । स्वच्चस्त्वम् ॥ समुद्र इति ब्रह्मणस्सदनी ।

28 द्यार्यविततिष्ठंतः । पाठस्तु । समुद्रोसि विश्वव्यचा इति । हे ब्रह्मसदन त्वं समु

द्रः समुद्रवत् दुर्लंघ्योसि वेदत्रयात्मकैर्मंत्रैः । विश्वव्यचाः सर्वत्र व्याप्तोसि । सत्री ।

उत्तरेण सदोगवांतर्वेदि प्रत्यञ्चमुखास्तिष्ठंतो हिरलिप्रजहितमिति । प्रजहितश २८

ब्देन पुरा लोगार्हपत्यो निधीयते तमुपतिष्ठेरन् । अहिरसि बुध्न्य इति पाठः । अ

हिरसि । हंता रक्षः । प्रभृतीनां बुध्न्यो बुध्नमूले आदौत्याधानकाले प्रथमज्ञातो

स्वि हे प्रजहित इति। सूत्रं प्रज इति गार्हपत्यमिति। यः पुरातनआहवनीयः स
इदानीमोत्तरवेदिकप्रणयनाहूर्ध्वं गार्हपत्यस्संपन्नस्तमुपतिष्ठेरन्। प्रजोस्ये
कपादिति। हे नूतनगार्हपत्य त्वं प्रजः गमनशीलः सत्रस्थो ह्यग्निः उत्तरवेदिं
प्रतिगच्छति। ननु प्रजहितेन सहत स्मादेकपादसि। अत्र सूत्रं। सगराद्भूति दक्षि
णाग्नेरायतनमिति उपतिष्ठेरन्निति शेषः। पाठस्तु। सगरास्थसिबुध्न्य इति। सग
रा गरस्या गरस्तोमहविर्भक्षणेन सहितो बुध्न्ये मूले भवस्थासि। हे दक्षिणाग्न्याश्र
येति। सूत्रं। कव्य इति दक्षिणी वेदीतमिति महावेदेर्दक्षिणं पार्श्वं दक्षिणामुखा

उपतिष्ठेरन्न। पाठस्तु। कव्यासिकव्यवाहन इति। हविर्दद्दक्षिण पार्श्ववर्त्ती कव्या
२९ सिस्तुच्यासितथा कव्यवान्: कव्यी पितृभ्यो देयं हविः तस्य वोढा चासि दक्षिणा
29 त्रिमुखेन पित्र्यं हविः प्रयुङ्क्ष्व पते। अग्न त्रयस्त्री। तत्रैव तिष्ठेत: सर्वान्त्समन्वीक्ष
माणः पातमेति (ती) संहस्तोपतिष्ठे उपस्थितान्सर्वानिवधिक्षियान्न पुनः पुनः
समीक्ष्यमाणः पातमेत्ति संहस्तोपतिष्ठेरन्न। पाठस्तु। पातमा ग्नयो रौद्रेणा २९
नीकेन पिष्टतमानवोस्तु मामाहिं सिष्टेति। उपस्थिता हे अग्नयो धिष्ण्या स्वव
स्थिता युष्मदीयेन रौद्रेण अस्माद्धि रोधि विनाशकेन क्रूरेणानीकेन तेजसा

30

मा मां पात रक्षत । तथा मा पिपृत मम मा पेद्धिते अग्निः ह्वरयत । पालनहरणयोः वो
युष्मभ्यं नमो ऽस्तु मा मा हिंसिष्ट । अथापरं विधानं आहवनीयादीन्धिष्ण्यान् स्वैः
स्वैरुपस्थानमंत्रैरुपस्थायतदानीमेव तं तं धिष्ण्यं समन्वीक्ष्यमाणा पातमेति मंत्रं ऊहे
न एकवचनोपेतं ब्रूयुः । तत्रोच्यते हि । एकैकमुपस्थाये तद्ब्रूयुरिति शांडिल्यो बहु
शब्दानेकवत्कुर्वत इति । तद्यथा । उच्यते हि । एकैकमुपस्थाय । पाहि माग्ने रौद्रेणानीके
न पिपृहि मा नमस्ते ऽस्तु मा हिंसीरिति ॥ इति तंत्रे प्रथमाध्यायस्य चतुर्थः खंडः ॥४॥
अत्र सूत्रं । सूतस्य द्वारे स्थ इत्यपरे द्वारबाहू संमृज्य मा मा संताप्तमिति प्रविशेयु

* पाठस्तु। सतस्य द्वारोस्थो मा मा मा सं ताप्समिति॥ १

रिति। हि सदसः पश्चाद्यद्द्वारशाखे कृतस्य यद्गस्येव द्वारबाहू नवयथैयु वामतिक्रम्य प्र
३० विशंती मा मां मा सीं ताप्सीसंतापयुक्तम्माकुरुते। अत्र कृत्तत्रे। दक्षिणेनोदुंबरीं गत्वा तस्या
उत्तरत उपविशेयुर्नमस्सखिभ्य इतीति। पाठस्तु। नमस्सखिभ्यः पूर्वसद्भ्यो नमो
30 परसद्भ्य इति। ये सखायः कृत्विजः पूर्वदेशे सीदंति उपविशंति। ये चापरदेशे सीदं
ति। यद्वा उज्ञात्व सर्पणात्पूर्वं ये सदस्या उपविशंति। ये चोत्तरकाले तेभ्यो द्विविधे ३०
भ्यः प्रसे कं नमोस्तु। अत्र कृत्वा दक्षिणमनुबाहुं दंडं हस्ते चास्येनइन्द्रस्य वे द्यौति। उपवेश ते
ने तरं न हृणाच्छ्रसोमचमसी प्रतिगृह्य आत्मनो दक्षिणे बाहुं अनुचमसस्य दंडं हं

त्वातेचमसीतिर्यञ्चं धारयित्वाश्येनइतिमंत्रेणतंचमसमवेक्ष्यनक्षयेतिंदिव
स्यमाणपदेनान्वयः। पाठस्तु। श्येनोनृचक्षाअग्नेष्ट्वाचनृषावपश्यामिति।
चमसस्थितहेसोमसोमाहहुज्ञातःश्येनः एतन्नामकपक्षिवत्प्रबलःसू
क्ष्मदर्शीवाभवत्वानृचक्षाणोने इष्टासन्अग्नेसंबंधिनाचक्षुषाप्रतिहतिव
र्जितेनावाक्षुखः पश्यामि। समंत्र। इन्द्रवितिद्विरत्यैनक्षयेदिति। सकृन्मं
त्रेणसकृत्तूष्णीमितिद्विर्भक्षणंस्पष्टमन्यत्। इंद्रविंद्रपीतस्यतइंद्रियावतो
गायत्रछंदसः सर्वगणस्यसर्वगणउपहूतउपहूतस्यभक्षयामि। तवसंब

पाठस्तु।२ हेइंदोते

षिन महमुपहूतात्रस्यैनागं भक्षयामि। कीदृशस्य तव इन्द्रपीतस्य। इंद्रेणपीता
३१ ऽवशेषितस्य। इंद्रियावतः चक्षुरादीन्द्रियपाटवहेतुत्वेन तद्वतः गायत्रच्छं
दसः। प्रातःसवने तत्प्रयोग्यछंदोविशेषोपेतस्य। सर्वगणस्य। चयस्युष्यमन्यति
31 चतुर्भिर्ऋत्विग्भिर्जांगणैरुपेतस्य। उपहूतस्य मदीयपानात्पूर्वं अन्यैरृत्विग्भिः सह
मद्भैरनुज्ञातस्य। कीदृशोहं सर्वगणः सर्वैः पुत्रभ्रात्रादिगणैरृत्विग्गणैर्वोपेतः। उप
हूतः। अन्यैरृत्विग्भिरनुज्ञातः। अत्र सत्वं। ऊर्द्ध्व इति मुख्यान्प्राणान्निमृशेत ३१
ति। भक्षणानंतरं ऊर्द्ध्वः सप्तऋषीनिति सप्तमुख्यान्प्राणान्स्वचक्षुषी नासिके

श्रोत्रमुखं चाभिमृशेत । पाठस्तु । ऊर्द्ध्वस्स ब्रसपानुपतिष्ठस्वेंद्रपीतो वाचस्पते स
सप्तिजो ऽनुपुत्र्यस्व जुष स्वलोकमावाऽवगाइति । हे नन्दितसोमपत्वे ऊर्द्ध्वः शिरो
नागंभ्रामः सन्नस प्तऋषीन्त्स ब्रसंख्यापेतश्छिद्रवर्त्तिनश्चक्षुरादीन्द्रियरू
पान्नुपतिष्ठस्व प्राणुहि । तानाप्यायपितुं दर्शनसाधनत्वादेषामृषित्वं । ऋषि
दर्शनादितिहि निरुक्तं । यद्वा गोतमादिऋषिरूपेण मुखावस्थितश्छिद्रवर्गानुपास्य
त्वादृषित्वं । एतच्च बृहदारण्यके तस्यासत ऋषयः सप्ततीरे इति मन्त्रेणमावेव गो
तम भरद्वाजाविति । आत्मनेन स्यष्टीकृतो । हे वाचस्पते मदीयस्तोत्ररूपाया वा

चः पालकसोम त्वं इंद्रदेवतया पीतः सन्नस्मच्छिवो होतृप्रभृतीनृत्विजस्पउ
३२ ष्ठय स्वतानाप्यायपितृत्सुच्छ्रितो भव। ततो लोकं स्थानं स्वकीयं कुठरलं स्पानी
32 जुषस्व सेवस्व च। अवाक् अर्वाचीनः सन्नस्मा वै ग्रावगाः। नान्येर धोनगच्छेः।
शिवो मे सप्रसखीनुपति स्वस्व मामेवाङ्गानि मा तिग्मा इति हिनिगमीतरं। अत्रस
त्रे। सोमराई चीति हृदयमिश्रेति निम्शेदि स्यनुषंगः। सोमराणं धिनोहृदि पिता
नोसि भगवन्मामाहिंसीरिति। हे सोम नो अस्माकं हृदि हृदये रारन्धि रमस्व हे ३२
भगवन् ऐश्वर्यादिगुणविशिष्टत्वं नोऽस्माकं पितापालयितासि मोऽज्ञातारं मा

हि० सो: । वन्नरे न्वनस्पां हि सोमा काष्मरिच्युर्ढः । अत्र सत्री । सोमगीर्भिरितिनामि
मिति । अतिमृशेदित्यनुषंगः । पाठस्तु । सोम गीर्भिष्ट्वा वयं वर्द्धयामो वचोविदः सु
मृडीको न आविशेति । हे सोम वचोविदः मन्त्राभिज्ञा वयमुद्गातारः गीर्भिः स्तुति
भिः त्वां वर्द्धयामः अभिवर्द्धं कुर्मः । त्वञ्च सुमृडीकः सुखकरो नस्त्वं नो अस्मान्
आविश । तं सच्छाप्याययेदभिमृशंस्याप्यायस्वेति सर्वे वितथा गायत्र्योति । यः प्रति
हर्त्ता पश्चादन्वहयत । सं तं चमसमभिमृशंस्याप्याययेत् । द्रोणकलशात् सोमरस
मादाय तेन वर्द्धनमाप्यायनं मन्त्रेणाभिमर्शनमात्रं वा । पाठस्तु । आप्यायस्व स
अत्र सत्रं ॥

मेतु ते विश्वतस्सोम वृष्ण्यं भवा वाजस्य सङ्गथे इति । हे सोम त्वं आप्यायस्व
वर्द्धस्व ते तव वृष्ण्यं सेचनसमर्थं बलं । विश्वतः सर्वतः सर्वाभ्य आदिग्भ्यः
३२ समेतु सम्यक् प्राप्नोतु । त्वं च अस्माकं वाजस्य अन्नस्य बलस्य वा सङ्गथे सङ्गमे
हेतुर्भव । अत्र सूत्रं । तेषामनुवेद्यं न तत्कालमवमैरिति प्रातःसवने ऊर्वैरिति
33 माध्यंदिने काव्यैरिति तृतीयसवने पितृभिरिति सर्वत्रानुसंहरेदिति । नारा
शंसांश्च चमसान्भक्षस तच्छब्दः प्रयुज्यते । यथेतरच्चमसं नृहक्षसं त्वेश्येनो ३३
न्नचक्षः इत्यनेन मंत्रेणावेक्ष्य पश्चात्क्रियते । न तथा तेषां नाराशंसचमसानां

किंत्वन वेद्यैव नन्हरणं। अवमैरित्यादि भिस्त्रिभिर्मंत्रै स्त्रिषु सवनेषु नाराश
७ सन्नह्वणे। नपुनः इंद्रविद्भपीतस्येति[illegible] धपिमं त्रेषु पित्र्यमिरिच्छादि वा कयेश
षानु[illegible] भ्रजपते। पाठस्तुः। अवमैस्तअ वैसोकाव्येस्तेपित्र्यमिर्भिद्वितस्यमधु
मतो नाराश ७ सस्य सर्वगणस्य सर्वगण उप हूत उप हूतस्य नक्षयामीति।
त्रिविधाः पितरः अवमा अर्वाकाव्या श्चेति। एते अनुसवनं नाराशंसदेवताः।
हसोमअवमैः अवतेरो गादिकोऽयमवप्रत्ययः। रक्ष्यकैः एतत्संज्ञकैः पित
भिः। प्रातः सवनेन द्वितस्यतेतवमधुमतो माधुर्य्यपेतस्य नाराशंसस्य नरैः

संतानभूतैः शस्यीत इति नाराशंसाः पितरः तत्संबंधाच्चमसो नाराशंसः तस्य
३४ किंचिद्भागं नक्षो याति । सर्वगणस्येत्यादि सर्ववत एवं अवैक्तिकाव्येस्त इति मं
त्रयोप्यौजनात । उद्दीपस्वीतस्यांसंचरंतं अर्वाः । काव्यास्तु त्वष्टाः । एतत्त्रसंसैः
34 पितृभिर्नह्वितस्येत्येतावान्विशेषः । अत्र सत्रैतत्पैवजङ्घामुपहत्संपुंज्यास्तो
मदीक्षायैतपसोमनसोवाच्च इतीति । यथापुराभस्मरे त्वच्चीयोर्जघामुप
स्पृश्यस्तोमोयुक्तः तथैवेदानीमपि सोमयोगमुपकरणाद् ब्रह्मांजंघास्य ३४
शौचविशेषः । पाठस्तु । दीक्षायै वर्णेन तपसोरूपेण मनसो महिम्ना वाचो विभ

सा प्रजापतिस्त्वायुंनन्तु प्रजाभ्योपानायेति। आदितः पदद्वयात्मकाश्चत्वारो मं
त्राः एतद्देवा अग्निप्रत्यदीक्षातपोमनोवाकूशब्दैश्चतुर्भिः प्रतीकग्रहणं कृतं। प्रजा
पतिस्त्वेत्यस्य भागः चतुर्ष्वपि मंत्रेष्वनुषज्यते। तदाह सूत्रकृत। अंतः सर्वेषां प्रजा
पतिस्त्वेतीति। एतैश्चतुर्भिरपि मंत्रैरेकस्मिन्नेव स्तोत्रे सोपयोग इत्येकः पक्षः।
यत्र नैरंतर्येणाहृतस्तोत्राणि चत्वारि लभ्यंते। तेषु चतुरो मंत्रान् क्रमेणाप
यन्ति न जपस्तोमप्रयोगः। न चैकस्मिन्नेव स्तोत्र इत्यपरः पक्षः। इमौ द्वावपि पक्षौ
सूत्रकारो दर्शयति। नानाधानस्रुक्ष्यपात्रयत्नानंतराणि चत्वारीति। मंत्रार्थस्स्फुटः।

वृ २

हे सोम प्रजापतिः प्रजापालको देवः प्रजाभ्यः प्रजोपकारार्थं दी (र्घा) येवर्णेन यजमा
३५ नानुष्ठितनियमरूपायाः सामर्थ्येन [illegible] त्वायुनक्तु। त्वां योजयतु। तथात्र
पानाय अपाननाय बहिर्गतायाः प्राणस्यांतः प्रवेशनमपाननं तेन हि प्राणो वायुः
35 शरीरे धीयते। अपानेन त्यपयीयतः प्राणेन पराजवतीति स्मसे तरी। तदर्थमपि प्रजाप
तिस्त्वां युनक्तु। एवमुत्तरेष्वपि त्रिषु मंत्रेषु योज्यं। हे स्तोम तपसो यजमानानुष्ठि
तस्य पयोव्रतादिलक्षणरूपेण प्रजापतिस्त्वां युनक्तु इति द्वितीयस्य [illegible] ॥ [illegible]न ३५
सोमनस्तत्वस्य महिम्ना सर्वविषयावगाहन शक्या प्रजापतिर्युन[illegible]क्त्विति।

36

तृतीयस्य विशेषः । तथा वाच्यो विभूत्या विनवेनेन सर्वपदार्थप्रकाशनसामर्थ्ये
न प्रजापतिर्पुनक्ति । चतुर्थस्य । एतस्य अपएव स्तोमयोगः । त्रिवृत्त पंचदश
सप्तदशैकविंशादयो द्वितीयतृतीयाध्याया क्लृप्तास्तोमाः । त्रिवृद्बहिष्प
वमानस्तोत्रे त्रिवृत्स्तोमो विहितः । तस्मात्सर्वत्र बहिष्पवमानो गन्त्वे नाग्ने
स्तजसेति मंत्रः । त्रिवृत्स्तोमयोगं विहितः । तथा चतुर्थ्यामाज्येषु स्तोत्रेषु पंच
दशस्तोमो विहितः पंचदशान्याज्यानीति श्रुतेः । अतो वाज्यास्तोत्रांगत्वेन पंचद
शस्तोमयोगो दीक्षायै वर्हिस्याद्दिमंत्रो विहितः । आज्यस्तोत्रेभ्य ऊर्ध्वं प्रातःसवनेस

माप्यते। अत्र क्रतुसंग्रहः। वसतीवर्य्यपां प्राश्नीप्रचारः स्याद्दधिग्रहे। उपांशुपात्र
दाभ्यो कृत्वा महाभिषवमाचरेत्। उपांशुमन्तर्य्यामिं च कृत्वा रिक्तं तु सादयेत्। आग्र
येन्द्रवायवं पात्रे गृहीत्वा सादयेत् खरे। यो मैत्रावरुणस्तं तु आश्विनाति पयसा
ग्रहं। शुक्रः श्रितो हिरण्येन मिश्रितो मंथी तु सक्तुभिः। गृहीत्वाग्रयणं गृ[illegible]स्यति
ग्रा ह्याभिचय ग्रहान्। गृहीत्वोक्थ्यं ध्रुवो याः स्युः पवमानग्रहास्त्रयः। पूतभृद्द्रो
णाकलशो परस्मा आधवनीयकः। ते बहिष्पवमानाय पुरोडाशोऽग्रास प्रसर्पन्त्य
त्र पंचते। गृहीत्वाग्निमाग्नेय पशोः कुर्य्यादुपाहृतिं। सवनीयपुरोडाशे स्व

३६
36
३६

37

रित्वा ऐंद्रवायवं हुत्वा ग्रहं द्विपो मैत्रावरुणाश्विनयोर्हुतिः। शुक्रामंथ्यादिका
न्हुत्वा चमसान्पिजुहूतिः। सीरस्यपत्नुग्रहेंद्राग्रसोमप्रतिगरस्ततः। आज्यस्तो
त्रेष्वप्युद्दिहि प्रातःसवनसंस्थितिरिति। अथमाध्यंदिने सवने पवमानस्तोत्रा
र्थंस्तोमयोगो बहिष्पवमानवत्। अग्नेस्तेजसेति मंत्रेण कार्यः। अत एवब्रा
ह्मणस्यमाध्यंदिनार्भवपवमानयोः स्वर्वक्तिमतिदिशति। एतस्माद्वैकुर्याद्दुत्तर
योः पवमानयोरिति। अग्नेस्तेजसेति मंत्रेण पूर्वभागं तथैवांगानस्तोत्तर भागे कं
चिद्विशेषं ब्राह्मणमाह। स्तोमयोगे ग्निर्मूर्धेति स्थैतस्य स्थाने वायुर्युन

ऋतुस्थाय्यस्पुनश्चिकिति प्रक्षिपेदिति शेषः।तयो माध्यंदिनसवने स्तोमयोगमं
३७ 37 त्रस्योत्तरत्नागं एवमाम्नायते।वायुर्म्पुनक्तु मनसास्तोमयज्ञाय वोढवेदधा
त्विन्द्रइंद्रियं संस्थाःकामायजमानस्य संस्थिति।वायुर्द्दिवोऽनुग्राहकेत्त
मनसास्तोमेपंचदशाकव्यंमाध्यंदिन पवमानस्तोत्रार्थंपुनक्तु योजयतु।
यज्ञायइत्यादिपूर्ववद्व्याख्येयं।यजमानेन वाचनीयस्य शपेनोसीत्येतस्य मं ३७
त्रस्य स्थाने द्वाह्याये त्योमंत्र द्वयमुत्तरयोःसवनयोर्द्दर्शयति।वृको सिस्वरो ५
सीतियजमानवाचनइति।तत्र प्रथमं मंत्रएवमाम्नायते।वृषको सित्रि

ष्टुप्छंदा अनुत्वारभे स्वस्तिमासंपारयामास्तोत्रस्यस्तोत्रं गम्यादिंद्र वेतोव
नेमहि मह्वी महि प्रजामिषमिति । हि मध्यंदिन पवमानत्वं त्रिष्टुबाकत्वंछंदो वि
शिष्टः सन्न्न ह्यषकः कामाभिवर्षणो समध्व्यं इंद्रो सि । अन्नस्य सर्व्वं श्पेनमंत्रव
ध्याकेष्वयं । इंदविंद्रपीतस्येत्यादिश्च मसन्नह्यणमेवः । तं मंत्रेंद्रा ख्यायणः । प्रा
तः सवनसंबंधाविनियोगावसर एव तद्विशेषकथने नार्थ्वादिच्छेविनियुक्त
वान् । इंदविति द्विरस्यं नह्यये घ्यासवनं छंदा ंस्यादिशानिति । प्रातः सवने
गायत्रछंदस इति पाठः । माध्यंदिने त्रिष्टुप्छंदस इति । तृतीयसवने जगच्छंद

स्य

३८ सङ्ख्यैतावानेवं विशेषः। पाठस्तु। इदं दधिविंदपीतस्यत ईद्रियावतस्त्रिष्टुप्छंदसः

38 सर्वगणस्य सर्वगण उपहूत उपहूतस्य भक्षयामीति। दधिविद्याख्येये। अथ

क्रतुसंग्रहः। माध्यंदिने तु सवने पुरोडाशः पशोर्जवेता। ग्रहो मरुत्वतीयः स्या

त्पवमानेन संस्कृतिः। दधिघर्मकृते दधा दधिहविणा स्तोयथा यथं। मरुत्वतीयो

स्मानुरूपामाहेंद्रेण समाप्यत इति। अथ तृतीयसवने। यद्दिव्यमार्जवपवमा

नाकम्पंसोत्रीत दक्षिणमग्न्येस्तेजसेति मंत्रेण स्तोमयोगः कर्त्तव्यः। तस्य मंत्रस्यो ३८

त्तरत्र भागेयः पाठशेषः स एव मान्नायते। स्व्यायुनक्तु वाचास्तोमं यज्ञाय

वो॰ वेद धाह्यिन्द्र इन्द्रियं॰ सत्याः कामा यजमानस्य सन्त्विति। सूर्य्योदेवो वा
चा मंत्र रूपया स्तोमेस प्तदशाख्ये युनक्तु योजयतु। अन्यत्पूर्ववत्। श्येनोसी
त्यस्यस्थाने तृतीय सवनयजमानेन वाचनीया मंत्र एवं आम्नायते। स्वरोसि
गयो सि जगछंदा अनुष्टुमानैरे स्वस्ति मासी पारयामास्तोत्रस्य स्तोत्रं गमय्यादि
न्द्र वंतो वनेमहि मही मह्हि प्रजामिषमिति। ह आ ऊर्ध्व पवमाना सिमा सिन्द्र स्तु
र्य्य सि जगछंदाः अगस्या कव्य न छंद सायुक्तः सन्नु स्वरः स्वरणीयः शब्द नी
यः स्तुत्योसि। गयागयः फलानि विजिगीतव्योसि। अन्यत्पूर्ववत्। तृतीयस

वनेचमसभक्षणीमंत्र एव माम्नायते। इन्द्र विन्द्रपीतस्य त इन्द्रियावतोऽजगच्छंदसः स
२८ र्वगणस्य सर्वगणऽउपहूत उपहूतस्य भक्षयामीति। सर्वविद्याकेभ्यं। द्राख्याय
स्नः। सोम्यमाहृतमुज्ज्ञातावेक्षेतायुर्मेप्राण इति पुनरस्मासु दधासीत्यैत इति।
39 सोम्यं चरि अक्षयुतिरा हूतऽ हूताश्वायुर्मइति मंत्रेणयजुषायन्मेमन इत्य
नुवादनादर्वाग व वेदेत तस्य मंत्रस्य दध्मसीत्यवसानं स्यात्। यन्मेयमं इत्ये ३९
तद्द्वैयमालीवेकल्पिकं मंत्रांतरं नवे तेन सह तस्यैकमंत्रत्वमस्ति। तयोरुभयोस्तु
स्यार्च्छेनविकल्पितत्वात्। तदेतद्विशदीकर्तुमंत्रावसानमुक्तं। पाठस्तु। आयुर्मम प्राण

40

मनसि मे प्राणमायुं पत्न्या मच्चिं यत्तन्मे मनो यमेग तयद्वा मेऽप्य परागतं ७ राज्ञासो
मे नतदूयं पुनरस्मासु दध्मसीति । मम मदीयमायुर्जीवनं प्राणे समाश्रितं । यावदस्मि
न्शरीरे प्राणो वसति तावदायुरिति । कौषीतकिश्रुतेः । तथा मे मनसि श्रितः कर
णः स प्राणे पंच द्वान्निर्वायुः समाश्रितः स प्राणो मदीय मनस्यु ज्ञाने शङ्कां कुर्याद्
त्यर्थः । अत एवास्मायुं पन्नो ऽन्नमयो मनुष्याः तेषां पालयित्री मन्विं सा ऽन्नमाधा
र भूता यां स प्राणो वर्त्तते रुचां तदाश्रयाणी सा मन्नं चाहं धारयितास्म्या समि
त्यर्थः । किंच मम मदीयं यदुक्तं प्राणे विशिष्टं मनो मानसं यमं गतं म त्स्युं प्राप्ते

यद्धाय द्दिवामे मनः अपरागतं पुनरावर्त्तयितुमशाकं गतं । नैरंतर्य्येण लौकि
क एव विषये आसक्तं तदुन्नयद्विधर्मनः राज्ञा राजमानेन ईश्वरेण वासो मे
४० न अस्य वशे नयैं स्मास्वेव पुनर्दृढ्यसिधारयामः । यस्तु वै कल्यिकउत्तरो मं
त्रः स एव मामन्नायते । यन्मे यमं वैवस्वतम्मनो जगाम दूरगास्तन्म आवर्त्ते
40 या पुनर्ज्जीवातवेनमर्त्तवे धोअरिष्टतातय इति । अविवाक्ये दशमेऽहनि या ४०
पृथीयन्मे मन इत्येषा स्रुकं अनुष्टुप् प्सा तस्मिन्नहनि निषिद्धा । दशमेह
नि परोदृमनुष्टुन्नमुपयीतिय स्वसद्दृमुपेयुः प्रजापतिमभ्येयुरिति ब्राह्मं

41

त्त्वा त्रातत: अस्या अनुष्टुप्स्थाने एषा पङ्क्तिः प्रयोक्तव्येति केचिदिति सूच्यते
हि। यन्मेमनः स्थाने यन्मे यमममिमित्येक इति। सूत्रकारस्तु दशमे हन्यपि पूर्व
स्याः ऋचश्चतुर्थपादमस्य सैवात्र प्रयोक्तव्या। एषा चेति विकल्पिते चोक्त
त्वात्। यथैव सूत्रान्तरं दशमे हन्यस्यादिति। मंत्रार्थस्तु। मेममम मनो मान
सं वैवस्वतं विवस्वतः सूर्यस्य पुत्रं यमं जगाम शरीरान्निःक्रम्य प्राप्नोत्।
हे सोमसूद्धस्या: दूरं गामी यमसदनं प्राप्तः सन्मेमदीयं तन्मनः आवर्त्तय।
मदीयदेहं प्रत्यावृत्तं कुरु। किमर्थं पुनर्जीवातवे जीवनाय तथापि जीवितुं न

४१ मर्त्तविमरणग्नावाच्छीत्यथोपिचत्र्यरिष्टतातये।रिष्टंहिंसातद्विरहंसुखनाव
स्छानंअरिष्टं।तस्यतातये।विस्तारय।द्राघ्याय॥।तस्मिन्त्वंगुष्ठानामिके अव
घायाहिलीविमार्ज्जीतये नाह्याजिमितीति।तस्मिन्नंगुली अवधायांगुष्ठाना
41 मिकेइत्येवेअंगुलीविमार्जीतयेनाह्याजिमितीति।तस्मिन्त्सोमपवरोयके त्वितृ
ह्व अंगुली अंगुष्ठानामिकेवा अवधाय ताभ्यामहिली विमार्ज्जीतै।पाठस्त्त।ये तिप
नाह्याजिमजयद्विचन्पपयेनश्येनः शकुनः सुपर्णप्पदाकुम्बस्तुरदिता ४१
वनेतः सोमान्त्वद्यामयितद्धाच्चिति।येनआहीतिपदच्छेदः।हिशब्दोवाक्या

त्वंकारे उपसर्गस्त्व व्यवहितास्त्विति व्यवहितेन ति ॐ तेन संबध्यते । येन हि चक्षु
षा चक्षुरिन्द्रियेण दूरदर्शिना कश्चिद्धानुष्क आजिवेचनीयां प्रैमिं दीर्घिवत्साचि
शेषेणावलोकयन्नाभ्यजयेत । अभिजयेत । छंदसि लुङ्लिङः । तथा येन चक्षुषा
सुपर्णे शोभनपतनं श्येनं एतत् संज्ञं अभिजयेत । श्येनोपि सूक्ष्मदर्शी इति प्रसि
द्धः । तमपि सूक्ष्मदर्शित्वेनाभिजयेदित्यर्थः । आदितौ पृथिव्यां अनुद्दीयी
प व्यक्षुरनेतअंतर हितं वेश्मादिविप्रकृष्टदर्शनसमर्थमाकुर भिज्ञाः कथयं
ति । आदितेर्द्यावा तु संबंधि यच्चक्षु रनंतमवसानरहितमाहुः । वेदाभिज्ञाः

तदुक्तगुणविशिष्टं च द्युम्नं दत्तो द्रष्टा सोमः मयि दधातु स्थापयतु॥ ॥ इति साम
वेदार्थप्रकाशे तांड्यमहाब्राह्मणे प्रथमाध्यायस्य पञ्चमः खंडः॥५॥ अत्र
४२ सत्री। सत्त्र एव यथाहस्य नह्युपेयुरैन्द्रं सह इतीति॥ द्विविधो हि दशरात्रः सत्र
42 महीनश्चेति तयोर्मध्ये सत्त्ररूप एव दशरात्रे यः षोडशिग्रहोस्ति तमनेन मंत्रे
मास्तोत्रीया भवति। गर्भङ्कू रोतीति यत्तु राजानं क्षत्रियमेव विशो गर्भङ्कू रोति। मध्य
स्तोत्रीयायाश्च क्षत्रियायतने समुत्तरत्रा मास्यते। ७। ब्रह्म लोको वा आयतनमस्य प्रथ
मा हस्तत्रस्य मध्यमेति। विवक्त उद्यत्स्याऽवज्ञानाऽज्ञानयोर्विवेकवदस्याः फलमित्साह।
७। नावगतो परश्छतेनापरश्छावगच्छतीति। एवं विद्यारम्भी। तथाऽयं जनस्य साध्चन

त्वेन स्तो॰ निवारयिकेषाविष्टुतिरितिप्रश्न॥ सति॥ अन्नं वै सप्तदशोऽयं सप्तमध्ये भवति
८६ पञ्चपञ्चाशितोऽन्नमेव तन्मध्यतो धीयते॰ नराना युक्तोऽयजमानो भवत्य नशनायुका:
प्रजा इति। अयं सप्तदशस्तोम अन्नं वै अन्नमेव। दशसंख्याया ऊर्ध्वं सप्तसंख्यातिरि
86 च्यते। तया सप्तसंख्यया सप्त ग्राम्या उषधयः सप्तारण्या इति श्रुति प्रतिपादितेऽन्न
न्तेऽन्नं स्मार्यते। एवं परं पर्यायः सप्तदशस्यान्नत्वे। यद्वा प्रजापतेरन्नाय तेनादुदरा
त्सृष्टत्वात् सप्तदशस्यान्नत्वं। शाखान्तरे सप्तदशस्तोमः सत्त्विं प्रसुस्तत्स्यते हि। तस्मात्तस्मा ८६
द्या अन्न धानाद्यसृज्यतेति। विष्टावसानि वशान स्वस्मं विष्टावेष्टिता: यत्सप्तमध्यमा भवति।

अन्नितः प्रथमेषु त्रिषु च विंशावेषु पञ्चपञ्चस्तोमा भवंति। तत्रैतेन पंचसङ्ख्यायायुक्तस्य
पाङ्क्तस्य पुरुषस्य मध्येतो मध्ये उदरे अन्नमेव धीयते। सप्तसंख्योपेते ग्राम्यारण्या
दिके अन्नमेव धीयते। यत एवैततः कारणात्सप्तदशस्तोमस्य प्रयोक्ता यजमानः अन
शनायुक्तो अशनाया अशनेच्छा क्षुत्तृपा जातत्तू रहितो भवति। तद्दशवर्त्तिन्यो अन्या
अपि प्रजाः अनशनायुक्ताः अशनायारहिता भवंति। तथा पशुसाधनत्वेनैतां प्रश
ंसति। वैराजो वै पुरुषः सप्त ग्राम्याः पशवो यद्दशपर्वा भवति सप्तोत्तमाय यजमा
नमेव तत्पशुषु प्रतिष्ठापयतीति। पर्यायद्वयगताः दशसंख्याः पर्वाः प्रथमा भवन्ति।

87

सप्तत्तृतीयपर्य्यायगतारूचो नवैतीतियत्तूतत्तेनयजमानमेवपशुषुप्रतिष्ठापयति।
कथमेतत्त्रयतोवैराजःपुरुषः।विराट्पादश्चदशसंख्याविधते।नववैपुरुषेप्राणा
दशमीनाभिरितिश्रुत्यंतरात्पुरुषेप्यस्तिदशसंख्या।अतोवैराजःपुरुषइतिआद्य
स्यदशर्चस्यस्तुतिः।सप्तसंख्याकाग्राम्यैवाःपशवोगवाश्वाद्याअवशिष्टसप्तर्च्चसंस्था
नीयात्।अतोयजमानंपुरुषंउद्गातासप्तसंख्याकेपुशुष्ठापयतीत्येतदुपपन्नंएवमु
क्तेनप्रकारेणदशर्चस्यविष्टुतिःप्रतिष्ठाहेतुरितिदर्शयति॥एषावैप्रतिष्ठितासप्तदशस्य
विष्टुतिःभवतीतियएतयास्तुतेइति।सप्तार्चः॥ ॥इतिद्वितीयाध्यायस्यसप्तमखंडः॥

सतिसृभिर्

नां

।।उक्तायाएवदशासप्तायाविष्टुतेर्व्वि चोतरमाह।। एषएवव्यूहः सप्तैकमध्याइति।दशास
प्तायाविष्टुत्साय स्तृतीयःपर्य्यायः। सप्तभ्योहिंकरोतिसएकयासतिसृभिः सुक्तः एषए
वपर्य्यायोव्यूहः।व्यूहोविज्ञनीयः।कथमितितदुच्यते।उत्तमेपर्य्यायगतायाःसप्तर्च्चः ता
एकमसतिसृभिस्तिसृभ्याः कुर्य्यात्।सएकयासप्तिसृभिस्सतिसृभिरिति एर्व्व मुक्तः।सति
सृतिभिस्सएकयासतिसृभिरितिकुर्य्यात्।आद्यौतृतीयोचत्रिरावर्त्तयेदित्यर्थः।एतौ
प्रश८ संति।।ब्राह्मणोवाआयतनं प्रथमाहत्रस्यमध्यमाविशउत्तमायत्स्रथमाप्रयेण
नाजयतिब्राह्मणप्येवतद्देजोवीर्य्यन्दधातिब्राह्मणएवतत्क्षत्रविशश्चानुगकरो

तिच्छूत्रस्यैवास्यप्रकाशो भवतियैरेयएतया स्तुत इति ॥ प्रथमास्तोत्रीयत्वच्चस्याधाया
८८ साब्रह्मणेणाब्राह्मणेण ज्ञाते रायतनैस्ष्ठामं । उभयोः प्राथम्येन संबंधात् । यामध्यमाद्विती
यासाद्दत्रियस्यक्षत्रियजाते । यात्तमा तृतीया सा विशो वैश्यजाते रायतनं । तथा सति प्र
थमां ब्राह्मणे जाते रायतन मतां त्र्याधामच्चै मयिष्ठाबजूरैः संख्या नाजयति प्राप्य
ति । तत्र कथमिच्छूज्ञाते । पूर्वस्यां विष्णुनो द्वयोः पर्याययोः साप्रथमा एकैका त्र्यावत्स
तिस्त्रश्चेति । पञ्चसङ्ख्यायुक्ताऽभूत् । सैवेदानीं तृतीयेऽपि पर्याये त्रिरावर्तनात् सप्त ८८
सङ्ख्योपेता भवति । मध्यमोत्तमे तु पंचसंख्योपेते एवं प्रथमा(मे)धिकसंख्यां करोतीति यत्तत्

त्रृतेन ब्रह्मणा ब्राह्मणे जातावेव उजो बलं वीर्यं परस्परेण सामर्थ्यं दधाति स्वाप
पति। अपि च। तत्रेन क्षत्रियवैश्य स्वान मत योर्द्वितीय तृतीययोः ऊनसंख्योपेतत्वेक
रणेन क्षत्रं च क्षत्रियजातिं च विशं च वैश्यजातिं च ब्रह्मणो ब्राह्मणे जातेरेव अनुगे
अनुगं च्यो उपद्गीणे करोतीत्यर्थः। तस्माद्दर्श्यापि यायजमानः एतयास्तुते। क्षत्र
स्य वद्धत्रिय जातेरिवास्य यजमानस्य प्रकाशः कीर्तिर्भवति। उक्ता विष्टुतिः त्रिखर्वे
शाखिनाम्नि स्तोत्रे ह। तामेतां त्रिखर्वा उपासते तस्मात्ते स्पर्द्धमानानश्वीयन्त इति। ता
मेतां दशसप्तारव्यां विष्टुतिं त्रिखर्वे शाखिन उपासते प्रयुंजते तस्मादुपासनात्ते

कदाचिदपि स्पर्द्धमानाः संतो न ज्ञीयन्ते। न हिंस्यंते। ज्ञानान्तिर्हिंसाकर्म्मा।। ।।इति द्वि
८६ तीयाध्यायस्याष्टमः खंडः।।८।। अथ सप्तदशस्तोमस्य सप्तास्थिता ख्यां विष्टुतिमाह।। स
प्तभ्यो हिंकरोति स तिसृभिः स तिसृभिः स एकया तिसृभ्यो हिंकरोति स पराचीभिः सप्तभ्यो
69 हिंकरोति स एकया स तिसृभिः स तिसृभिः सप्तास्थितैः सप्तसीख्या प्रथमे पर्याये स्थिता
यस्यां सा सप्तास्थितेति नाम संपन्ने स्पष्टमन्यत्।। अस्याधिकारिणमाह।। भ्रातृव्यवान्स्तु ८६
वीत यथा सप्तास्थितेन मन्त्रेण मता करोत्येवं पाप्मानं भ्रातृव्यं प्ररूजतीति।।
भ्रातृव्यः शत्रुः तद्वान्यजमानः एतया सप्तास्थितया विष्टुत्या स्तुवीत स्तावयेत्।।

यथा लोके सप्तास्थितेन सप्तभिरनड्डुद्भिः सप्तभिस्तीक्ष्णभागैः शङ्कुभिर्वा क्षिप्रं छिते
न मन्येन मन्त्नामहृष्टस्पष्टो त्रसमीकरणं दृसा यत्नं फलकं तेन समीकरोति समी
करणात्केवर्षुकः प्रव्रजति हेत्री। एवं पाप्मानं पापकदर्शनहेतुं भ्रातृव्यं शत्रुं अनया प्र
थमतः सप्तसंख्यया विहुस्यास्तुवानः प्ररुजति प्रभुनक्ति। रुजो भंगइति धातुः फलसाम्य
हेतुत्वेन बहुयजमानके ऽपि प्रयोगे छुप्रयोक्तव्या स्यात्॥८॥ एतामेव बहुभ्यो यजमाने
भ्यः कुर्यादिः प्रथमो हिङ्कारः सप्तप्रथमायायन्ता८ सप्तभ्यो हिंकरोति तेन सास सप्त भज
ते य ऋत्सैवमध्ये संपद्यंते तेनो सास सप्त भजते य उत्तमो हिंङ्कारः स उत्तमायायन्ता८ स

प्रभ्यो हिं करोति तेन सा सप्तम भजते सर्वाणि वैनान्तसमावङ्गाजः करोति नान्योन्यपरस्प
ते सर्वे समावदिन्द्रिया भवन्तीति। बहुयजमानार्थं सतां विकुर्तिकुर्यादिति। तथा स
तित्वचगतानीति स्तोमस्य चौसमसंख्या त्वापादनात्। सर्वे यजमानाः स मानफला भवे
90 ति। तिसमुदायार्थः। कपीस प्रादशेतिस्तोमस्य चांप्रत्येकं सप्तसंख्यायोग इत्याशीक्यते
प्रकारस्त्वं पञ्चसादर्शयति। यः प्रथमो हिङ्कारः स प्रथमायास्त्वचस्थाने भवति उभयोः प्रा
थम्यात्। तौ प्रथमामुच्छिषस प्रभ्यो हिङ्करोति हिङ्कृत्य स्तौतीति यत्र तत्र तेन स्तुत्वं स्थानी ६०
येन हिङ्कारद्वयेन सह सा प्रथमपर्यायिणिवैष्टावससन्निवेशेन पंचधा वर्त्तमानास्तिस्रो

सप्तसंख्यां भजते। प्रथमपर्य्याये प्रथमविष्टावेतिस्रः इतरयोस्तु पर्य्याययोः प्रथमवि
ष्टावगता एकैकेति। तस्याः पंचधाभ्यावृत्तिः यत्सप्तैवमभ्यसंपद्यंते त्रयाणामपि पर्य्याया
णां मध्यमे पुविष्टावेषु क्रमे णातिस्र एकातिस्र इति सप्तानां संपत्तिः तेनोतेनैव साममध्य
मे ~~पुविष्टावेषुक्रमेणातिस्र~~ सप्तसंख्यां भजते। य उत्तमस्तृतीयपर्य्यायगतो हिंकारः स उ
त्तमायास्तृतीयस्थाने उभयोस्तृतीयत्वसाम्यात्। यत्तामुत्तमामनुद्दिश्य सप्तभ्यो हिंकृ
तो तीति हिंकृत्स सप्तोतीति। यो द्वितीयो हिंकारस्सोपि तस्याः स्थाने भवति। यदेतत् हिंकार
द्वयमस्य कस्थानीयं यत्। तेन हिंकारद्वयेन सह पर्य्यायत्रये उत्तमविष्टावेषु क्रमे लोके

केतिसत्रश्चेत्यावर्त्तमानापीचेतिसप्तसीरव्यांभजते। इच्छंतिसृष्टगांसप्तसीरव्यासाम्यसीपत्तेः।
सर्वान्नेवैनान्यजमानान्समावद्भाजः समानफलयुक्तान्करोतिउद्गाता। एषाप्येकेप्राप्ति
न्निश्चेत्याह। तामेतामाभिप्रतारिणउपासते तस्मात्तेउजिष्ठास्वानामिति॥ अभिप्रता
९१ रोनामकश्चिद्राजर्षिस्तजोत्रजा आभिप्रतारिणः तेभिप्रतारिणः तामेतांसप्तास्थि
तीं विष्टुतिमुपासते। कर्म्मस्तुतिश्चैषमुञ्जते। अतस्तेस्वानांज्ञातीनामन्नाद्येउजिष्ठाः
उजसिस्थितानवीति। स्वशब्दस्यज्ञातिवचनत्वेनस्वमङ्ज्ञातिधनाकर्मायामितिसर्व
नामसिद्धोपर्युदस्यआपः सुउन्नावः। इतिद्वितीयाध्यायस्यनवमः खण्डः॥९॥ सप्तदश

१२

स्तोमस्य सप्तास्थितायां विष्टुते बहूहनप्रकारं तत्र माह ॥ ८ ॥ एष एव बहूह उत्तमस्य स्त
पैक मध्यानि मर्द्धाइति । उक्तायाः सप्तास्थितायाः एष वत्समालोक्व होवि नागप्रका
रः कथमिति । तदुच्यते । प्रथमोत्तमयोः पर्य्याययोर्वर्द्धमानात् उत्तमयः उत्तमयमायाः सप्त
र्द्ध एकमध्याः कार्य्याः सतिस्त्रभिस्सतिस्त्रभिस्स एकयेति । हि प्रथमे पर्य्याये समाम्नाताः ।
स एकया सतिस्त्रभि स्सतिस्त्रभिरिति ह्यात्तमे तत्रोत्तमयोः पर्य्याययोः सतिस्त्रभिस्स ए
कया सतिस्त्रभिरिति मध्यमाए केवयथास्यात्तथा कुर्य्यादित्यर्थः । एवं सति तथा स
ति त्रिष्वपि पर्य्यायेषु मध्यमायास्तोत्रीयायाः रूच्च श्रावत्स भावादेषा निर्मध्यानिर्ग

तमध्वस्तौ त्यात नुमध्येत्तर्थः। अस्या मध्ये का रिणमाह। आनुजावरस्तवीत
६२ लोको वा एष यदानुजावरोय त्स पश्यमास्स यो त्तमास्ति स्तोमध्ये प्रहारः पुर
षो लोकमेवास्मैतन्मध्यतः करोति तस्मिन्लोके प्रतितिष्ठतीति।। एतयाविष्णुत्या
92 आनुजावरोऽति कनिष्ठो यजमानः स्तवीत यत्र यत्रानुजावरः स एष अलोको वै
लोकस्थानं तन्न रहितः खलु जनैरपरिगृहीतत्वात् तथा स तिय च्च स्मास पमाः प्र
थमपर्यायस्थाः सप्तर्चः। उत्तमा उत्तमपर्यायगतास्व सप्तर्चः। मध्येमध्यम ६२
पर्यायेति स्वः यथा त्रिषु पर्यायेषु प्रथमो त्तमविष्टावगताः सप्तसप्तर्चो भवंति।।

मध्यमविष्टावगास्तुतिस्त्रः पुरुषस्तत्र्यद्वारवाच्यो नवस्यानुजावरो पुरुषः यस्मादे
वं तस्मात् त्र्यक्षरा मिथेय पुरुषस्तुतानीयमत्र्यक्ष्य मध्येप्रयुज्यातः सोतात्र्यस्मात्त्रा
नुजावराय लोकं स्थानमेवमध्यतो मध्ये करोति । अनया विष्णुत्त्यातस्य लोके लभ्य
तइत्यर्थः । तस्मिंल्लोके प्रतिष्ठितश्च भवति । आधिकार्य्यन्तरमाह । ७ । एतामेव प्रजा
कामाय कुर्य्यान्मध्यतो वा एष स ७ रूढो यः प्रजां न विन्दते लोकमेवास्मै तं मध्यतः
करोति तल्लोकं प्रजया च पशुभिश्चानुप्रजायत इति ॥ एतामेव विष्टुतिं प्रजां पुत्रमत्रा
दिकां कामयमानाय यजमानाय योजाता कुर्य्यात् । यः प्रजां न विन्दते न लभ्यते । एषः

६२

पुत्रपश्वादीन्नाम्नश्चतोमश्च देशात्संरूढः सम्यगुच्छितः प्रजावाद्धिपुत्रन्नस्या
दीनाम्नश्चेति श्रुतिः तत्रपातनेस्मैप्रजाकामायपतिस्तोमश्चप्रजुञ्ज्ञानः स्तोताम
श्चतोमश्चोलोकंस्थानिकरोस्यैवं तस्मैश्चोकमनुलोकसंपत्नरूद्धं प्रजयापशुभिश्च
93 प्रजायते प्रवृद्धो भवति। अतः पशुकामोप्यत्राधिकारीत्युक्तं भवति। पुनरप्यधिका
रिविशेषं दर्शयति॥ एतामेवापरुद्धराजन्यायकुर्याद्विद्वे सप्तदशस्तस्याराजा ६२
गर्भ्यो विशएवतद्राजानान्निर्हन्त्यपावगतोरुश्चतेवगच्छसंपरुद्धइति। एतामेवविष्टु
तिंप्रयुञ्जीत योऽयं सप्तदशस्तोमउक्तः सद्विर्द्वै राष्ट्रः परिजननता वैश्यजातिरेवा
अपरुद्धं राष्ट्रपरिजेने निरूद्धस्ताद्धृत्याय राजन्यायाभिषिक्तापराद्धेएतामेवविष्टुतिंप्रयुञ्जीत १

नयोः प्रजापतेर्मध्ये दहादुह्यस्ते:परस्पर संबंध इति पूर्वमेवोक्तौ। तस्याविशेषराजा
गर्भस्थानीयो भवति। गर्भविन्यासैव स्थानात्तथासति। स प्रकृयोर्मध्ये भवति स प्रयुंजा
नउ ज्ञातात्विशो वैश्यप्रजाते रेवमप्युपुरुष इतिच्च कारापि घेयी राजानन्निर्हति। आपरा
घकारि णोन्निरूप्य हं तिगमयति स्थापयती स्वर्धः। अन्नस्त्रर्घवव्याख्येयी। पुनरप्य
घकार्यतरमाह॥ एतामेवाभिचर्य्यमाणायकुर्य्यात्प्रजापतिर्वै सप्तदशः प्रजापति
मेवमत्युतः प्रविशस्तः स्वरस्याइति। योयजमानोभिचर्य्यमाणो द्वेष्टभिः कृतमभिचा
रं प्राप्नोभवति। तस्मै एतामेव विष्टुतिं कुर्य्यात्। योयं सप्तदशस्तोमः स प्रजापतिर्वै प्र

सां
जापतिरेवउभयोः सप्तदशसंख्यासाम्यात्। प्रजापतेः सप्तदशत्वं ऐतरेयके समा
६४ म्नातं। द्वादशमासाः पञ्चर्तवो हेमन्तशिशिरयोः समासेन तावान् संवत्सरः संवत्सरः
प्रजापतिरिति। तथा सति प्रजापत्यात्मनः सप्तदशस्य मध्ये यास्तिस्रः प्रयुज्यन्ते तेन
95 त्र्यच्कूरवाच्यः पुरुषोऽभिचर्य्यमाणः प्रजापतिमेव मध्यतः प्रजापतेर्वमध्यदे २४
शे प्रविशति। अस्तृत्यै अहिंसायै स्तृञ् हिंसायामिति धातुः इति द्वितीयाध्याय २४
स्य दशमः खण्डः ॥१०॥ तस्य सप्तदशस्तोमस्यैवापराविष्टुतिः प्रदर्श्यते ॥ छ ॥ पञ्चभ्यो
हिंकरोतीति सप्तदशभिः स एकया स एया तिसृभ्यो हिंकरोति स पराचीभिर्वाभ्यो।

95

हिङ्कृरोति स तिसृभिस्स तिसृभिस्स तिसृभिरिति स्म प्रार्थः। उक्तो त्रिवृति स्तोम चतुष्टय
रूपेण प्रशीसन्नू ब्रह्मवर्चसकामस्यैव स्वाहा। त्रो चतुरस्स्तोमान्प्रति त्रिविहिता ब्रह्मवर्च
सकामस्तुवीत पंचभिः पंचदशं तिसृभिस्त्रिवृतं नवभिस्त्रिणवं स्वयं सप्तदशः
संपन्नो वीर्य्यं वै स्तोमा वीर्य्यमेव तदेकधा समूहते ब्रह्मवर्चसस्यावरुध्यै तेज
स्वी ब्रह्मवर्चसी भवति य एतया स्तुते इति। क्रमेण त्रिभिः पर्य्यायैः पंचदशादि
य२ स्तोमत्रं पर्य्यासो येष्वाद्यस्य च सप्तदशत्वादि यो त्रिवृतिः स्तोम चतुष्टय प्रतिनिधि
त्वेन कृतया एतया ब्रह्मवर्चसकामः स्तुवीत। कुत एतत्त्रय एते च त्वार स्तोमास्त

मास्तवीर्यं वै वीर्यं खलु स्तूयमानायां देवतायां वीर्यहेतुत्वा। तत्तथासति वीर्यमेवैत
कया समहते। एवञ्च समहीकरोति। तच्च समहहं नै ब्रह्मवर्चसस्य पलायन्न वति। अ
६५ न्यो पियो यजमानए तया स्तुते तेजस्वो वसन्न ब्रह्मवर्चसी न वती॥ इति द्वितीयाध्या
95 यस्यैकादशः खण्डः॥११॥ अपो ध स्याकल्प्यां सप्तदशस्यापरां स्वधुस्तेमाह। छाति
स्त न्योहिं ङ्करोति स पराचीभिः पञ्च न्योहिङ्करोति स एकया सन्ति स्तभि स एकया ६५
नव न्योहिङ्करोति सन्ति स्त भिस्सतिस्तस्सति स्तभि रुधती सप्तदशस्य विष्टुतिरिति।
तिस्तभ्यः पंचभ्यो नवभ्यः इति क्रमेण तासी व्याख्या याउद्धुगमनौ उ घती उद्धुंगछंती। एतत्सं

ज्ञा। एषा सप्तदशस्तोमस्य विष्टुतिः। अथैतां स्वर्गादिसाधनतया प्रशंसति॥ ७॥
एतया वै देवाः स्वर्गं लोकमायन्स्वर्गकामस्स्तुवीत स्वर्गस्य लोकस्य समष्ट्यै स्वस्व
र्गाल्लोकान्नच्यवते तुष्टुवानो तिक्रामं तीव्विष्टुतिरभिक्रान्त्या देवाभिक्रान्ते न हीय
ज्ञास्यच्छेति तस्मादेतया स्तोतव्यमच्यावत्वेति॥ एतयावाइत्यादि तुष्टुवान इत्ती
तं पंचदशस्तोमस्या यत्तां व्याख्याते। सर्वमन्यत्रिवृदुद्यसां तद्वदत्रापि व्याख्येयं॥ इति
द्वितीयाध्यायस्य द्वादशः खंडः॥ १२। सप्तदशस्यैव नस्त्रा च्यापरा विष्टुतिः प्रदर्श्यते।
७॥ सप्तभ्यो हिंकरोति स तिसृभिः स तिसृभिः स एकया पंचभ्यो हिंकरोति स एकया स

तिस्र त्रिस्समएकया पंचभ्यो हिङ्करोतिस एकयास एकयासति स्रमिर्भस्त्वा वाचीनबि
९६ लेति। प्रथमेपर्य्यायेसप्त इतरयोः पंच पंचेति हीनसीरस्योत्तरत्वाद् वाचीनबिलाद् ९६
96 वर्ष्मु स्वद्वारा नमस्कार एतत्संज्ञा एषासप्तदशस्तोमस्य विष्टुतिः। अत एवावाची
नबिलत्वाद्द्यनिकृष्टा। अस्यां विष्टुतावभिकामम् आह॥ का॥ यं द्विष्यात्तस्य कुर्य्याद्य
थावाचीनबिलमानमस्कायापद्यतुयादेवं यजमानस्य पश्वन्नं च नोत्यपक्रामतीविष्टु
तिस्रया यजमानस्य पशवोपक्रामंति पापायान्भवतिय एतयास्तूतइति॥ यं यजमा
न मुज्जातान्द्विष्यात्तस्य यजमानस्येतीमस्कारस्यो विष्टुतिं कुर्य्यात्। तयासति अवाची

नविलयान्नस्त्रयास्तुस्तायथाश्रयस्कारः प्रधन्नुपातप्रकंपयेत्। प्रथमपेदिस्पर्द्धः। एव
मेवैतत्पर्यविष्टुस्तायजमानस्य पशून्प्रधनोति प्रकामयति। तपयः। विष्टुतिरपक्रामतीऽन्त
रात्तरहीनसंख्यात्वेनत्रपगच्छेती। तयाविष्टुत्यायजमानस्यपशवोपक्रामंतियजमा
नान्निर्गच्छंति। योयजमानएतयास्तुते। यस्यैतयोद्गातास्तौती त्सर्पः। सयजमानः पापी
यान्श्रश्रेरपिफलैर्विहीनो भवति॥ इतिद्वितीयाध्यायस्य त्रयोदशः खंडः। १३। एकवि
शस्तोमस्य चतस्रो विष्टुतयः। सप्तिभ्यारभ्यांप्रथमां विष्टुतिं दर्शयति। सप्तभ्यो हिंकरो
तिसतिसृभिस्सतिसृभिस्सएकयासप्तभ्यो हिंकरोति सएकयासतिसृभिस्सतिसृभि

१८७ स्स प्रज्ञो हि द्रुरोति स तिस्रन्नि सप्तकया स तिस्रन्नि स्स प्र[?] स प्रत्नैक विंशस्य वि
ष्टुतिरिति ॥ स्य स्तोत्रं ॥ अथैतां स्तौति ॥ स प्रग्याम्याः पशव स्माने तयास्यत्तो तिस प्र
शोर सिप्राणाः प्राणा इंद्रियाणींद्रियाण्येवैतया प्नोतिति ॥ पुरुषो गौर श्वि रजो गर्द्द
९७ भो श्वो श्वतर इति ग्राम्याः पशव स्माने तयास्य णाति प्राप्नोति ॥ स्यश्नाति चत्न नयोर
त्र प्राप्यर्छः ॥ चात्मना मनेकाधिष्ठानात् ॥ किं चास प्र शीर्षण्याः प्राणाः मुखनासिके श्रो ९
त्रिणी कर्णी विति इंद्रियाणि तदधिष्ठानत्वात् ॥ अतइंद्रियाण्येवैतयास त्रिन्याप्नोति ॥ अथै
तां पुनरपि स्तौति ॥ एषा वै प्रतिष्ठितैकविंशस्य विष्टुतिः प्रतितिष्ठति य एतया स्तुत इति ॥

त्रिष्वपि पर्य्यायेषु समसंख्यासद्भावात् अस्याः प्रतिष्ठितत्वं। तस्यां सत्यामेतां प्रयुंजानः प
शस्वादिभिः प्रतिष्ठितो भवति॥ इति द्वितीयाध्यायस्य चतुर्दशः खण्डः॥ १४॥ अथास्यैव स्तोम
स्य उद्धृत्य एकां द्वितीयां विष्टुतिमाह॥ पञ्चभ्यो हिङ्करोति स तिसृभिः स एकया स ए
कया स पञ्चभ्यो हिङ्करोति स एकया स तिसृभिः स तिसृभिर्न्नवभ्यो हिङ्करोति स तिसृभिस्स ति
सृभिस्स तिसृभिस्स एकयेत्येकविंशस्य विष्टुतिरिति स्पष्टोऽर्थः। एतां विष्टुतिं प्रशंसति।
एतया वै देवाः स्वर्गं लोकमायन् स्वर्गकामैर्नैषा विष्टुतिरभिक्रान्त्या एवाभिक्रान्ते न ह्यप
द्यस्यन्तीति तस्मादेतया स्तोतव्यमिच्छया एवेति। एतत्सर्वं पूर्ववद्योज्यं। प्रकारान्तरेण प्र

१९८

शंसति॥ असैषा त्रिवृदायतना त्रिवृदुद्यनाय त्रिवृद्धि ष्टुवमानं भवति न वैता एकवि
७शस्योत्तमा भवंति प्राणा वै त्रिवृत्स्या प्राणानेव तदुभयतो दधाति तस्मादयमर्द्धं नाग वाग्ग्रा
एरुत्तरे खो प्राणा नाभि ७ सर्वमायुरेति न पुरायुषः प्रमीयते य एतया स्तुत इति॥ अग्नि
ष्टोम संस्थस्य यज्ञायज्ञीय स्तोत्रे अस्याविष्टुतेः प्रयोज्यत्वादेकवि ७शस्तोमस्याग्नि
ष्टोम त्वमारोप्य स्तूयते। सैषा त्रिवृत्प्रायणा त्रिवृत्तरुक्कु नवके प्रायणे प्रारंभे य
स्याः सा तथोक्ता। तथा त्रिवृदुदयना त्रिवृत्तरुक्कु नवकमुदयने समाप्तौ यस्याः सा
उक्तरूपा। कुत इत्यत आह। यद्यस्माद्बहिष्पवमानं स्तोत्रं त्रिवृत्तरुक्कु नवके आदौ

98 १९८

भवति। यस्मादेकविंशस्य स्तोमस्य उत्तमास्तृतीयपर्य्यायगता एता नवच्छोभिवति।
अत एषा विष्टुतिस्त्रिवृत्स्तोमायतनात्त्रिवृदुद्यनेति। किमतो भवति। उच्यते त्रिवृत्स्तोमइ
त्यपदिष्टा। तस्मा प्राणा वै प्राणाः खलु प्राणा नवसंख्यकाः सप्तशीर्षण्या द्वौ मूत्रपुरीषश्चे
ति। त्रिवृदपि त्रिरूकृत्य नवात्मकः तथा सति उत्तमपत्रसीख्यासाम्यात्त्रिवृत्ता प्राणरूपेति तत्र
स्तुतिः। तत्र तथा सति प्राणेनैव तत्तु उभयतः शिरस्याधोभागे च दध्याति धारयति। तस्मा
दयमाधीतयोः प्राणस्थानीयं रुकृत्य नवकं प्रयुक्तवान् तस्मादयमवागवर्त्तीप्रा
णः उत्तरेषां उपरि वर्त्तमानानां शीर्षण्यानां प्राणानीयावत्त्कार्य्यमस्ति। शरीरस्थि

त्ति हेतुभूतं अर्द्धनाडू अर्द्धभागयावत् तावत्कार्य्यवान् भवति यावत्कार्य्यैकमर्मलशरी
६६ रं ध्रियते ततः अर्द्धशीर्षण्याः प्राणाः कुर्वंति। शिष्टमर्द्धभवांचौ प्राणाविच्छ्छेः तयोः का
र्य्यं हि मूत्रपुरीषयोर्विसर्ज्जनं। तदभावे उदरवृत्तिरवेनरोगेणाम्रियत इति तयो
रर्द्धभागत्वं। एवं सति च ये एतयार्विष्ट्रसाक्तेसर्वमायुरेति प्राप्नोति। आयुषः
99 पुराकृष्ण्याकृतवर्षलक्षणादायुषः पूर्वं न म्रियते। एषा विप्रुतिः केषांचिन्निश्च ६६
त्याह॥ तामेतां द्वारद्विष उपासते तस्मात्ते सर्वमायुर्यंतीति॥ ॥ करद्विषो नाम
गोत्रे भेदा शाखिभेदा वा ते तामेतामुपघातीमक्षविठरास्य विप्रुतिं उपासते नि॥

100

स्मिंप्रयुंजते तस्मात्तेसर्वं शतवर्षलक्षणं कृत्स्नमायुर्यंतिप्राप्नुवंति॥ इतिद्वितीयाध्या
यस्यपंचदशःखंडः॥१५॥ अथा स्यैवस्तोमस्यप्रतिष्ठुतिं कामेतृतीयाविष्टुतिःप्रदर्श्य
ते॥८॥ नव ओ हिंकरोतिसतिसृभिस्सतिसृभिस्सतिसृभिःपंच ओ हिं करोति सएकयास
तिसृभिस्सएकयास प्रओहिङ्करोतीति सएकया सतिसृभिस्सएकयासतिसृभिः।
प्रतिष्ठुतिरिति॥ त्रिवृदादिस्तोमचतुष्टयप्रतिरूपकत्वात्अस्याःप्रतिष्ठुतिरितिसं
ज्ञायोगिकी। एतदेवदर्शयति॥८॥ नवभिस्त्रिवृतंप्रतिष्ठौति पञ्चभिःपञ्चदश॰सप्त
भिस्सप्तदश॰स्वयमेकवि॰शः सोपन्नइति। अस्याविष्टुतेःप्रथमपर्यायगतास्त्रिभिर्व

मि।र्हग्निस्त्रिवृतः स्तोमं प्रतिष्ठो ति। त्रिवृद्धि स्तोमेन स्तुतवान्नवतीस्यर्छैः। एवमुत्त
१०० रत्रापि यो ज्ञो। एतां विभूतिं प्रशंसति। ३। य एव स्तोमाय ज्ञो वदंतितानुत्तमे स्तोत्रे
संतर्पयतीयथा नडुहो वाश्वान्वाश्वतरान्वो उपः संतर्पयेदेवमेतदुत्तमे स्तोत्रे स्तो
100 मान्संतर्पयति त्यप्यति प्रजया पशुभिर्य एतमास्तुत इति। य एते स्तोमाः त्रिवृत् पंचद
शसप्तदशैकविंशाख्या यज्ञमग्निष्टोममवहन्ति। तान् स्तोमान्सर्वानन्वीतिमेय ज्ञा १००
य ज्ञीयस्तोत्रे अनया विभूत्या स्तुवन्नु ज्ञाता संतर्पयति उक्तक्रमेण तानेनुस्मरन्त
त्र संतृप्तान्करोति एतदेव द्रष्टी तेन समर्थ्यते। ३। उपः वहेः कसि प्रत्ययेशासिरूपमेत

त्। उद्भुषः ऊ८ वत ऊ८ नारान् अनडुहादीन्पपासंतर्प्पयेत् उत्तमे स्तोत्रे स्तोमान्त्संत
र्प्पयतियत् एवमेतन्त्रूपरैयास्तौति। अयेतर्प्पयतीत्यन्वयः पौरोहित्सकामयजमान
स्यैषाविष्टुतिः प्रयोज्येत्साह॥ एतामेव पुरोधाकामायकुर्य्याद्ब्रह्मवैत्रिवृत्स्तोमक्षत्रमेक
विंशायत्त्रिवृतैकविंशं प्रतिपद्यते ब्रह्मतन्त्र् क्षत्रस्य पुरस्तान्निदधाति गच्छतिपु
रोधान्न पुरोधायाश्च्यवते य एतयास्तुतइति। पुरोधापौरोहित्यं तत्कामो यजमानो
यस्तस्मै यजमानाय एकविंशस्येतामेव विष्टुतिं कुर्य्यात्। यो यं त्रिवृत्स्तोमः स ब्रह्म
वै ब्राह्मणजातिः खलु उत्तयोः प्रजापतिमुखजन्यत्वात्। एकविंशस्तोमः प्रतिष्ठा

हेतुत्वादस्त्रं क्षत्रियजातिः एवं सति त्रिरतास्रु कुनवकेनएकविंशस्तोमं प्रति
१०१ पद्यते आरब्ध तदिति यत्तत्तेन क्षत्रस्य क्षत्रियजातेः पुरस्ताद्ब्रह्म ब्राह्मणजातिं नि
दधाति अतः कारणात् स यजमानः पुरोधायां पौरोहित्ये संगच्छति प्राप्नोति कदाचिदपि तस्याः
101 पुरोधायाः नच्यवते न प्रच्युतो भवति। एषा द्विके षां चिन्निरूढाति दर्शयति।। तामेतां प्रा १०१
वाहणय उपासते तस्मान्न पुरोधायानच्यवत इति। प्रावाहणयः प्रवाहणो नाम
कश्चिदृषिः तस्य संतानभूताः प्रावाहणयः स्य एमनत्यत्।। इति द्वितीयाध्यायस्य षो
डशः खंडः।। अथास्यैव सोमस्य स्वर्भानुमपाञ्चं तुंकी विधुतिं दर्शयति।। नव क्षो हिंकरोति स त्रिस्त्रि

१०२

स्सतिस्थमिस्सतिस्थमिस्तिस्थ ओ३ हिंकू रोतिसपराञ्चीमिर्नवि ओ३ हिंकू रोति स
तिस्थमिस्सतिस्थमिस्सतिस्थमिस्सम्पर्यु भयतं प्राद्भ्राइति । उभयतश्चादीतयोः
पर्य्यायपोरुक्ष्ण नवक्लेनत्रिवृत्स्वादुभयतश्चादीप्तात्व्यत्याप्येस्व प्रजापतिमु
खवासहोस्पत्तेरादीप्तास्थ मज्झ । रामध्येस्थूले तरा । तत्तसा दस्यादस्या अप्येवा
सीज्ञा । अस्या अपिमध्यम पर्य्यायस्य रुक्ष्ण यात्क्लेन रुक्ष्ण नका म्पामल्पात्वात् ।
अस्यामधिकारिणमाह ॥ ७ ॥ ब्रह्मवर्चसकामः स्तुवीत तेजो वै त्रिवृत् ब्रह्म हरः पुरु
षायत्रिवृतावत्तितो भवतस्तेजोमध्येपवाहिरण्यपत्निष्वपदेवमेनन्त्रिवृत्तो निष्व

पतस्तेजसे ब्रह्मवर्च्चसायेति। अनया ब्रह्मवर्च्चसकाम स्तुवीत यत्त्रिवृत्स्तोमोऽस्ति
सतेजो वै तेजोरूपः खलु पुरुषो यजमानोऽपि सत्कारः पुरुष इति मन्त्रैर्द्वाग्रस्त
१०२ 102 यासति यत्तू यस्मात्त्रिवृत्तेजो तेजोरूपा तु भयतः प्रथमतृतीयपर्य्याययोर्भवतः म
ध्यम अमपर्य्याये तिस्त्रः स्युः करात्मकपुरुषस्थानीयास्त्रिवृस्तोत्रवंति त १०२
स्माद्यथा हिरण्यमग्निमध्ये वर्णोत्कर्षाय निष्टपेत् नितरां तापयति स्वर्णका
रः एवमेनं च्छन्दो रत्नपालिचे यजमानं एतौ त्रिवृत्तौ उन्नयतः त्रिवृत्तौ निष्टप
तः। नितरां प्रदीपयतः। एवं सति यजमानस्तेजसे ब्रह्मसायच भवति। अस्यां वि
वर्च

103

कुतो दोषद्वयमप्यस्तीत्याह । अपशब्देवतु वाऽस्वरापपन्निर्दहेः किलासत्वात्तु म
यमति हि निष्पतइति । तु शब्दः फलवैलक्षण्यद्योतनार्थः । अपशब्दं च वैपन्नं तौ पवृद्धि
विघातिनी खलु । अत एवेषापपन्नं निर्दहेन् निर्दग्धुमीश्वरा समर्थौ ईश्वरौ तौ सु
त्वकसुनावितिदहेः कसुन्नन्तपाकिलासत्वात किलासमसः श्वः त्वक्कूरोगविशेषः ।
तद्वत्तुसात्वैषादुष्टा । उभयत्र हेतुः उभयमपि तिहीति । हि हेतौ यस्माद्वाग्वज्रयोः प्र
युक्तौ द्विवृत्तौ अप्रत्युत्तरानिधेयस्य पुरुषस्य यजमानस्यागतयोः पार्श्वद्वयं निष्प
तः निःशेषेण दहतः । अत उर्ध्वं दोषद्वयं संपद्यत इत्यर्थः । अधिकार्यन्तरमाह ॥ छ ॥

एतामेवाभिशस्यमानायकुर्य्यान्मलंवाएतमृच्छतियमश्लीवोलोगच्छतियेवैनमसा
वश्लीलंवागवदतिनामस्यत्रिवृत्तोनिष्पतस्तेजस्वी भवतियएतयास्तुतइति॥एतामेव
१०३ स्त्रम्र्याकुर्य्याविष्टुतिश्चाभिशस्यमानायपरेर्भिन्नमानाययजमानायोज्ञाताकुर्य्या
त्यैयजमानमश्लीलानिंदारूपावाक्रूच्छतिआप्नोतिएनंयजमानंशमलंपापमे
103 वरूच्छतिआप्नोति।येवासौवाक्एनमश्लीलमप्रीकरत्निन्दारूपैवदति।अस्ययज १०३
मानस्यत्रश्लीलंवादिनीवाचंअस्यांविष्टुतौप्रयुज्यमानावुन्नयतस्त्रिवृत्तोनि
ष्पतोनिर्दहतः।अश्लीलंवादिन्योवाचोनिर्दहाययजमानोनिर्दोषोजायतइत्यर्थः।

त्र्यक्षोपिपियोय जमान एतया स्तुते स्तावयति सोप्पि तेजस्वी भवतीति ॥ इति द्वितीयाध्या
यस्य सप्तदशः खंडः ॥ ॥ इति श्रीमत्ताण्ड्यब्राह्मणे वेदप्रकाशे सायणाचार्यवि
रचिते द्वितीयोध्यायः समाप्तः ॥ ॥ छ ॥ यस्य निःश्वसितं वेदा यो वेदेभ्योखिलं
जगत् ॥ निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं । द्वितीये दशरात्रस्य चतुर्थेवि
ष्टुतिक्रमः । प्रदर्शितस्तृतीयेथ वक्ष्यंत्रिणवादयः । त्रिणवस्य स्तोमस्य द्वेवि
ष्टुती प्रतिष्ठिता उषतीचेति । तत्र प्रतिष्ठितां विष्टुतिं दर्शयति । नवभ्यो हिंकरोति
स तिसृभिः स पंचभिः स एकया नवभ्यो हिंकरोति स एकया स तिसृभिः स पंच

निर्न्निवज्ञोहिहुंरोतिसपञ्चमिस्त्वएकयासतिस्त्वमिरिति ॥ सर्वस्यस्तोमस्यत्रय
१०४ 104 स्त्रयः पर्य्यायास्तत्रप्रथमपर्य्यायस्ययाप्रथमासातूचं नागेस्तन्वर्थसंज्ञकाअत
स्तस्यास्त्रिर्वचनं कार्यं तस्यैवपर्यायस्ययामध्यमातस्याआपस्थानमितिसंज्ञा ॥ अ
तस्त्रिर्वचनावशिष्टाः प्रथमपर्य्यायसंबंधिनोमध्यमासाअस्वर्जितास्तेषामिय
मावापस्थानमृते सर्वः । यातृतीयासापरिचरासंज्ञकासकृद्वचनेनैवप्राप्नेण १०४
परितः सर्वतश्चरणोत्तमामस्येपञ्चांतयामध्यमपर्यायेनाएवलिस्त्वः स्तोत्रीयाप
रिचरातूचनागाआवापस्थानमितिक्रमेणसंज्ञांतरंनंते । उत्तमेपर्यायेआवा

पस्थानं परिचरात्तच्च नागेति संज्ञां लभंते । अत स्तोमस्य हद्धो तच्च नागा याः सर्वत्र
त्रिर्वचनमेव । अनाहत्तैकैकेव परिचरा । यावताभ्यासेन पर्यायसंख्या हन्यते तावत्के
स्तोमस्य मा आवर्त्तनीये सर्व्वे: । तदुक्तं सूत्रकारेण । वर्द्धमानेषु स्तोमेषु प्रथमस्य पर्या
यस्य प्रथमा यच्च नागा तस्यास्त्रिर्वचनमभ्यासमावापस्थानमुत्तमा परिचरा परि
चरात्तच्च नागाऽवापस्थानमिति मध्यम आवापस्थानं परिचरात्तच्च नागे स्तत्त
मस्त्रादिना । अतोस्यो विष्टुतावपि पर्याय त्रये तच्च नागा परिचरायाः पूर्वोक्तसं र
ख्यैव आवापस्थान भक्ता तु पंचदशस्तोमस्य प्रते । एषैव पंचसंख्या निधेयस्तेन स्तो

तथा। तं त्रिशंसिष्यन्नुक्थे व्यूहने प्रशंसति ॥ ३ ॥ वज्रो वै त्रिणवो वज्रमेव तद्व्यूहति शा
न्त्या इति ॥ त्रयो हि त्रिवृतः स्तोमा मिलित्वा त्रिणवः । तस्य त्रिवृत एकैकस्य पर्यायस्य
१०५ 105 त्रित्व संख्याये तत्वात् वज्रस्य चैवं द्वारं त्रायवज्रं प्रहरत्स त्रेधा व्यनजदिति श्रु
तं तत्र त्रेधा भावदर्शनात् तदुभयत्र संख्यासाम्येन त्रिवृतो वज्रत्वे तत्समुदाया
त्मकः त्रिणवोऽपि वज्रमेव वज्रयद्भिः त्राणवा। तथा सत्युक्तप्रकारेण यद्व्यूहनं
त्रित्व संख्याविभजनं। तेन वज्रमेव तद्व्यूहति वज्रं च मेवापनयतीत्यर्थः। तद्व्यूह १०५
नं यजमानस्य शांत्यै उपद्रवशमनाय भवति अथ विहितां पंचसंख्यां प्रशंसति ॥ ४ ॥

पंचभिर्विहितैकापरिचरापाङ्क्ताः पशवो यजमानः परिचरायस्यैभिर्विद्यास्यैकापरि
चरान्नवर्तियजमानमेवतत्पशुषु प्रतिष्ठापयत्येषा वै प्रतिष्ठिता त्रिणवस्य विष्टुतिः प्रति
तिष्ठतियएतयास्तुतइति । एषा विष्टुतिः पंचभिर्विहिता विशेषेणोपदिष्टाञ्चावा
पस्थानगतायाः पंच ता एव विधेया । अप्राप्तत्वात् । परिचरात्वचनागयोस्तुसंख्यानि
यमस्योक्तेन प्रकारेण सर्वतः प्राप्तेस्तस्मादावापस्थानभूता पंचसंख्यापेता परिचरा
वैकापशवश्चत्वारः पादाः पुच्छं चेति वा । त्वग्मांसस्नायुचास्थिमज्जेत्येवं वा पंचसंख्
धात् पाङ्क्ताः अत आवापस्थानीयाः पंचर्चः पशवइत्युपचर्यन्ते । परिचराच यजमान

स्थानीयाष्टकत्वसाम्यात्। एवं सति यत्र पंचभिर्हिंकारावापस्थापनं गतानि रिमांवि
ष्टुतिं विदधाति। परिचराचैकान्नवति त्रेर्नयजमानमेव पशुष्ववस्थापयाति। एषातु
१०६ त्रिएवस्य विष्टुतिः प्रतिष्ठिता उक्तप्रकारेण पशुषु यजमानस्यावस्थितिहेतुत्वात्। अतो
य एतया स्तुते तस्य प्रतितिष्ठति॥ इति ताण्ड्यतृतीयाध्यायस्य प्रपञ्चखंडः॥ ॥ अथ त्रिणव प
106 स्योद्यत्या कल्पां द्वितीयां विष्टुतिमाह। ॥ स पञ्चभ्यो हिंकरोति स तिसृभिः स तिसृभिः स तिसृभिः स १०६
एकया नवभ्यो हिंकरोति स एकया स तिसृभिः स पञ्चभिरेकादशभ्यो हिंकरोति स पञ्च
भिः स तिसृभिः स तिसृभिः स तिसृभिरुद्यता त्रिणवस्य विष्टुतिरिति। तत्र स पञ्चभ्यो नवभ्य एका

दशभ्यः प्रतिसीरव्यारोहति। उद्यच्छेषा विष्टुतिस्त्रिणवस्य। अथेतां प्रशंसति। छा। एतया वै
देवाः स्वर्गं लोकमायन्त्स्वर्गकामः स्तुवीत स्वर्गस्य लोकस्य समष्ट्यै स्वर्गाल्लोकान्न
च्यवते तु वोऽष्टेनेऽ निक्रामन्ती विष्टुतिरनिक्रान्त्या एवानिक्रान्तेन हि यज्ञस्यर्ध्नोति त
स्मादेतया स्तोतव्यमृध्या एवेति॥ ॥त्रिवृत्सीवदशयोरुद्यच्छन्ती वादवदतः सर्वं ने
यं॥ ॥इति तृतीयाध्यायस्य द्वितीयः खंडः॥२। त्रयस्त्रिंशस्तोमस्य विष्टुतयः पंच
तत्राद्यां सममध्यां शाखां दर्शयति। छा। एकादशभ्यो हिङ्करोति स तिसृभिः स पञ्चभि
स्स एकयैकादशभ्यो हिङ्करोति स एकया स तिसृभि स्स सप्तभि रेकादशभ्यो हिङ्करोति

स्ससप्तभिस्सएकयासतिसृभिरिति॥ त्रयाणांपर्य्यायाणांसमसङ्ख्यात्वासमत्वीरै
षाविष्टुतिः अथैतांविष्टुतिंस्तौति॥७॥ अंतोवैत्रयस्त्रिंशः परमोवैत्रयस्त्रिंशस्तोमा
१०७ नांसप्तभिर्विहितैकापरिचरासप्तग्राम्याः पशवोयजमानःपरिचरायसप्त
भिर्विदधात्येकापरिचराभवतियजमानमेवतदंततः पशुषुप्रतिष्ठापयत्येषावैप्र
107 तिष्ठितात्रयस्त्रिंशस्यविष्टुतिः प्रतितिष्ठतियएतयास्तुतइति॥ त्रयस्त्रिंशस्तो १०७
मोस्ति। एषअंतोवैचरमः खलुएषष्ठ्यष्ठडह्नः स्तोमापेक्षयास्यीतश्चैनदेवचाह।
परमोवैअयंत्रयस्त्रिंशः परमोवैष्ठ्यानामुत्तमः खलुशिष्टेत्रिणवस्याधवि

108

ष्टु स्त्वर्च्छे वादव्यख्यास्व्ययं। अंततद् तिषडहः स्यांतइ स्तर्छः॥ ॥इतितृतीयास्याध्या
यस्तृतीयः खंडः॥ ३। अथैवनेदीयः संक्रमाख्यौ द्वितीयौ विष्टुतिमाह॥ छ॥ एकाद
श्योहिं कुरोति सतिस्तत्रिस्सपञ्चभिस्सतिस्त्रभिरेकादशभ्योहिङ्कुरोति सतिस्तभि
स्सतिस्तभिस्सपञ्चभिरेकादशभ्योहिङ्कुरोति सपञ्चभिस्सतिस्तभिस्सतिति
न्नेदीयःसंक्रमेति। नेदीयसिअंतिकतमे संख्याविशेषे संक्रामतीतिनेदीयस्स
ङ्क्रमात्तथाहि। प्रथमेपर्याये त्र्यारोहावरोहाभ्यांतिस्तृभ्यः पञ्चस्तुपञ्चभ्यः तिस्
ष्विश्वेवमेतरिताः अयुक्संख्यास्तेष्वी संक्रामति। द्वितीयतृतीययोरपि यथासंख्य

मारोहावरोहाभ्यां अंतिकतमामेवायुक्तसंख्यां क्रामति। यथा पूर्वविंशतिः तिसृष्वास्त्र
प्सु। सप्सु। सप्तसु एकस्यामिति व्यवहितसंक्रमात् द्वैलक्षण्यादेषा नेदीयस्संक्राम
१०८ ।अथोत्क्रान्तिविंशतिस्त्रयस्त्रिंशेन संगतेत्याह॥ ७॥ अन्तो वै त्रयस्त्रिंशो यथा महावृक्ष
४ क्रमानस स्याग्रं स प्रानेदीयस्संक्रामत्येवमेतन्नेदीयस्संक्रमया नेदीयः संक्रमात् संक्रामती
108 ति॥ पञ्चदशः स्तोमापद्ययास्यां तत्संक्रम्य तु पुरुषो महावृक्षस्याग्रं अंतिकतमामति १०८
क्रतमां शाखामालंब्याग्र्यात्ततो नेदीयः संक्रमात् संक्रामति। एवमेतया विंशत्या नेदी
यः संक्रमाख्यया नेदीयस्यां तिकतमे संख्याविशेषे संक्रामति। अपेनां प्रति ग्राहे तु हेन

109



प्रश। ८सति।। पञ्च भिर्द्विहिताति स्रः परिश्चराः पाङ्क्ताः पशवः एतावा स्पुरुषो यदा त्मा प्रजा जायापत्र पञ्चभिर्विंदधाति तिस्र परिश्चरा भवंती यजमानमेव तत्र पशुष प्रतिष्ठापय ति पशुमान्भवति य एतयास्तुत इति।। त्रिलवस्य प्रथहेतु सर्वद्वादव्याख्येयं अत्रत्वय विशेषः। परिश्चरास्तिस्रश्च यजमानपुत्रपत्नीस्थानीया तथासति प्रजा जायास हितं यजमानमेव पशुषु स्तोतास्थापितवान्भवति।। इति तृतीयस्याध्यायस्य चतुर्थः खंडः।४।। अथैषस्तोमस्याद्यस्याक्लृप्तं विष्टुतिमाह।। नवभ्यो हिंकरोति स तिसृभि स्स पञ्चभिस्स एकया एकादशभ्यो हिंकरोति स एकया स तिसृभिस्स सप्तभिस्त्रयोदश

भ्यो हिंकरोति स सप्तभिस्स तिसृभिस्स तिसृभिरुद्यती त्रयस्त्रिंशस्य विष्टुतिरिति।
१०९ स्य षष्ठः॥ स्वर्गकामस्यैषा विष्टुतिरिति प्रदर्शयन्निमां प्रशंसति। छ॥ एतया वै देवाः स्व
र्गं लोकमायन् स्वर्गकामस्तुवीत स्वर्गस्य लोकस्य समष्ट्यै स्वर्गाल्लोकान्न च्यवे
109 तेनुष्टुवानोऽथादग्रं रोहस्यभिक्रामं तां विष्टुतिरभिक्रांत्या एवाभिक्रांतेन ह्य
न्नस्य द्वैतीति तस्मादेतया स्तोतव्यमच्याव एवेति॥ पूर्वव्याकव्ययी॥ ॥इति तृ १०९
तीयाध्यायस्य पञ्चमः खंडः॥ ॥५॥ अथास्यैव विष्टुत्यंतरमाह॥ छ॥
त्रयोदशभ्यो हिंकरोति स तिसृभिस्स पञ्चभिस्स पञ्चभिरेकादशभ्यो हिंकरो

तिस्र पञ्चदशिनीस्सप्तदशिनीस्सप्तदशिनीर्न्निवक्ष्यो हिङ्कुरोति सप्तदशिनीस्सप्तदशिनीस्स
प्तदशिनीः प्रत्यवरोहिणी त्रयस्त्रिंशस्य विष्टुतिरिति । त्रयोदशभ्य एकादशभ्यो
नवभ्यः ३ इति सैषा याऽत्तरोत्तरमवरोहणी देषा प्रत्यवरोहिणी । एतदेव सहष्टी
तमुपपादयति । ०० । यथा महावृक्षस्याग्रं स प्रत्या शाखायाः शाखामालम्बमुपावरोहे
देवमेतयेमं लोकमुपावरोहति प्रतिष्ठाया इति । यथा कश्चिदुन्नतस्य वृक्षस्याग्रमा
शाखा रुह्योपरितनाच्छाखाः शाखामालम्बमवलम्ब्यावलम्ब्य पृथिवीमुपावरोहेत् । एवमेव
त्रिवृदादिक्रमेणानुष्ठायमप्यहनि त्रयस्त्रिंशे नाधिकसङ्ख्येन स्वर्गमारुह्ये

तथाविश्वे स्मिंल्लोकमुपावरोहति प्रतिष्ठायै अस्मिंल्लोके त्रिरावस्थानात्ऽऽ।-
११० अथ पामायुर्हेतुत्वेन प्रशंसति॥ त्रिवृता प्रैति त्रिवृतेति प्राणा वै त्रिवृत्
प्राणैरेव प्रैति प्राणानस्मात्तु देति सर्वमायुरेति न पुरायुषः प्रमीयते य एतया
स्तुत इति॥ इष्टत्वं षडहस्य प्रथमेऽहनि त्रिवृत्प्रयुज्यते षष्ठेऽहनि अयमस्त्रि
ऽंशः उत्तमे यत्स्वीये नव अन्यो हि क्रूरो नीति विधानादेते चत्रिवृत्स प्रयुज्यते। अ ११०
तस्त्रिवृता प्रैति प्राक्रमते। त्रिवृते वोदत्क्रामतीति। परिसमापयति। प्राणापान
व्यानरूपेण वृत्तित्रयात्मकोऽयं प्राणोऽस्तीति स त्रिवृत्स्थानीयो भवति। तथा

111

सतिप्राणेनैव प्रक्रमसमाप्तीकृते भवतः । एवं प्राणस्यास्यागात् यजमानस्सर्वं
संपूर्णमायुरेति प्राप्नोति ततः पूर्वन्नम्रियते । एषां केषाञ्चिन्मिश्रैस्याह ॥ ७ ॥
तामेतामङ्करद्विषउपासते तस्मात्ते सर्वमायुर्यन्तीति । करद्विषो नाम केचित्
शाखिविशेषाः जो त्रविशेषावा ॥ इति तृतीयाध्यायस्य पञ्चः खंडः ।६। अथ
तस्यैवां संहिङ्कुर्तिमाह । ७ । पञ्चदशाक्षो हिं करोति स ति स्र भिः स्वस प्रतिस्स
पञ्चक्षुभिरेकादशाक्षो हिङ्कारो कोतिसपञ्च भिस्स तिस्र भिस्स तिस्र भिस्स प्त
क्षो हिङ्करोति स तिस्र भिस्स एकया स तिस्र भिरिति । अपैतांपरश ७ सति ॥ ८ ॥ यो

वे त्रयस्त्रिंशमेकविंशे प्रतिष्ठितं वेद प्रतितिष्ठति प्रतिष्ठा वा एकविंशः स्तोमाना
म्पदेताः सप्त त्रयस्त्रिंशस्योत्तमा भवंति सप्तस्वेवैकविंशस्य विष्टुतिरेकविं
१११ शएव तत्त्रयस्त्रिंशं प्रतिष्ठापयति प्रतितिष्ठति य एतया स्तुत इति।। यः खलु त्र
यस्त्रिंशमेकविंशे प्रतिष्ठितं जानाति स प्रतितिष्ठति। कथं तस्य प्रतिष्ठालाभः। य
एकविंशः स्तोमानामध्यक्ष प्रतिष्ठा वै। प्रतिष्ठाहेतुः खलु सर्वप्रकृतिभूतो ज्योतिष्टोमए १११
षएकविंशेन सेतिष्ठत इति तस्य प्रतिष्ठितत्वं। त्रयस्त्रिंशस्यैकविंशप्रतिष्ठानमि स्व
तन्त्याह। अस्यां विष्टुतौ त्रयस्त्रिंशस्योत्तमे पर्याये सप्तकृत्व इति विहिता एताः सप्तत्र्यं

उत्तमा भवंति। एकविंशस्य विष्टुतिः सप्तविधा। एकैकस्मिन्पर्य्याये सप्तर्च्चो भवंति।
यत्तु यस्मादेवं तस्मादेकविंश एव त्रयस्त्रिंशं प्रतिष्ठापयति। अतो य एतया स्तुते सय
जमानः प्रतितिष्ठति॥ ॥इति तृतीयाध्यायस्य सप्तमः खंडः॥७॥ इछं तु ष्पष्ठखण्ड हस्य
त्रिवृदादयष्षड्स्तोमाः क्रमेण विहिताः। अथ छन्दोमानाञ्चतुर्व्विंशश्च तुश्चत्वा
रिंशोष्टाचत्वारिंश इति। त्रयस्तोमाः तत्र प्रथमस्य स्तोमस्यैका विष्टुतिः साप्र
दर्श्यते॥ अष्टाभ्यो हिंकरोति स तिसृभिः स चतसृभिः स एकयाष्टाभ्यो हिंकरोति
स एकया स तिसृभिस्स चतसृभिरष्टाभ्यो हिंकरोति स चतसृभिस्स एकया स तिसृ

त्रिरिति ॥ अथैतां प्रशंसति । ८ ॥ पशवो वै छन्दोमा यदष्टाभ्यो हिंकरोत्यष्टाशफाः प
११२ 112 शवः प्राप्य शास्त्रस्य प्रमाणाज्ञोतीति । पशुसाधनत्वाच्छन्दोमानां पशुत्वमेवं भवति । त्रिष्टु
प्पप्प्यीये च अष्टाभ्यो हिङ्करोतीति । यत्त्वेन पशवश्चाष्टाशफास्तस्य भुजश्चशफश
:शफद्वारेण प्राप्नोति । अथैतां प्रकारान्तरेण स्तौति । ९ । चतसृभिर्विहिते कापरिचरा ११२
चतुष्पादाः पशवो यजमानः परिचराय चतसृभिर्विद्धासे कापरिचरा भवति य
जमानमेव तत्सम्पुष्प्रति स्थापयन्त्येषां वै प्रतिष्ठितां चतुर्विंशस्य विष्टुतिः प्रतितिष्ठ
ति य एतया स्तुत इति । १० ॥ एतत्तु पंचभिर्विहिते कापरिचरे स्यादिव व्याख्येये ॥ ॥

॥इति तृतीयाध्यायस्याष्टमः खंडः॥ ८॥ अथ चतुश्चत्वारिंशस्याति स्तोत्रविष्टुतयः॥ त
त्र प्रथमामाह॥ पञ्चदशभ्यो हिंकरोति स तिसृभिः स एकादशभिः स एकया चतुर्दश
भ्यो हिंकरोति स एकया स तिसृभिः स दशभिः पञ्चदशभ्यो हिंकरोति स एकादश
भिः स एकया स तिसृभिरिति॥ अथैतां प्रशंसति॥ ९॥ ब्रह्मणो वा आयतनं प्रथमा क्ष
त्रस्य मध्यमा विश उत्तमा यत्सप्तदशिन्यो भवन्ति नवतश्चतुर्दशोत्तमा ब्रह्मण्येव तत्क्ष
त्रं ओजो वीर्यं दधाति ब्रह्मण्येव तत्क्षत्रं च विशमनुगां करोति क्षत्रस्य चास्य प्रका
शो भवति य एतया स्तुत इति॥ तच्च गतास्तिस्रः स्तोत्रीयाः क्रमेण ब्रह्म क्षत्र विशामा

पतनभृता: एवं सति त्रिष्टुपि पर्य्यायेषु विष्टावगलनयाय स्तुवे प्रथममध्यमे स्तोत्री
ये पंचदशिन्यो पंचदशासङ्ख्योपेतेन्वतः उत्तमा स्तती या चतुर्द्दश विष्टावगलनया
११२ चतुर्द्दश संख्याकात्ततेनोक्तप्रकारेण ब्रह्मक्षत्रायतनभृतयोरधिकसंख्य सा
तब्रह्मक्षत्रयोरवौजो वीर्य्यं च दधाति तत् तथा ब्रह्मक्षत्राद्विशामनुगामनुगंक्री
कृरोति विशापतनाया उत्तमायाहीनसंख्यत्वात् अस्यां विष्टुतौ क्षत्रस्याधिक्या ११२
द् एतयास्तुते तस्य क्षत्रियजातेरेव कीर्त्तिं ब्रवीति तां पुनः प्रशंसति ॥ ७ ॥ अस्तो
मा वा एते यक्षन्दो मा अमुं जो हि स्तोमायुग्गमेति छन्दांसि यदेषा पुञ्जिनी चतुश्चत्वा

114

रिंशस्य विष्टुतिस्तेन स्तोमाः शिताः। छंदोभिर्गायत्रीत्रिष्टुब्जगतीभिर्गीयंत इति छंदोमाश्च
तुर्विंशादयः पंचयरमे छंदोमाः एते अस्तोमा वै स्तोमलक्षणरहिताः खलु। कथं अयुज
अयुक्संख्या हि अन्ये प्रसिद्धास्त्रिवृदादयः स्तोमाः उक्तानि गायत्र्यादीनि छंदांसि युग्
ग्मंति युक्संख्यावंति ते गरेयमानाश्च तुर्विंशादयोऽपि युक्संख्यावंत इति स्तो
मलक्षणराहित्यं। एवमस्तोमत्वे प्राप्ते समाधत्ते यस्मादेतेषां मध्ये चतुश्चत्वारिंशा
स्य स्तोमस्य विहिते पा विष्टुतिरयुजिनी। अयुक्संख्योपेता। द्वयोः पर्य्याययोः पंच
दशसंख्यायोगात्। अतः स्तोमलक्षणसद्भावाच्चतुर्विंशादीनामपि स्तोमत्वं सि

डं। अथैतां पुनः प्रशंसति। छ। एषा वै प्रतिष्ठिता चतुश्चत्वारिंशस्य विष्टुतिः प्रतितिष्ठ
११४ ति य एतया स्तुते इति। आद्यंतयोः पर्याययोः पंचदश सङ्ख्या साम्यदस्याः प्रतिष्ठित
त्वं॥ इति तृतीयाध्यायस्य नवमः खण्डः॥९॥ अथास्यैव वर्द्धितीयानिर्मध्याख्या वि
115 ष्टुतिः। छ। चतुर्दशभ्यो हिङ्करोति स तिसृभिः स दशभिः स एकया। पञ्चदशभ्यो
हिङ्करोति स एकया स तिसृभिः स एकादशभिः। पञ्चदशभ्यो हिङ्करोति स एकाद ११४
शभिः स एकया स तिसृभिरिति निर्मध्या। अत्र प्रथमोत्तमयोश्चतुर्विंशावेव पञ्चविंशि न्योम
व ध्यमो तु दशस्तंस्थाके। तिहीनमध्या त्वानिर्मध्या भवति। अथैतां प्रशंसति। अ

115

प्रजायतेत्र

स्तीव चाश्रयश्चौको ऽस्तीवासौ छिद्रमिवेदमंतरिक्षं यदेषा निर्मक्षिका भवतीमानेव लो
कानु प्रजया पशुभिर्जायते य एतया स्तौतीति ॥ अयमन्तर्लोको ऽस्तीव वै प्राणिना
माश्रयभूतः सन् स्पष्टमुपलभ्यमानो वर्त्तते तथासौ द्युलोकश्चास्तीव ग्रहनक्ष
त्रादिभिः प्रकाशमानत्वात् उभयोर्मध्ये ऽवस्थितमिदमंतरिक्षं छिद्रमिव सुषि
रमिव निरात्मकं भवति एवं सति लोकत्रयानुगुण्येन स्थितानिर्मक्षिरूपे तवैषा
निर्मक्षिका भवतीति यजमानेन यजमान इमानेव लोकाननु इमांस्त्रींल्लोकाननुप्रजा
यते त्रिष्वपि लोकेषु समृद्धो भवतीत्यर्थः उक्तस्यैव विवरणं प्रपञ्चति ॥ इतित्र

त्री

तृतीयाध्यायस्य दशमः खंडः ॥१०॥ अथ तृतीया विष्टुतिः ॥ ॥ पञ्चदशभ्यो हिंकरोति

स तिसृभिस्स एकया स एकादशभिस्स एकया पञ्चदशभ्यो हिंकरोति स एकया स तिसृभिस्स

११५ 115 एकादशभिश्चतुर्दशभ्यो हिंकरोति स दशभिः स एकया स तिसृभिरिति ॥ अथ स्पष्टम् ॥ अ

थोक्तानां तिसृणां विष्टुतीनां प्रयोगस्यानियमे प्राप्ते सवनत्रयभेदेन व्यवस्थामाह ॥ ॥

आज्यानां प्रथमा पृष्ठानां द्वितीयोक्थानां तृतीयेति ॥ आज्यानां प्रातःसवनिकानां ११५

स्तोत्राणां माध्यंदिनगतानां चतुर्णां चतु[illegible]श्चत्वारिंशस्य स्तोमकॢप्तिः पृष्ठानां

पृष्ठस्तोत्राणां माध्यंदिनगतानां चतुर्णां चतुश्चत्वारिंशस्य द्वितीया विष्टुतिः ॥ तथोक्थानां च ॥

प्रथमयाविष्टुत्या २

अत्रोक्थशब्दस्तृतीयसवनगतस्तोत्रोपलक्षणार्थः तेनाग्निष्टोमसाम्नोप्युक्थ-
शब्देन ग्रहणात्तत्सहितानां चतुर्णां स्तोत्राणां चतुश्चत्वारिंशस्य तृतीयाविष्टुतिः
कार्या अथ प्रकारांतरेण सांख्यवस्थामाह। आज्यानां ८ साहोतुर्या पृष्ठानां ८
सा मैत्रावरुणस्य योक्थानां ८ सा ब्राह्मणाच्छंसिनो यैव होतुः साच्छावाकस्य या पृ-
ष्ठानां ८ सा होतुर्या उक्थानां ८ सा मैत्रावरुणस्य याज्यानां ८ सा ब्राह्मणाच्छंसि-
नो यैव होतुः साच्छावाकस्य योक्थानां ८ सा होतुर्या आज्यानां ८ सा मैत्रावरुणस्य या पृ-
ष्ठानां ८ सा ब्राह्मणाच्छंसिनो यैव होतुः साच्छावाकस्य सर्वा आज्येषु सर्वाः पृष्ठ-

षुसर्व्वा उक्तेष्विति । या आज्यानामुक्ता प्रथमा विष्टुतिः सा होतुराज्यस्य कार्य्या । यत्तु प्रथमं
आज्यस्तोत्रं तत्तु हि होता प्रउगशस्त्रेणानुशंसति । अतः तत्संबंधात्तदाज्यत्वं । एवमै
११६ 116 त्रावरुणादीनामप्यनुशंसितत्वेन तत्स्तोत्रसंबंधः । पृष्ठानीपृष्ठास्तोत्राणां याद्वितीया
या विहिता सा मैत्रावरुणस्याज्यस्य कार्य्या । उक्थानां विहितायास्तृतीया विष्टुतिः सा
ब्राह्मणाच्छंसिन आज्यस्य कार्य्या । यैव होतुराज्यस्य प्रथमा विष्टुतिः साऽच्छावाक ११६
स्य कार्य्या । एवं सर्व्वा अपि विष्टुतयः प्रातःसवने उपयुक्ताः । तथा माध्यंदिनसवने पि
या पृष्ठानी विष्टुतिर्द्वितीया सा होतुः पृष्ठस्य कार्य्या । पोत्क्थानां विहितास्तृतीया सा

प्रथमासाब्राह्मणाच्छंसिनःपृष्ठेकार्या।येवहोतुःपृष्ठेविहिता।१

मैत्रावरुणस्यपृष्ठेकार्या।याऽस्यानांविहितांद्वितीयासाछावाकस्यपृष्ठेकार्या।ए
वमाध्यंदिनसवनेपिसर्वाविष्टुतयःप्रविष्टाः।योक्तानांविहितातृतीयास्विष्टुतिःसा
होतुरग्निष्टोमस्यसाम्नःकार्या।आज्यानांविहितायाप्रथमासामैत्रावरुणस्योक्थे
कार्या।याऽऽष्यानांविहिताद्वितीयासाब्राह्मणाच्छंसिनउक्थेकार्या।येवहोतुर
क्थस्यविहितासाऽछावाकस्योक्थेकार्या।एवंतृतीयसवनेसर्वाःप्रविष्टाः।एवंव्य
तिषंगेसतिसर्वाविष्टुतयःआज्येषुसर्वाःपृष्ठेषुसर्वाःस्तोत्रेषुपर्यवानियुक्ताभवंति।उक्थ
यवस्कंप्रशीसति।६।पशवोवैसमीचतीयदेषासर्वाणिसवनान्यनुसंचरंत्यनुस

[illegible] वनमेवैनंपशुभिःसमर्द्धयतिपशुमान्नवतियएतयास्तुतइति।समीषेतीस
११७ मिन्द्रेवीनावेसवनत्रयेप्येकीभूयईषतिगच्छतीतिसमीषेती।एषाविष्टुतिःपशवोवैपशु
हेतुत्वात्।साएषासर्वाणिसवनान्यनुसर्वेषुसवनेषुसञ्चरतीतियत्तेनएनंयजमानं
117 अनुसवनंसवनएवपशुभिःसमृद्धिंकरोति।यश्चैतयास्तुतेसोपिपशुमान्नवतीति॥
इतितृतीयाध्यायस्यैकादशःखंडः॥११॥अथाष्टाचत्वारिंशस्यद्विष्टुतीतयोःप्रथ
मामाह।षोडशभ्योहिङ्करोतिसतिसृभिःसद्वादशभिःसएकयाषोडशभ्योहिङ्करोति ११७
सएकयासतिसृभिःसद्वादशभिःषोडशभ्योहिङ्करोतिसद्वादशभिःसएकयासति

स्तनिरिति । अथैतौ प्रश्नौ सति ॥ अंतेवाष्टाचत्वारिंशः पशवश्छन्दोमायत्तः षोडशाक्ष
षोडशाक्षो हिङ्करोति षोडशकलाः पशवः कलाशस्तत्पशूनाप्नोतीति । यस्य अष्टाचत्वा
रिंश स्तोमः । असावैतो वै अतऊर्ध्वं स्तोमांतरस्यानुक्ते चात्र त्रिवृदादीनामवसान
मन्तः खलु । पशुसाधनत्वात्र छन्दोमाश्च पशवः तेच पशवः षोडशकलाः अष्टौ शफाश्च
त्वारः पादाः शिरो ग्रीवा आत्मा पुच्छमिति । एवं सति त्रिष्वपि पर्यायेषु यत् षोडशाक्ष षोड
शाक्षो हिङ्करोति तत् तेन कलाशः अवयवशः एव पशूनं तलः प्राप्नोति । प्रकारांतरेणास्तो
ति छ । द्वादशानि विहितेका परिचरा द्वादश मासाः संवत्सरो यजमानः परिचराय

द्वादशविद्विंद्याद्याचकापरिचराभवतियजमानमेवतदंनतस्यवत्सरेपशुषुप्रति
११८ ष्ठापयत्येषावैप्रतिष्ठितऽष्टाचत्वारिंशस्यविष्टुतिः प्रतितिष्ठतियएतयास्तुतइ
ति॥ त्रिषुपर्य्यायेष्वावापस्थानगताभिर्द्वादशभिस्स्तोत्रीयाभिरेषाविष्टुतिर्विशेष
118 तोविहिता तत्र चतुर्गायत्र्यास्त्रिर्वचनं परिचराया एकवचन्नन्यायतः प्राप्तौ सत्वत्स
सा०३ रश्च द्वादशमासात्मकः परिचरायजमानस्थानीयाः एवं सति द्वादशभिस्स्तोत्री ११८
याभिरावापस्थानगताभिरिमां विष्टुतिं विद्यातिपरिचराश्चैकाभवतीतियत्त
तेनांततः स्तोमानामवसानेयजमानमेवसंवत्सरपशुषुप्रतिष्ठापयति समपर्य्या

यच्चादेघारवल्लुविष्टुतिः प्रतिः ष्ठिताऽष्टाचत्वारिं७शस्पत्र्रतोयएयास्तुतेसप्तातिति
ष्टुति॥ इति तृतीयाध्यायस्य द्वादशः खंडः॥१२॥ अथान्यां विष्टुतिं दर्शयति॥ ७॥ षोड
शभ्यो हिंकरोति स तिसृभिस्स दशभिस्स तिसृभिष्षोडशभ्यो हिंकरोति स तिसृभिस्स
तिसृभिस्स दशभिष्षोडशभ्यो हिंकरोति स दशभिस्स तिसृभिस्स तिसृभिर्नेदीयस्स
ङ्क्रमेति॥ पर्यायास्पर्यायोत्तरं संक्रामतीति समाने संख्यास्वेव संक्रमणान्नेदीयस्सङ्क्रमे
षा॥ अथैतां स्तौति॥ ७॥ अन्तो वा अष्टाचत्वारिंशोऽयथा महावृक्षस्याग्रं स्तप्वाने
दीयस्सङ्क्रमान्तसङ्क्रामत्येवमेतन्नेदीयस्सङ्क्रमयानेदीयस्सङ्क्रमान्तसङ्क्रामतीति॥ त्रयस्त्रिं

७ शास्यनेदीयस्त्वसङ्कुमार्क्ष्वाद्वदिदमप्यिव्याकरोयं ॥ प्रकारांतरेणास्तौति ॥ दशभिर्निर्व
११९ हितास्तिस्रः परिचराद्दशाक्षराविराडेतावान्तुरूपोयदासाप्रजाजायायद्दशभिर्निर्व
दधातितिस्रः परिचराभवंतियजमानमेवतत्त्विराधन्नाद्येततः प्रतिष्ठापयत्सन्ना
119 दो भवतिय एतयास्तुत इति ॥ यत्त्यद्विष्टुतिर्दशभिरावापस्थानगताभिः स्तोत्रीयाभि
र्निर्हितास्तिस्रः परिचराः परिचरशस्थानेतिस्रो भवंतीत्यर्थः ॥ अन्नाद्यरूपाविराड ११९
पिप्रतिपाद्दशाक्षरा ॥ आत्माप्रजापुत्रपौत्रादिरूपाजायाचेतियदेतत्त्रितय
मस्मि एतावान्हि पुरुषः एवं सति आवापः स्थाने य द्दशभिर्निर्दधाती मां विष्टुति

तिस्रः परिचरा भवंतीति तेन प्रजया जायया चसहितं यजमानमेवान्नाद्य अन्नाद्यरूपे
विराजि अंततः स्तोमस्समाप्तौ प्रतिष्ठापयति स्तोतारं अतो य एतया स्तुते सोऽन्नादो भवति
अन्नीयान्न बाजुद्ध्योपेतो भवति॥ इति महाब्राह्मणे ताण्डे तृतीयाध्यायस्य त्र
योदशः खंडः॥१३॥ ॥इति तृतीयोध्यायः समाप्तः॥ वेदार्थस्य प्रकाशनेन तमो हा
र्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थ महेश्वरः॥ ॥इति श्रीमद्राजा
धिराजपरमेश्वरवैदिकमार्गप्रवर्तक श्रीवीरबुक्कभूपालसाम्राज्यधुरंधरे
सायणाचार्यविरचिते माधवीये सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे तृतीया

ध्यायः समाप्तः ॥ ॥ यस्य निश्श्वसितं वेदा यो वेदेभ्योऽखिलं जगत् । निर्ममे तमहं वन्दे
१२० विद्यातीर्थमहेश्वरं । स्तोमानां दशरात्रस्य प्रोक्ता विष्टुतयः क्रमात् । गवामयनिकानां च ता
एवेत्यवगम्यते ॥ शतानि त्रीणि षष्टिश्च विषुवाꣳश्चैतुर्द्दके प्रोक्तानि गव्यसत्रस्य सु
120 स्याहानि क्रमादिह । तानि संग्रह्य वक्ष्यन्ते बुद्धिव्युत्पत्तिसिद्धये । द्विविधं गवामयनं द १२०
शमाससाध्यं द्वादशमाससाध्यं च । तत्र द्वादशमासनिर्वर्त्यस्य प्रायणीयोऽतिरात्रः प्रथम
महस्ततश्चतुर्विꣳश उक्थ्यारंभणीयते ऽत्रे अहनी अनुष्ठाय । ज्योतिर्गौरायुरायुर्गौर्ज्यो
तिरित्याभिप्लविकः षडहः । स चतुर्वारमावर्त्तनीयः । ततस्त्रिवृदादिस्तोमषट्कसाध्यः पृष्ठ्यः

षडहः। एवं पंचभिः षडहैरेको मासः पूर्यते एतस्यैवावर्त्तनेन पंचमासाः संपाद्याः। तत्र ष
ष्ठमासस्यादौ त्रयोभिप्लवाः षडहाः कार्याः। तत एकः पृष्ठ्यः षडहः। ततोभिजिदेकमहस्त्रयः स्व
रसामान इत्येवमष्टाविंशत्यहानि। आद्याभ्यां प्रायणीयचतुर्विंशाभ्यां षष्ठो मासः पूर्णः। इ
त्थं पूर्वस्मिन्पक्षसिअशीत्युत्तरशतसंख्यान्यहानि संपन्नानि ततो विषुवानेकमहः। सो
ऽस्य सत्रस्य प्रधानभूतः। सप्तममासस्यादौ त्रयः स्वरसामानः प्रतिलोमाः कार्याः। ततो विश्व
जिदावृत्तः पृष्ठ्यः षडहस्त्रयस्त्रिंशादिस्तोमास्त्रिवृदुत्तमः। ततस्त्रयोभिप्लवाः षडहा आ
वृत्ताः। एवमष्टाविंशत्यहानि स्युः। अस्य च मासस्य महाव्रतातिरात्रावेतनोभिधास्यमा

नोपर्कोसस्सप्तमोमासः। ततः पृष्ठ्यः षडहः। पूर्वैश्चतुर्भिरात्रिङ्गविकैः। प्रतिलोमक्रमेणा
नुष्ठितेरष्टमोमासः। स एवावृत्यानवमदशमैकादशाश्चापि संपद्याः। द्वादशमासस्यादौ
त्रयोभिप्लवाः षडहाः। ततोगोआयुषी द्व्यहनी ततोद्वादशदशाहानि चेति त्रिंशदहा
नि स द्वादशो मासस्ततो महाव्रतमुपांत्यमहः उदयनीयोतिरात्र इत्येते सत्रमासस्य दर्शके
इति। तदेतद्गवामयनसत्रं विधास्यन् तन्नाममनिर्वचनप्रदर्शनापादावाख्यायिकामाह।
॥ गावो वा एतत्सत्रमासत तासां दशसु मासुः सुश्रृङ्गाण्यजायंत ता अब्रुवन्नराध्मोत्तिष्ठामो
पशानोऽभूतेति ताउदतिष्ठंनिति। पुरा खलु गाव एतत्संवत्सरसत्रमासत ताश्चन्वतिष्ठन्। गा

सिचोदनाउपायचोदनाचसत्रलिंगमितिमीमांसकाः। अत्रासिरूपेयुष्मत्सत्रप्रकरणेऽनु
ष्ठानेवर्त्ततेसइतितन्निदंगोभिरनुष्ठितंमतइदंगवाम यनामसत्रमुच्यते। तासांसत्र
मासीनानांमध्येकासांचिद्दशसुमासेषु। पदन्नोमासिस्यादिनामासश्शब्दस्यमास
मात्रवचनः तेष्वनुष्ठितेषुशृंगाण्यजायंतजातशृंगाअब्रुवन्परस्परमुक्तवत्यः। किमितित्रत्र
रास्मासमुद्धाअन्नमत्रोतोवयमुत्तिष्ठामसत्रेसमापयामअराश्मेतिपदुक्तंतव्याचष्टे।
उपराश्मा: अजितः शिरप्रदेशमुपेत्यशेरतइत्योपशाः शृंगाणिताति। नो अस्माकं अइतजा
तान्यभवन्नितिसंबंधः अइतेतिजनीप्रादुर्भावइत्यस्माच्छुडि॰ बहुवचनेमंत्रेघसे

स्रादिनाह्लेछुँकिगमहनजनेखर्पघात्नेपेरूपं। एवमुक्त्वाता गावःसत्रादुदस्तिष्ठन्। ऐतौ
१२२ वैदशभिर्मासैःफलंप्राप्तोदशमासनिर्वर्त्त्यमपिगवामयनमस्तीत्युक्तंभवति। अथद्वाद
शमासनिर्वर्त्त्यमप्यस्तीतिदर्शयति। ७। तासांत्वेवानुवन्नासामहाएवैमोद्वादशोमासोस७सं
122 वत्सरमापयामेति तासांद्वादशसुमाःसुश्टेगालिप्रावर्त्ततताःसर्वमन्नाद्यमाभुवी७स्ताए
ताःऋपरास्तस्मात्ताःसर्वान्द्वादशमासःप्ररतेसर्व७हितात्र्यन्नाद्यमाभुवन्निति॥ तुशाद्वैवे १२२
लेद्यत्ययघातनाछेः। तासामेवगवामम्नक्षोकाध्विदंभुवन्तु। किमित्युच्यते। योद्वादशोद्वा
दशसंख्यापरकावविशिष्टौवेकादशद्वादशोमासोरमोप्यासामहाएवमनुप्त्रामेवग्र

नुष्ठाय प्रारब्धं संवत्सरसाध्यं समापयामेति व्यवहितौ स्वेति स निश्चयस्य व्यवहितेन सं
बंधः। तासां गवां जातानि शृंगाणि यद् दश प्राप्तासु मासेषु दशसु प्रावर्तंत प्राप्य यद् दश
त्रिमासेः शृंगप्राप्तिलक्षणे फले सिद्धेपि। पुनरप्यर्धद्वयाय ता मासद्वयमन्वतिष्ठन् तत्र
तो जातानामपि शृंगाणि पुनः पतंति स्मेति प्रायः। न पाश्चेतरे यके। अथवा: समापयि
शृंगाणि ष्यामः संवत्सरमिति स्मास ततस्तासां मध्ये द्वयोः प्रावर्तंत। ता एतास्तूपरा इति। ताः पतितशृंगा भावः तू
शृंगहीनाः दृश्यंते। तस्मात्ताः सर्वान् द्वादश मासान् मासान्प्रेरले प्रगच्छति। ईदृग्गतौ सीत परा:
वातातपेषु सर्वदापुष्टाशृंगा एवं यथा च्छंगच्छंति। शृंगिण्यो महिष्यादयस्तु कृशा न वंति तस्मा
ताः सर्वाः सर्वं सर्वर्तुं नवं मन्नाद्यमदनीयमन्नं प्राप्नुवन्।

दित्युक्तं । कस्मादित्याह । हि यस्मात्ता गावः सर्व्वमन्नाद्यमाप्नुवन्त तस्मात्सर्वर्त्तुषु पुष्टांगा
१२३ नवंति । तथा चैतरेयकं । ऊर्ज्जन्वसुन्वम् । तस्मादु ताः सर्व्वान्ऋतून्प्राप्तोत्तरमुत्तिष्ठंति ।
उक्तार्थं जानतः फलमाह । ऽ सर्वमन्नाद्यमाप्नोति य एवं वेदेति । स्पष्टोर्थः । तदेवं दशमा
123 सनिर्वर्त्यं द्वादशमासनिर्वर्त्यं चेति द्विविधं गवामयनं प्रतिपादितं । तयोर्ज्योतिष्टोमद
शपूर्णमासादिवदेतत्कामः एतत्कुर्यादिति कामसंबद्धफलविशेषाश्रवणाद्विश्वजि १२३
।न्न्यायेनाम्नातस्य स्वर्गस्य कल्पनाया अप्राप्य सत्रं रात्रिसत्रन्यायेनार्थवादि
कस्य समृद्धिफलस्य वाक्यशेषस्थत्वादस्मा । ताकूतं गमीय इति समृद्धकामा एतत्स

त्रमासीरत्निति विधिरन्नेतव्यः। तैत्तिरीयस्य समृद्धिफलकत्वे [illegible] स्यसमाम्नातं। य एवं वि
द्वान्सः संवत्सरमुपयंत्यृध्नुवं त्येवेति। अथास्य सत्रस्य पूर्वोक्तान्यहानि क्रमेण विधास्य
न्नतिरात्रसंस्थं प्रथममहर्विधातुमाख्यायिकामाह। प्रजापतिर्वा इदमेक आसी
त्सोऽकामयत बहुः स्यां प्रजायेयेति स एतमतिरात्रमपश्यत्तमाहरत्तेनाहोरात्रे प्राज
नयदिति। यदिदं दृश्यमानं जगत् सृष्टेः पूर्वं प्रजापतिरेक एवासीत्। प्रलयावस्था
यामव्याकृते कारणे कार्यप्रपंचस्य लीनत्वात्स्रष्टा हिरण्यगर्भ एक एवासीद्द्वितीयः स
एकलः प्रजापतिरकामयत कामनामकरोत्। किमिति। बहुः स्यां व्यागिरिनदीसमुद्रा

ह्वीनेदेनानेकविधस्यीनवेस्यं। तदर्थमहं प्रजायेय। अहमेव कार्येण रूपेण परिणतो भ
१२४ वेयमिति। स एवं कामयमानः प्रजापतिः स्वच्छ्रपायस्वेन एतं गणामयनस्याघ [illegible] मति
रात्रमपश्यत्तं दृष्ट्वाहृ। दृष्ट्वा चतमाहरत्। तदन्वतिष्ठत्। तेनानुष्ठितेनाहोरात्रेभ्य
125 हस्व रात्रिं च प्राजनयत उदपादयत। सर्वकारणभूतः प्रजापतिः अहोरात्रप्रमुखं कृत्स्नं
जगत् यद्वरूपेणैव साधनेन ससर्जेति संग्रहार्थः। अपेदानीं तमतिरात्रं विधत्ते। [illegible]य १२४
देशो तिरात्रो भवत्यहोरात्रे एव प्रजनयीत्सहोरात्रयोः प्रतितिष्ठत्यतावान्वावसंवत्स
रो यदहेश्चाहोरात्राभ्यामेव तत्संवत्सरमाप्नुवंतीति। एषः प्रजापतिना दृष्टोतिरात्रः ग

125

रा

वामयनस्य प्रथममहर्भवतीति यत्तू तेन सत्त्वाननुतिष्ठतो यजमाना अहोरात्रे एव प्रजनयं
ति । उत्सादयंति स्वाधीने कुर्वंतीत्यर्थः । तथा सति तयोः स्वाधीनयोः प्रतितिष्ठंति । प्रतिष्ठिता भवं
ति । तत्र यद्यपि यच्छब्दत्रयोगात् सिद्धवदनुवादता प्रतिभाति तथापि यदाग्नेयोष्टाकपाल इति
वदप्राप्तत्वादतिरात्रस्य विधेयता द्रष्टव्या । न केवलमहोरात्रयोः प्रतिष्ठा । किंतु तत्संपाद्या
वै त्मके प्रतिष्ठिते । संवत्सरमपि प्राप्नुवंतीत्याह । एतावानित्यादिना । अथैनमतिरात्रमवयु
ज्य प्रशंसति । ८ । यज्ज्योतिष्टोमो भवति यदहर्मुखं तद्दुर्वंति यदुक्थ्याय इडाज्ञतो रनंत
रयाययद्रात्रिः सर्वस्याप्त्या इति ॥ ॥ अथ षोडशिकं यमतिरात्रं इत्युक्तं । क्लृप्तो ज्योतिष्टो

हि १

मोऽतिरात्रो षोडशिक इति। अथ तद्व्यतिरिक्ताभिस्तिसृभिः संस्थाभिरव्ययुक्तस्तूयते।
१२५ यद्यपि सर्वेषामप्यग्निष्टोमत्वमस्ति तथापि उक्थ्यातिरात्रसंस्थयोः पृथग्ग्रहणसा
125 म्याद् अग्निष्टोमसंस्थैव ज्योतिष्टोमशब्देनोच्यते। ज्योतींषि त्रिवृदादयः स्तोमाय
स्तोमा यस्य स ज्योतिष्टोमः। तथा च तैत्तिरीयकं। त्रिवृत्पञ्चदशः सप्तदश एकविं
व३ श एतानि वाव तानि ज्योतींषि य एतस्य स्तोमा इति। ज्योतिष्टोमोऽग्निष्टोमो द्वादश १२५
स्तोत्रात्मको भवति ज्योतिष्टोमस्य हि अग्निष्टोमसंस्था मुख्या। एष वाव प्रथमो
यज्ञानामिति श्रुतेः। तत्तेन यज्ञमुखं यज्ञानां मुखभूतमग्निष्टोमं प्राप्य आर्ध्नुवन्ति

सत्रिणः समृद्धा भवंति तथा तस्मिन्नतिरात्रे उक्थ्यः पंचदशस्तु तथा स्तत्र साध्यः क्रतुरं तत्र भ
वतीति यत्। तत्र यह क्रतोः संपूर्णस्य यज्ञस्य अनंतरस्यायज्ञ परित्यागाय भवति।
उक्थ्य संस्था यो हि क्रतुसंपूर्णो भवति। तथा द्वयोः सवनयोः ~~सवनयोः~~ पंचपंचस्तो
त्राणि तथा तृतीयेपि स्तोत्रपंचक सद्भावात्। अग्निष्टोमस्य संपूर्णः क्रतुः उक्तः हे तो
रप्यावात्। अपि चात्रि घपि सवनेषु प्रस्थित याज्या देवताः शस्त्रैः प्रशस्यंते। तथा हि प्रा
तःसवने मैत्रावरुणस्य प्रतिस्थित याज्या देवता मित्रावरुणौ शस्त्रेणोपितावेव प्र
शस्यते। ब्राह्मणाच्छंसिनः इंद्रः प्रस्थित याज्या देवता सैव तदीय शस्त्रेण स्तूयते।

स्य वा
तथा माध्यंदिनस्य सर्वैन्द्र सामस्थितयाज्यासुरा स्त्रंलिचैंद्राग्नेतथा तृतीयसव
नेमैत्रावरुणस्यैंद्रावरुणा सुषुपा इति । ऐंद्रा वारुणीप्रस्थितयाज्या । इंद्रश्च सोमं पिबतं
१२६ बृहस्पत इति । ऐंद्राबार्हस्पत्यसाम्नास्नातृणां कुत्सिनः प्रस्थितयाज्या । इंद्राविष्णूपिपिब
छा तमिस्त्यं वाकस्यचैंद्राविष्णवी । यदि तृतीयसवन एतद्देवत्यानि शस्त्राणि न शंस्यर
126 न् । प्रस्थितयाज्यादेवतास्तु सत्त्वेन क्रतुरसंपूर्णः स्यात् । उक्थेषु च प्रथमशस्त्रमैत्रा
वरुणीयं द्वितीयमैंद्राबार्हस्पत्यं तृतीयमैंद्राविष्णवं । एतेषु तृतीयसवने सवनी १२६
तरवत् प्रस्थितयाज्यदेवतानां प्रशंसा जातेति यः इह क्रतुः संपूर्णो भवति । इच्छमंत

127

र्त्ति न संख्याद्वयेन प्रशस्या विहितया तिरात्रस्यापि प्रशंसति । यदि-त्यादिना । अत्र
रात्रिशब्देन त्रयः पर्यायाः सोपि: स्तोत्रे तच्छस्त्राणि च लक्ष्यन्ते । रात्रिर्भवतीति यत्तु तत्स
र्वेषां स्तुतशस्त्राणां परिगृहीतत्वात् । सर्वस्य संपूर्णस्य यत्तस्य प्राप्त्यै भवति । त्र्यव
दपोति रात्रो भवतीति च । यज्ज्योतिष्टोमो भवति यदुक्थ्यो भवति यद्रात्रिरित्यादिवाक्य
त्रये ज्योतिष्टोमोक्थ्य कर्मविधिरिति मंतव्यं । वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जा
ते इति विहितायां जातेष्ट्यां यदष्टाकपालो भवति यन्नवकपालो भवतीत्यादिवद् वस्तु
कथानुवादत्वेन स्तुतिपरत्वात् । क्रमप्राप्तस्य चतुर्विंशस्य बहु वक्तव्य सद्भावा

स्या १

तद्यपथग्वजुवां मः इदानी मभी ष्टवद्द्वयोरक्तो संग्रहे ए क्लिमत्रिदधान आद्दावा
नि ष्टविकं एवं अहं विदधातु प्रस्तोती ॥ ६ ॥ स एतान्स्तोमानपश्यत् ज्योतिर्गौरा
१२७ युरितीमवेलोका एते स्तोमा अयमेव ज्योतिरयमन्तमो गोरसावुत्तमः आयुरिति।
स प्रर्वोक्तः प्रजापतिः एतान्स्तोमान्स्तव स्तोमशब्द। न त्रिवृदादिस्तोम वंच्यहा
127
नि ऋ ह्वंते। तानि ज्योतिर्गौरायुरिति। एतन्नामकान्यपश्यत्। तत्र ज्योतिरग्नि १२७
ष्टोमसंस्थः गौरायुषी उक्थसंस्थे ज्योतिषि इयं स्तोमक्लृप्तिः। त्रिवृद्धि बहिष्पवमा
नं पंचदशान्याज्यानि पंचदशो माध्यंदिनः पवमानः सप्तदशानि पृष्ठानि सप्तदश

आर्भवएकविं॰शो म॑ग्निष्टोमस्सामेति। अथ गोष्टोमस्य पंचदशं बहिष्पवमानं त्रिवृ
त्याज्यानि सप्तदशं माध्यंदिनं॰ सवनमेकविं॰शं तृतीयसवनं। अथायुष्टोमस्य त्रिवृ
द्बहिष्पवमानं पंचदशान्याज्यानि सप्तदशं माध्यंदिनं॰ सवनमेकविंशं तृतीयसवनमिति।
एते उक्ताः स्तोमा इमे लोका वै भूरादिकाः खलु के कतमो लोक इति बुभुत्सायामाह।
प्रथमेव लोको ज्योतिः अयमेव मोन्तरिक्षलोको गौः। असावुत्तमस्तृतीयः स्व
र्लोक आयुः। स्तोमत्रयस्य लोकत्रयेऽपि सहसंख्यासाम्यादेतच्छब्दता एतैस्त्रिभिः
स्तोमैः साधनैस्त्रीन्लोकानजनयदिति शेषः। अथैतान्विधत्ते। ऊ यदेते स्तो

माभवंतीमानेवलोकान्प्रजनयंस्तेषुलोकेषुप्रतितिष्ठंतीति॥ यदेषोतिरात्रो भवतीत्येवा
क्यवदेतत्सर्वंव्याख्येयं अग्निष्टवषडहस्योत्तरं त्र्यहंविधातुमाह। छंदः एतं त्र्यहं
१२८ पुनः प्राप्नुक्तेन षडहेनषड्भूतत्प्राजनयदिति। सप्रजापतिरेतं पूर्वोक्तं त्र्यहं
128 पुनः प्रयुंक्ते वान्यौ रायुर्ज्योतिष्क्रमोत्रावगंतव्यः। तथा चापस्तंबः। ज्योतिष्टो
ममग्निष्टोमं रथंतरसामानं गामुक्थं बृहत्सामानमायुषमुक्थं रथंतरसामानं १२८
ज्योतिष्टोमं बृहत्सामानमिति। तेन षडहेन षड्भूतान्यसीतादीन्प्राजनयत् स एषवा
न्। अपार्थवादानुगुण्याय पूर्वं विहितेन त्र्यहेन संयुज्य इममुत्तरं त्र्यहं विधत्ते

॥यदेष षडहो भवति। ऋतूनेव प्रजनयीतिस्तुषु प्रतितिष्ठीति। स एषोऽर्थः। अथ द्वि-
तीयं षडहं विधातुमाह॥ स एतं षडहं पुनः प्रायुङ्क्त ताभ्यां द्वाभ्यां षडहाभ्यां
द्वादश मासः प्राजनयदिति। पूर्वं प्रयुक्तमेव षडहं पुनरपि प्रयुञ्जानस्तैर्मि-
द्वा लितैर्द्वादशभिरहोभिर्द्वादश मासान् मासान्प्राजनयत्। पूर्ववदर्थवादमनुवदन्नुपपाय
द्विहितेन षडहेन सहद्वितीयं षडहं समुच्चित्य विधत्ते। यदेतौ द्वौ षडहौ भवतो मा-
सानेव प्रजनयंति मासेषु प्रतितिष्ठंतीति॥ पूर्ववद्व्याख्येयं। तृतीयचतुर्थौ
षडहौ विधातुमाह। स एतौ द्वौ षडहौ पुनः प्रायुङ्क्त तैश्चतुर्भिः षडहैश्चतुर्विं-

शतिमर्द्धमासान्प्राजनयदिति। एतौ द्वौ प्रयुक्तावेव षडहौ पुनः प्रायुङ्क्त वान्। तेद
वं प्रयुक्तैश्चतुर्भिः षडहैश्चतुर्विंशतिसङ्ख्यान्यहानि संपन्नानि तैश्च तत्संख्या
१२९ कानर्द्धमासान् प्रजापतिः सृष्टवान्। अपरपूर्वं वृद्धिं हि तेन षडहद्वयेन सहस्रहश्च
129 र्द्धं वा हानुगुणायद्यमें तृतीयश्चतुः षडहद्वयं विचक्ते॥ यदेते चत्वारः षडहा अर्द्धस
द्धमासानेव प्रजनयंस्तद्धमासेषु प्रतितिष्ठंतीति। स्पष्टोऽर्थः। इत्थं षडहचतुष्कं वि १२९
धाय पंचमं षष्ठं षडहं विधातुमाह॥ स इदं भुवनं प्रजनयित्वा षष्ठेन षडहेन
वार्य्यमासमन्वचत्तेति॥ स प्रजापतिः इदमहोरात्रादिरूपं भुवनं सर्वं जगत् प्रक

र्षिणो साधनि वीर्यैः सन्न प्रयुङ्क्ते न पृष्ठ्येन षडहेन त्रिवृदादिस्तोमकेन वीर्य्यं सृष्ट
स्य जगतो योगरहस्यात्मकं सामर्थ्यमात्मनि सर्वस्मिन्न धत्त। पुनर्ईतवान्। तमिमं
पृष्ठ्यषडहं विधत्ते।छ। यदेष पृष्ठ्यः षडहो भवति वीर्य्य एवांततः प्रतितिष्ठतीति। य
स्मात्प्रजापतिरिमं षडहं वीर्य्यं चारणांर्थं प्रयुङ्क्तवान्। तस्मादिमं षडहं प्रयुंजानाः स
त्रिणः सत्रं ततो मासावसाने वीर्य्य एव प्रतिष्ठिता भवंतीत्युक्तं। इच्छमनु तिष्ठेन षडह ष्ठिते
पंचकात्मकेन मासेन तत्त्वसंघात्मकं संवत्सरं प्रजापतिः सृष्टवान्। सत्त्रिणोपि ष
डहपंचकानुष्ठानेन मासद्वारा संवत्सरमेवस्य योगसाधनमुत्त्पादयंति। तस्मिंग्र
हू१

प्रतिष्ठिताभवतीति।इतितस्यस्तुतिः।छ।तृतीयपक्षोत्पत्तौ।तेनमासासंवत्सरंप्रजनय
१३० द्वादशमासोभवतिसंवत्सरमेवप्रजनयतिसंवत्सरेप्रतितिष्ठतीति।इति।इतिचतुर्थ
130 ध्यायस्यप्रथमः खंडः ॥१॥ प्रायणीयातिरात्रानंतरमनुष्ठेयंचतुर्विंशमन्यद्विती
यमहः।बहुवक्तव्यत्वेनपश्चाद्विधास्यतइतियद्वादि।अतस्तदहर्विदधाति।छ। १३०
प्रायणीयमेतदहर्भवतीति।एतद्वक्ष्यमाणमहः प्रायणीयं।प्रकर्षेणायंतीतिगच्छंतिस्व
र्गमनेनेतिव्युत्पत्तिः।एतत्संज्ञकंगवामयनस्यद्वितीयमहरनुष्ठेयंभवति।यद्यपि
क्रस्येतरप्रथमविहितस्यातिरात्रस्यैवप्रायणीयइतिसंज्ञाप्रसिद्धा।तथापिप्रथ

मोऽन्नमयोरतिरात्रयोः सर्वत्र साधारणत्वाद् अस्यैवाह्नो गवामयनेऽत्र साधारणं प्रायणम्
मिति द्रष्टव्यम् एतदादिम गवामयनस्वरूपम् अस्मिन्न् द्वितीयेऽहनि प्रायणीयशब्दो
ऽत्र प्रयुज्यते । उक्तम् अहर्नाम निर्वचनद्वारा प्रशंसति । ८ । प्रायणीये । न वा अत्राह्ना देवाः
स्वर्गं लोकं प्रायन्न् अस्माय ८ सा सायणीयस्य प्रायणीयत्वम् इति । पुरा देवाः प्रा
यणीयेन प्रायणीयाख्येन स्वर्गं लोकं प्रायन्न् प्राप्ताः यद्यस्मात् सायणी
र्गं प्रागमन्न् तस्माद् अस्याह्नः प्रायणीयत्वं । प्रायणीयसाधनत्वात् सायणीयम् इति
नाम संपन्नं । अथैतस्याह्न उक्तरूपं लोकप्रशस्तत्वात् सत्रित्रिरस्मिन्न् अहनि अव

स्यमरु त्विग्भिर्ब्राध्यमित्यन्वयव्यतिरेकाभ्यामाह॥ ३॥ तस्मात्प्रायणीयस्याह्नस्त्विजान
१३१ वितव्यमेतद्धि स्वर्गस्य लोकस्य नेदिष्ठम् य एतस्यार्त्विज्यं न भवति हीयते स्वर्गाल्लोकादि
ति। यस्मादेतदहः स्वर्गप्राप्तिसाधनं तस्मादस्याह्नः प्रयोगाय ऋत्विजा। ज्ञातावेक्षन्त
131 नम्रत्विग्भिर्ज्ञवितव्यं। एतत्खलु हि तीतैयमहः स्वर्गस्य लोकस्य नेदिष्ठ मेतिकतमं
साक्षात्तत्प्राप्तिसाधनं हात। अतो य एतस्यार्त्विज्यं न भवति। आर्त्विज्यं न करोति। स स्वर्गाल्लो ल्लो ५
काद्धीयात्। हीनो वियुक्तो भवति। अथैतस्मिन्नहनि स्तोमं विधत्ते। चतुर्विंशं भवतीति॥ १३१
इदमहरुक्थ्यसंस्थं तत्र सर्वेषु स्तोत्रेषु चतुर्विंशति एव स्तोमः कार्यः तदेतत्प्रशंस
स्थं १

ति।७।।चतुर्व्विंशत्यक्षरा गायत्री तेजो ब्रह्मवर्च्चसं गायत्री तेज एव ब्रह्मवर्च्चस
मारब्धा प्रयंतीति। अयं च स्तोमश्चतुर्व्विंशतिसंख्याकः गायत्री चतुर्व्विंशत्यक्ष
रा सा च गायत्री तेजः प्रजापतिमुखादग्निना सह उत्पन्नत्वात्। अस्यास्तेजोरूपं ब्रह्म
वर्च्चसं च तेजोऽवांतरभेद इति। तेजो ब्रह्मवर्च्चसरूपा गायत्री एवं सति चतुर्व्विंशति
स्तोमम[illegible]ः प्रयुंजानाः साक्षादेव प्रत्यक्षमेव सर्वं संप्रारंभं[illegible]स्मिन्नहनि प्रयु
जानाः संख्याद्वारेण तेजो ब्रह्मवर्च्चसं चारब्धम् अवरुध्य स्वर्यंति। स्वर्गं गच्छंति।
पुनरपि विहितं स्तोमं अनूद्य प्रशंसति।८।।चतुर्व्विंशं भवति चतुर्व्विंशो वै संव

त्सरस्यैव साक्षादेव संवत्सरमाप्नुवंतीति । चतुर्विंशस्तु द्वादशमासात्मकत्वात्संवत्स
१३२ रस्य चतुर्विंशश्च । तथा सति चतुर्विंशः स्तोमे प्रथमतः प्रयुंजानाः साक्षादेव प्रत्य
क्षमेव संवत्सरमाप्नुवंते । अथेमं स्तोमे स्तोत्रीयागतसंख्याद्वारेण प्रशंसति । ८ ॥ या
132 वत्सश्चतुर्विंशस्योक्थस्य स्तोत्रीयास्तावत्सः संवत्सरस्य रात्रयः स्तोत्रीयाभिरेव
तत्संवत्सरमाप्नुवंतीति ॥ ९ ॥ पंचदशस्तोत्रेष्वलि न्महानि पंचदशस्तोत्रेषु प्रस्तोतृचतु
र्विंशस्तोत्रीयायुक्तेषु परिगणनायामित्थं सार्धपञ्चत्तरत्रिशतं स्तोत्रीयाण्भवंति । तथा १३२
सति चतुर्विंशस्तोमकस्य यावत्सः स्तोत्रीयाः संवत्सरस्यापि तावत्सो रात्रयः एवं प्र

133

युंजानाः सत्रिणस्तेन चतुर्विंशेन स्तोत्रीयाभिरेव संवत्सरं प्राप्नुवंति स्तोत्रसंख्य
यापीदमहः प्रशंसति॥ ३॥ पंचदश स्तोत्राणि भवंति पंचदशार्धमासस्य रात्रयोऽर्ध
मासश एव तत्संवत्सरमाप्नुवंतीति॥ स्पष्टोऽर्थः॥ अथ स्तोत्रशस्त्राणि समुच्चित्य
तत्संख्ययापीदमहः प्रशंसति॥ ४॥ पंचदश स्तोत्राणि पंचदश शस्त्राणि समासो
मासश एव तत्संवत्सरमाप्नुवंतीति॥ स्पष्टोऽर्थः॥ अथास्याह्नः छंदःप्रत्ययं विवे
षमाशंक्य तत्परिहाराय स्तोममुद्यं विधत्ते॥ ५॥ तमाहुरीमर्म इव वा एषोऽहोत्राय
द्वाभ्यां वा क्वायद्वा वा क मनु संतिष्ठत इत्येवं मर्मान विनोरिति यद्धुच्छंदःस्यात्त्रे

ककुभं चोद्व॰शीयं चांततः प्रतिष्ठाप्य वीर्य्यं वा एते सामनी वीर्य्य एवं ततः प्रतितिष्ठतीति ॥ तस्मि
न्नुक्थ्यपर्य्यमा ऊर्ध्वं स्तवादिनः किमिति तदुच्यते होतृव्यतिरिक्ता नो होत्रकाणां किमहो
१३३ यत्र यामाच्छावाक्या अच्छावाकसंबंधिनी होत्राशंसनादिरूपा क्रिया एषा ईर्ष्मेति ब्राह्मण
133 मुच्यते तद्ददत्र ... म ... यमच्छावाकमनुलक्ष्य संतिष्ठते अच्छावाकशस्त्रेण समाप्यते ना ते ४
ताना ५ च्छावाकसमापने नई र्म्यं यज्ञस्य दुष्टतां भवितोऽर्भवितुमीश्वरा समर्था भवतीत्याकूरि १३३
स्त्वन्वयः ॥ अतो यदि यज्ञे क्रौञ्चं क्रौञ्चसीसौ स्यात् ॥ उक्तदोषपरिहाराय त्रैककुभे
चोद्व॰शीयं चोभे सामनी च्छंततस्तृतीयसवनस्यांते प्रतिष्ठाप्ये त्रैककुभेब्रह्मसाम

उद्ध॰शीयमच्छावाकसामेत्येवैकर्त्तव्यमित्याहुः। शाट्यायनेनस्यप्रष्टमाम्नातं ई मर्य इव वा एष
होत्राशंसीयदच्छावाकोयदच्छावाकमनुसंतिष्ठते मर्य इव तु ष्टुवानाः स्युरिति। तस्यचैककु
नं ब्रह्मसाम न वस्तुद्ध॰शीयमच्छावाकसामेतियएक इच्छिद्यतेइति तत्त्वेगेयं चैक
कुभं। गायंति त्वागायत्री। ण इति तत्त्वेगेयी। उद्धा॰शीयं। एते सामनी वीर्य्यं वै वीर्य्यरूपे एव
कपमनयोर्वीर्य्यं वत्समुच्यते। ककुन्नमिति शृंग वदुन्नतस्याभिधानं चैताल्ली ककुन्ना
म्नियस्यतत् त्रिककुभं तस्मै बद्धं चैककुभं। अतस्मून्नतसी वैयादेते सामनी वीर्य्य
मित्युच्यते उन्नतीं हि लोके वीर्य्यत्वं। एवं सति वीर्य्यं चोद्धं॰शामिवये मिरइत्युद्ध
व॰

द्धू॰शीयं ३

मनश्रवणादुच्छ्रायप्रतीते वीर्य्यत्वं। एवं सति वीर्य्यरूपयोः साम्नोः प्रयोगात्। अंततस्तृ
१३५ तीयसवनस्यांते वीर्य्य। एव यजमानाः प्रतितिष्ठंति। अतोऽच्छावाकसमापत दोषोन
भवतीत्यर्थः। अथास्ये वाक्ये विकल्पेन अग्निष्टोमसंस्थाकार्य्यत्वमाह। अपोरवच्चा
135 द्रुरग्निष्टोममेव कार्य्यमित्यपि वेय· इङ्ः स्वर्ग्यो यदग्निष्टोम उ द्वौ हि होतार मनुसं १३५
तिष्ठत इति।। ।।अपोशब्दः पदव्याख्यानार्थः। अमितः खल्वाङ्ः। किमिति। इदमह
रग्निष्टोमे। अग्निष्टोमसंस्थमेव कार्य्यं श्रौतेस्तत्त्वं अग्निष्टोम इति यत् एष
खलुय·इङ्ः स्वर्ग्यः स्वर्गाय हितः। तच्च कुतो हेतोः। हि यस्माद् द्वंस्त्रिवदादिक्रमेणाऊर्द्ध्वं

त्रिमुखः सन्नुच्चाय मग्निष्टोमो होतारमनुलक्ष्य संतिष्ठते। होताहि सत्त्रिणामनुकृत्य
स्तदीयेनाग्निमारुतशस्त्रेणाग्निष्टोमः परिसमाप्यते। अतोस्यस्वर्गप्राप्तिः। ऊच्यते
संवत्सरावाप्तिरूपं यत्फलमुक्तं। तदप्यत्रापि विद्यत इत्याह॥ ७॥ द्वादशस्तोत्रा
ण्यग्निष्टोमो द्वादशमासाः संवत्सरस्तेन संवत्सरसम्मितो द्वादशस्तोत्राणि द्वादशश
स्त्राणि तच्चतुर्विंशतिश्चतुर्विंशतिरर्द्धमासाः संवत्सरस्तेन संवत्सरसंमित इति।
योयमग्निष्टोमः स द्वादशस्तोत्राणि द्वादशानी स्तोत्राणी संघात्मकः संवत्सरश्च द्वाद
शमासात्मकस्तेनायमग्निष्टोमे द्वादशस्तोत्राणि द्वादशशस्त्राणि भवंति। तदुभयाग्नि
मसंस्थः संवत्सरसंमितः संवत्सरसंमितस्सदृशास्तेन संवत्सरमेवाप्नुवंतीत्यर्थः। किंचाग्निष्टोमे १

जिह्वा चतुर्विंशतिः संपद्यते । संवत्सरश्चतुर्विंशः सार्धमासात्मकः तेनाप्ययं संव
त्सरसम्मितः । एवमग्निष्टोमसंस्थायाः सिद्धांतद्वारेकायामुक्तसीस्त्वेव सिद्धांत
१३५ 135 इति निगमयति ॥ ७ ॥ अथोरवच्चाङ्गुरुकूपमेव कार्यमङ्गाः समृद्ध्या इति । अथो इति
सर्वपक्षव्याहतस्त्वेः । उक्थ्यसंस्थमेवैतदहः कार्यं । किमर्थमङ्गाः समृद्ध्यै सपूर्णतया
इति ब्रह्मवादिन आहुः । अग्निष्टोमे हि पूर्वयोः सवनयोः पंच पंच स्तोत्राणि तृतीये तु द्वे १३५
एवेत्यङ्गाः समृद्धिर्न भवति । उक्थ्ये तु तृतीयसवने पंच स्तोत्राणीत्यहः समृद्धिर्भवति
उक्थ्यसंस्थांगीकारे युक्तीतरमाह ॥ ८ ॥ सर्वाणि रूपाणि क्रियंते सर्वं छंद्यते तेनाङ्गाप्यत इति ।

॥ उत्तरेषामक्षांसंबंधीनि यानि रूपाणि रूपाणि क्रियंते सर्व्वं ह्येतेनाक्राप्यत इति सो
मष्टछ्र.विभक्त्यादीनि तान्यस्मिन्नुक्त्वा क्रियंते अतः सर्व्वं हि यज्ञसंबंधि रूपं तेनाक्रा
उक्थ्यसंस्थेन आप्यते प्राप्यते। तत उक्थ्यसंस्थैव कार्य्येत्यर्थः। सर्व्व रूपकरणाच्च सर्व्वावा
प्तिश्च संपादनद्वारेणेति निदानकारेणैव मुच्यते। ४॥ अपरेऽरवच्चाङ्गः सर्व्वाणि रू
पाणि क्रियंत इति॥ आचार्य्याः एतेष्वेव सर्व्वासूक्तो भावः सर्व्वाणि पृष्ठानि सर्व्वाणि वि
भक्तीर्दशरात्ररूपाणीति विभक्तिमात्रेणैकस्यायं त इति संग्रहयोक्ता पुनस्त्रिवृत्संवद
रोचतुर्व्विंशः सीपाद्यत इत्याहुर्ना। एतान्येव सोमपृष्ठादीनि प्रत्येकं क्रमेण विविक्षाप्र

ते

×सहस्रवती प्रतिपत्कार्य्येति । प्रतिपद्यते प्रक्रम्यते बहिष्पवमानस्तोत्रे एषा प्रतिपत् सा ×२

दर्शितानि । तत्र स्वं तत्रैवावगन्तव्यं । अस्मिन्नहनि बहिष्पवमानस्याद्या या स्तोत्रीया सर्वं पद

१३६ तया विद्यतीति । ॥ पवस्व वाजसातये सोमाः सहस्रपाजसे इति सहस्रवती सहस्रशब्दो

पेताहस्याकार्य्या ॥ एतं प्रश० सति । सर्वसरस्य रूप० सर्वानि वै नानेतया पुनाति सर्वा

नभिवदतीति । अस्यां हि बहुत्वसंख्या सहस्रपदेन प्रतीयते । सर्वसर० सर्वबहुदिवसा

त्मकः अत एषा सहस्रवती सर्वसरस्य बहुदिवसात्मकस्य रूपं । अनु रूपं अनुगुणं स १३६

यं । अपि चैतान्यजमानान्स सर्वबहु सर्वानेवैतया प्रतिपदा पुनाति । स्तोता शोचयति ।

कपन्दितितदुच्यते । यस्मादेषा पवते इत्यनेन बहुवचनेन सर्वानभिवदति प्रतिपाद

136

137

यति अत इत्यर्थः। यद्यपि तत्र बहु वचनेन सोमबहुत्वमेव प्रतीयते। तथापि बहुत्वस्य
ति सामान्यात् सर्वान्यजमानानेतथा पुनातीत्यर्थः। इत्थं ब्राह्मणान्तिमेतत्पक्षमपि धा
यस्वाभिमतं पक्षं दर्शयति। कां॥ अथो खल्वाहुः पवस्व वाचो अग्रिय इत्येव कार्य्यासु
~~संवत्सरमारम्भे~~ इति॥ अथो खल्वि
~~वा एतस्य संवत्सरस्य यद्द्वादशाहं मुखं तस्यैतत्संवत्सरमारम्भे~~
तिपक्षान्तरमाह त्यर्थः। पवस्व वाच इत्येषैव बहिष्पवमानस्य प्रतिपत्कार्य्येति।
ब्रह्मवादिन आहुः। अस्य प्रायणीयस्याह्न एषा निरूपेति सो॥ कं॥ मुखं वा एतत्
संवत्सरस्य यद्द्वादशाहो ग्रमुखत एवतत्संवत्सरं प्रीणाति इति। वाच्यः सोत्र शास्त्रास्तिकायाः अ

मार

ग्रे श्राषम्ये प्रपन्नयोग इति यत्। एतत्संवत्सरस्य सत्रस्य गवामयनस्य मुखं वै न
वति। अस्यां च प्रतिपदि पवस्व वाचो अग्रिय इति अग्र शब्दो विद्यते। अनेन च मन्त्र
१३७ 137 ति सामान्येन च सुतशस्त्रादिवाग्निष्पाद्यस्य गवामयनस्य मुखम् तम् अग्रं प्रतीय
ते। एवं सत्येषा प्रतिपद्वतीति। यत्तेन संवत्सरसत्रं मुखत एव आरभन्ते। यजमानाः
क्रमंते। अस्यामृच्याग्रियसद्भावात्। अग्रियस्य च लुब्धिं स्वरूपेऽस्याभिप्रायः। ए रा १३७
षा प्रजननहेतुत्वादपि प्रशस्तेत्याह। [illegible] मिथुनमिव वा एषा व्याहृतिः पवस्वेति
पुंसो रूपं वाच इति स्त्रियाः सोम इति पुंसो रूपं चित्राभिरिति स्त्रिया मिथुनमेवै

भ्यो यज्ञमुखे दधाति प्रजननायेति। एषा मंत्रगता व्याहृतिरुक्ता मिथुनमिव। वेद
स्य वचारणे मिथुनरूपैव जनवति। तदेव दर्शयति। पवस्वेति यत् पवनं प्रतिपाद्यते।
तत् पुंसः पुरुषस्य रूपं। प्रायेण सोमस्य पवनं पुरुष एव करोति। यद्वा पवनक
र्तुः सोमस्य पुंस्त्वादस्य पुंरूपत्वं। वाच इति स्त्रीलिंगत्वात् स्त्रिया रूपं। तथा सोमे
ति यदामेत्रितं तत्सुं सो रूपं चित्राभिरिति स्त्रियाः एवैसति एषा भवति पद्मवतीति यत्।
तेन एभ्यो यजमानेभ्यो यज्ञमुखे मिथुनमेव दधाति किमर्थं प्रजननाय। यजमा
नानां प्रजोत्पत्तये। अथास्याङ्गो अग्निष्टोम सोत्रे ब्राह्मणांतरसिद्धं किंचित्सा।

मध्विदध्याति। ७॥ अग्नेयुङ्क्ष्वा हि ये तवेति जराबोधीयमग्निष्टोमसाम कार्यं युक्ते
१३८ नैव सत्वस्सरेण प्रयंति चतुर्विंशदक्षरासु भवति चतुर्विंशस्य रूपमिति॥ अ
ग्ने युंक्ष्वा हीत्यस्मिंस्तृचे गायत्रे जराबोधीयं जराबोधेत्यस्यामृच्युत्पन्नं साम।
यद्यपि नाधीमहे तथाप्यूहेन अस्मिन्नहनि अग्निष्टोमसामत्वेन तत्कार्यं। एवं स
ति युङ्क्ष्वेति मंत्रे युंक्ष्वलिंगदर्शनात्। उक्तं नैव परस्परसंबद्धा नैव संवत्सरसत्रेण
प्रयंति गच्छंति। सत्रस्य पारं प्राप्नुवंतीत्यर्थः। किंच एतत्साम चतुर्विंशदक्षरासु १३८
गायत्रीषु भवति। एतच्चाहश्चतुर्विंशस्तोमकं। तथा सति संख्यासामान्यात्। तस्मा

म अस्याङ्गोऽनुरूपं भवति। अपरस्याभिमतं संसिद्धीतमाह। अथो खल्वाहुर्यज्ञाय
ज्ञीयमेव कार्य्यमिति।। स्यश्लोकः। इमे पद्वंपशीसति।। पशव्यावै यज्ञायज्ञीयं पशु
कार्य्यमिति। एवं तन्नयतीति।। यज्ञायज्ञीयमग्निष्टोमसामेति यदेतत्। एष खलु प
पायस्तस्य नश्यात्यौ मार्गः यज्ञायज्ञीयमग्निष्टोमसाम कुर्वन्तीति यत्। तत्रेनप
थः मार्गाद्देवतानूनयन्ति गच्छतीति प्रज्ञातान् भवंति।। इति चतुर्थाध्यायस्य द्वितीयः
खंडः।।२।। ।।अथास्मिन्नेवाहनि माध्यंदिनसवने ब्राह्मणाच्छंसिनः पृष्ठस्तोत्र
निर्वर्त्तकमेकं साम विधत्ते। छ।। अन्तीवर्त्तो ब्रह्मसाम भवतीति। तत्र वक्ष्यमाणाख्य

हुंकर्त्तवी। अपेतन्नामनिर्वचनेनप्रशंसति॥ ७॥ अभीवर्त्तेनवैदेवाः स्वर्गल्लोकम
१३९ भ्यवर्त्तयंस्तयदभीवर्त्तेनब्रह्मसामभवति स्वर्गस्यलोकस्याभिवृत्त्या इति। अभीव
र्त्तीकेवनसाम्नादेवाः स्वर्गल्लोकमभ्यवर्त्तंत। अगच्छन्। अत एवास्याभिवृत्तिसा
139 धनत्वादस्यसाम्नोऽभीवर्त्तइतिसंज्ञानिष्पन्ना। अत एव स्यौ मध्यायन कंपद
भ्यवर्त्तंतदभीवर्त्तस्याभीवर्त्तत्वमिति। अभिदर्वीहतुवर्त्तनइत्यस्याचरणेघ १३९
ऽतत्तु स्वर्गस्यलोकस्याभिवृत्त्यै अभिवर्द्धनं यायाभिगमनायसत्विलीसंप
द्यते। अस्यचसाम्नः इंद्रगीभिर्नवामहइतिपादस्थाने हेइस्येतत्‌हाइतिविकृतौ

140

निधनं तदेतद्व्यप्रशंसति ॥ ८ ॥ एकाहरणिधनो भवत्येकाक्षरा वै वाग्वाचैव तदारुह्य
स्वर्गल्लोकमेतीति । अयमभीवर्त्त एकाक्षरणिधनः हे इत्येकमक्षरं निधनं यस्य तादृ
शो भवति । वागप्येकाक्षरा इति । तत्तेन एकाक्षरणिधनप्रयोगेण एकाक्षरया वाचै
व यजमान आरुह्य स्वर्गल्लोकं यातीति यजमानो गच्छति । एतदभीवर्त्तोक्तवीसाम पृष्ठेऽस्मि
न्नेकाहे विद्यमाना नाना मार्जिकविका नाम ऋक्स्वरसाम्नां च माध्यन्दिने सवने ब्रह्म
साम्नां सुरूपाश्च ब्रह्मणः पृष्ठस्तोत्रे तथा कर्त्तव्यं तथा उत्तरास्मिन्नहर्षु प्रगाथे अस्माद
न्यत्साम ब्रह्मणः पृष्ठःस्तोत्रार्थं कर्त्तव्यं । तदेतदुभयोर्विधत्ते ॥ ९ ॥ साम्नेतोऽयं त्यच्चा
२ पदस्याभिद्रन्द्रं क्रतुं न आभरेत्येक एव प्रगाथः ब्रह्मसाम्नामयः कर्त्तव्यः प्रस्तुहेतस्मिन्नू x २

पुनरायंतीति । साम्नात्रातीवर्त्ताकत्वेन दर्द्भस्मिन्नपद्मसि विद्यमाने पुनर्द्वर्यक्ते

घहः सुप्रसह प्रयुज्यमानेन इतोत्रास्माद्धोकाद्यंति गच्छंति । स्वर्गं नयाः रुचा
सामान्यान्निप्रायमेकवचननिर्देशकतुनश्चानरेतिलक्षणेने सर्व्वः । उत्तरस्मिन्

पद्मसिपुनःपुनः प्रयुज्यमानेनैतेन लक्षणेन पुनरायंति इमं लोकमन्निलक्ष्य स्वर्ग्गा
त्पुनरावर्त्तते अत उभयलोकप्राप्त्यर्थत्वात्पुनयोः पद्मसोरनडुन्नयोः कर्त्तव्य इति 
सर्वः । तदेव कथमित्यत आह । ॐ ॥ सामवान्यं सोलोकरुगयप्पद्मितः साम्नायंति
स्वर्गाल्लोकमारुह्यायंतियदृचा पुनरायंत्यस्मिंल्लोके प्रतितिष्ठंतीति ॥ ॐ ॥

यदिदं साम तदसौ स्वर्ल्लोक ऋग्यजुषापेक्षया साम तृतीयं भवति। स्वर्ल्लोकस्यापि
क्षितेरिक्षापेक्षया तृतीयः। अनयोः स्थानसाम्यादभेदेन व्यपदेशः। येयमृक्सा
अयं लोकः उभयोः प्राथम्यात्। किं मतो भवति तदुच्यते। इतः साम्नायीतीति यत्
तत्स्वर्गलोकमेव साक्षादारभ्ययीति। तथाहुश्चारुग्निस्तत्र चेन पुनरायातीति
यत्। तेन अस्मिन्नेवं लोके पुनः प्रतिष्ठितो न भवति। विहितं साम स्वर्गरूपमुक्त-
मं व्यतिरिक्तत्वेन प्रशंसति। यत्सामावरुन्धेयुरव स्वर्गाल्लोकात्सद्योर्ध्वाद
च मनुष्येयुर्न स्थेयुरस्माल्लोकादिति। यद्यदिदमेवं विहितं साम अवरुन्धे

२४१

151

युः परिसृजेयुः। स्वर्गाल्लोकादवपद्येरन्नधः पतेयुः यद्यद्दिक्षु च मनु सृजेयुः परि
सृतेयुरस्माद्दूल्लोकान्नश्येरन् प्रच्यवेरन्। स्वर्गस्थिति साधनं साम। अस्मिंल्लो
के प्रतिष्ठाहेतुः सुगिति उक्तमयमनुक्तं भवति। तदुक्तमयमनूद्य प्रशंसति। ३॥ समान०
साम भवत्यन्योन्यः प्रगाथोऽन्यदन्यच्छन्दश्चित्रमसाध्वानमवगच्छन्तीति॥ सर्वं ऽस्मि
न्नुपद्वासि उक्तेऽहःसु समानमेकमेवाभीवर्तो कण्वबृहत्साम भवति प्रगाथः प्र २४१
ग्रयनायस्तदाग्रयस्तच्च स्वत्योन्यः प्रस्तूं विलक्षणो भवति। लोकेऽपि दीर्घाध्व
नि अन्यदन्यत्समस्परस्खलद्धटी चित्रं वा तावत्तु ब्रवीयनेऽवगच्छन्तः प्राप्नुवन्। अ

ह्वानम्महापथमेतिपुरुषः प्राप्नोति। एवमेवैतेसत्त्रिणोऽन्यमन्यंप्रगाथमवगच्छंतो
विषुवस्यर्यंतंयत्समार्गयंतीति। एतस्यजननहेतुत्वेनप्रशंसति॥ वृषावा एषरेतोधा
यदनावर्त्तः प्रगाथेषुरेतोदधदेतियदितः समानं सामनवस्तोमन्यः प्रगाथोरेत
एवतद्दधतियत्परस्तात्समानः प्रगाथोनवस्तोमन्यदन्यत्सामरेतएवतद्धितंप्रजनय
तीति। अनिवर्त्त इत्येष वृषावर्षणशीलः सेचनसमर्थोयुवैव। अतएवरेतोधाः
रेतसोवीर्यस्यनिधाता सप्रगाथेषुसमानः स्वास्वकु रेतोदधत् आदधत्। एति
गच्छतियत्। इतश्चतुर्विंशादारभ्यसमानमेवानावर्त्तीकिंधीवस्यसामनवति। प्रगा

परस्ताद्ग्रयोन्योन्यः प्रस्तुहिंजिन्नो भवतीति। यदेतदुभयं तत्तेन सत्रिणो रेत एव दधति प्र
१४२ जात्यादनाय रेत स एव धारणीं कुर्वन्ति। परस्तात्परस्मिंस्तु तरस्मिन्न्यस्सिसमानः ए
कप्रगाथइंद्र कतुमिस्साहिकोनवति। अग्नसामतुप्रयसहमन्यरन्यहिनद्वालोम
142 वन्नयतीतियतत्। तत्तेन हितं पूर्वस्मिन्यद्धस्याहितं रेत एव प्रजनयन्ति। बहुवि
धस्य साम्नः प्रयोगेणाबहुविधकार्यस्य देवोत्पादयन्ति। प्रकारीतरेण प्रशंसति।८॥ १४२
साम्नेतः प्रगाथ्यां दुग्धे प्रगाथेन परस्तात्सामानि दुग्धे सलोमत्वायेति॥ इतरस्य वतु
र्थि८ शादारभ्य साम्नैकेन सर्वान्प्रगाथान्दुग्धे यान्यस्मिन्प्रगाथे प्रयुज्यन्ते तेभ्यः
परस्तादुत्तरस्मिन्स्वरसामानमारभ्य प्रगाथेनैकेन सर्वाणि सामानि दुग्धे १

143

फलानि स्मारयति । एवं क्रियमाणमेतद्दुर्नयं सलोमत्वाय अनुलोमत्वाय नवति ।
ऋचो हि साम्नां आधारतया प्रथमसिद्धाः सामानि तु तदाश्रितत्वात् । पश्चाद्भावी
नि तेनैवात् पूर्वस्मिन् फलसाधनमेवानयोः सलोमत्वं । पूर्वस्मिन्पदे सति ऋचो
चैषामनावृत्तिः उत्तरस्मिंस्तु साम्नां तद्दुर्नयं प्रशंसति । ७ । ये वा अध्वानं पुन
र्निवर्तयंति नैनं ते गच्छंति ये पुनर्निवर्तयंति ते गच्छंतीति ॥ ये स्तु पांथाः अध्वा
नं पुनर्निवर्तयंति । पुनः पुनर्निवृत्ता गच्छंति । ते एनमध्वानं न गच्छंति । अध्व
नः पारं न प्राप्नुवंति । ये तु अपुनर्विवर्त्य पुनः पुनर्निवृत्तिरहितास्ते एनमध्वानं यं

तिते गच्छेति। अथ ध्यानी। एवमेव सत्रिलोकि सकृत्प्रयुक्तान्पुनरप्रयुंजानाः सेव
१४३ 143 स्मर सत्रस्य पारं प्राप्नुवंति। प्रयुक्तस्य पुनः प्रयोगे दोषमाह। ७। य आस्तुतं कुर्व
ते यथा दुग्धामुपसीदेदेवं तदिति। आस्तुतं पूर्वं स्तुतं प्रगाथं ये कुर्वंते ते पुनः प्र
युंजते। यथा दुग्धामुपसीदेत्। दोग्ध्वा दोग्धुमुपविशेत्। एवमेव तद्भवति। एत
देवव्यतिरेकमुखेन द्रढयति। ८। येनास्तुतं यं कामं कामयते तमभ्यस्तुवत इति। १४३
ये तु आस्तुतं सकृत्प्रयुक्तं न कुर्वते न पुनः प्रयुंजते। यं कामं कामयंते तं
प्राप्नुवंति। उक्तमर्थं विचारपूर्वकं नियमयति॥ ॥९॥ [illegible]।

ब्रह्मवादिनो वदंति यातयामासीवत्सरा३ अयातयामा३ इति तेनायातयाम्नेतीवक्ष्य
यो पुनरन्यानि स्तोत्राणि निर्वर्त्तेत ऊर्ध्वमेव ब्रह्मसाम्नेतीति। अस्मिन् गवामयनस
त्रे ब्रह्मवादिनः परस्परमाहुः। किमिति। अयं संवत्सरः सत्रात्मकः। किं यातयामो
गतरसः उताऽयातयाम इति विचार्यमाणानामिति संशये श्रुतिः। पदद्वयोर्व्याख्यानस्य
काशंका। उच्यते। बृहद्रथंतरयोरेव पुनः पुनः प्रयोगात्। वामदेव्यकालेययो
श्च निरसशः प्रयोगात्। ब्रह्मसाम्नश्चाभीवर्त्तस्य सर्वान्यपित्वात् प्रयुक्तानी पुनःपु
नः प्रयोगेण यातयामत्वाशंका। तथा ब्रह्मसाम्नः पुनः पुनः प्रयुज्यमानस्यापि

तदाश्रयाणामेव गायत्राणां प्रत्यहं द्विविनियोगादयातयामत्वमिति कालनयदर्शनाद्विशेषात्।
ग्रहणाच्च संशये इत्येनिर्णीतव्यं। तेन अयातयाम एव सर्वं समर इति वक्तव्यमति
१४४ 145 रेकात्कस्य हेतोः। यतः अन्यान्यजीवर्जव्यतिरिक्तानि स्तोत्राणि साम्नायानि निवि
र्त्तन्ते नतरस्थाने साम्न सामाष्टप्रयुक्तानि स्तोत्राणि पुनरावर्त्तंते। ब्रह्मसामैकमेव
ऊर्द्धमनिवृत्तिमितरस्याप्यप्रयत्नेदो विद्यते। अतो हेतोः सीवसरस्यागतरस १४४
सेः॥ ॥इति चतुर्थाध्यायस्य तृतीयः खंडः॥३॥ तद्देवे चतुर्विंशेऽहनि ब्रह्मसा
म विधाय प्रसंगात्सीवसरस्यापि ब्रह्मसामैरूपितं। चतुर्विंशस्य पुनरन्यानि
नि

स्तोत्राण्येतानि सर्वाणि आर्षेयकल्पेनैव बोद्धव्यानि । तदेवं पूर्वस्मिन्नहसि चतुर्विं
शतिप्लविकम् स्वरसामस्वर्क्क सा एकमेवा नीवर्त्तसाम पुनः पुनरावर्त्तनीये । प्र
गाथस्कम्भस्य हि भिन्न इति स्थिते । तत्रादौ पंच मासाश्चतुरभिप्लवा इति । तेषु विंशति
शतमहान्याभिप्लविकानि भवंति । षष्ठे तु त्रयोभिप्लवा इत्यष्टादशत्र्यहः स्वरसामा
न इत्येकविंशति तदुत्तरयाम्भिप्लवाः एकचत्वारिंशच्छतमहानि भवंति । एतेष्वहःसु
प्रगाथभेदस्योक्तत्वादेते स्तोत्रीयाः प्रगाथा स्तच्चाश्वेत्यावी कायामहे ॥ ७ ॥ पंचसु
मासः सुबार्हताः प्रगाथास्त्राप्येतदिति । पूर्वस्मिन्नहसि पंच सुमासः सुमासे सुबार्हताः प्र

गाथा त्र्याप्यन्ते समाप्यन्ते। प्रगाथग्रहणमुपलक्षणं। बार्हतास्तृचाश्च समाप्यन्त इ
त्यर्थः। कथमेतदुच्यते। चतुःशतं हैन्द्रा बार्हताः प्रगाथा राधान्तरं ग्यां विद्यन्ते। तेषु चत्वारः
१४५ प्रगाथा उद्धार्याः बृहद्रथंतरकालेयस्तोत्रीयाइन्द्रक्रतुन्न आभरेत्युत्तरपक्षीयश्चैक
145 इति। कुतस्तेषामुद्धारः बृहत्स्तोत्रीयस्य चतुर्विंशेऽहनि प्रयुक्तत्वात्। अभिप्लवेषु
चायुग्मेष्वहस्सु प्रयुक्तत्वात्। रथंतरस्य स्तोत्रीयस्य युग्मेषु प्रयुक्तत्वात्। कालेय १४५
स्तोत्रीयस्य अन्वहं प्रयुक्तत्वात्। इन्द्रक्रतोश्चोत्तरस्मिन्पक्षे सिद्ध०ग्विधास्य मानत्वान्न
श्रि पूर्वस्मिन्पक्षे हैयो ग इति। ते उद्ध्रियन्ते। ततः शतं भवति। तेष्वेकं चतुर्विंशे कार्यं इसेको न शते

सप्ताशीतिस्त्वंसतोबृहत्योदाशतप्रमाम्नाताः तच्चैकोनत्रिंशस्तच्चोनवैति। अष्टा
विंशतिशतप्रगाथस्य च समुच्चयो दृष्टवति। तत्र विंशतिशते पंचानाम्मासानामपे
क्षितं। एकोनशतमेव प्रगाथाविधीते। इत्येकैकस्मिन्नविष्णुवत्तृतीयेष्वहस्सु संतोबा
र्हतास्त्वचाः कार्याः। इतरेषु प्रगाथा एव कार्याः। एवं कृते पंचमस्य मासस्योत्तमे
निष्णुवे चत्वार एव प्रगाथालभ्यंते। तत्र तृतीयेहनि सतोबृहतीः कृत्वा पंचस्वपि स
तोबृहत्यः कार्याः। एवं पंचसु बार्हताः प्रगाथा आप्यंते। सतोबृहतीः [illegible] स्त्वचाः
मासेषुर अष्टौ परिशिष्यंते। षष्ठे च मासे एकविंशतिसंख्यान्यहानि तत्राद्येष्वष्टस्वहःसु एते

ऽवशिष्टास्त्वचाः कार्याः। ततस्त्रयोदशास्वहः सुकथं प्रगाथपत्नान्नद्दस्तारीवपाहः ॥ ७ ॥ तेषा
१४६ मेषु छंदसी सम्युज्यैतव्यमिति ॥ तेषु बार्हतेषु प्रगाथेषूत्तरेषु चोक्तप्रकारेणपरिस
मां तेषु छंदसी संयुज्यैतव्यमिति। सत्र सुत्रवाशिष्टेष्वहः सुद्वेछंदसी संयुज्यत्तत्त्वा
146 क्त संग्तव्यं। ब्रह्मसाम्नत्राभयत्वेन प्रयोक्तव्यं। के ते छंदसी इत्यत आह। ७। तिस्र उ
ष्णिहस्तु रेका गायत्री ता। तिस्रो बृहत्यो भवंतीति ॥ तिस्रः निरः ष्णिग्भिरे कया च गायत्र्या १४६
तिस्रो बृहत्यः संपद्यंते। उष्णिहस्त्वाद्यो पादावष्टाक्षरौ। तृतीयो द्वादशाक्षरः। तपासति
तिस्र उष्णिक्षु एकैकस्य गायत्रपादस्य संयोजने प्रत्येकं बृहती भवति। एवं छंदो द्वयी

संयुज्येतव्यमितिस्पर्धः । तथाचसूत्रकृतोक्तं । षष्ठेमासिगायत्र्यापादमेकैकमुष्णिहा
मुपरिष्टात्कुर्याद्विष्टावानुपपत्तिर्ह्यन्यथेति । उष्णिहोगायत्र्याश्चेति । याएतास्तेऽष्टा
तस्त्रः अवशिष्टाः ताः प्रथमेहनि प्रयुज्यंते । ताभ्योन्यान्याएवोत्तरेष्वहस्सुप्रयोक्त
व्याः । यस्मात्स्तस्तंकुर्वतेयपाठतुग्धानुपसीदेदिति । प्रयुक्तस्यपुनःप्रयोगेनिंदादर्शना
त् । अथपदांतरेविवृत्तुप्रच्छंदसःसंप्रयोगेपूर्वोक्तदोषमाह । ७ । तदाहुः सं॰शं इववा
एषछंदसांयद्वेदसीसंयुंजंतीति । संशायतेशिथिलीभवत्यनेनेतिसं॰शारः । यत्वेदे
छंदसीसंयुंजंतीति । एषछंदसांसंशारइववैशिथिलीभावएवेति । तत्तस्मिन्विषये

ब्रह्मवादिन आहुः। कथं तर्हि न्यूना ह परमं मिति चेत्तत्राह। ० । चतुरुत्तरैरेव छंदो
१४८ भिरेतव्यमिति॥ गायत्र्यादिभिर्जगत्यंतैश्चतुरुत्तरैः सर्वस्मात्सर्वस्मात् छंदस उत्तरो
त्तरं चतुर्भिश्चतुर्भिरक्षरैरुत्तरैरधिकैश्छंदोभिरेतव्यं। गायत्र्यैव्यतिरिक्तानामेव
पशूनां चतुरुत्तरत्वं गायत्र्याः प्रथमत्वात्। पशूनां चतुष्पात्त्वात् पशुत्वेन स्तुतिः। स्व
र्गमप्यत्। चतुरुत्तरैर्ह्याप्यत इमे पशवः प्रशीस्यंति। ० ॥ पशवो वै चतुरुत्तराणि छंदां
157 सि पशुभिरेवैतत्स्वर्गं लोकमाक्रमयमाणा यंतीति। चतुरुत्तरैः पुरश्छंदः सु चतुःसीख्या १४७ २४७
योगात्पशूनां च चतुष्पात्त्वात् पशुत्वेन स्तुतिः स्वपश्यन्त। चतुरुत्तरैः स्वप्नयो

148

गस्यस्थानान्याह ॥ ८ ॥ एकां गायत्रीमेकाहमुपेयुरेकामुष्णिहमेकाहमेकामनुष्टुभमेकाहं
यु बृहत्या पंचमासानियुः पङ्क्तिमेकाहमुपेयुः त्रिष्टुभा षण्मासानियुः श्वो विश्वा जगतीति
जगतीमुपेयुरिति ॥ एकां गायत्रीं छंदसः प्राधान्यादेकवचनं ॥ एकं गायत्रीतृचं एकाहं
एकस्मिन्नहनि क्रियमाणे चतुर्विंशेऽहनि ब्रह्मसामार्थमुपेयुः उपगच्छेयुः कुर्युरि मा ४
त्यर्थः ॥ एवमुत्तरेष्वपि संख्यैकत्वं द्रष्टव्यं ॥ एकामुष्णिहमेकामौष्णिहं तृचं एकाहं ०
एकस्मिन्नहनि प्रथममासस्य प्रथमस्याभिप्लवस्य प्रथमेऽहनि अनीवर्त्तस्यार्थ
यत्वेन कुर्युः ॥ तस्यैव द्वितीयेऽहनि एकामनुष्टुभं ॥ एकमानुष्टुभं तृचं ब्रह्मसामार्थ

त्वेनोपेयुः। ततो बृहत्सार्वहितैः प्रगाथैस्तच्चैष्म पंचमासः पंचमासान्प्रथमद्वितीया
भ्यामहोरात्राभ्यां वर्जितानद्युः प्राप्नुयुः। तेषु मासेषु वार्हतेषूक्थ्येषु च बृहत्सा
१४९ 149 मानीवर्तं कुर्युरिति। अस्मिन्नपि पक्षेऽभ्यासिप्लविकेषु तृतीयेष्वहःसु सतो बार्हतास्त
चाश्चान्यत्र प्रगाथा इति द्रष्टव्यं। एवं पंचमासेषु सर्वेष्वेषु द्वौ प्रगाथौ न वक्तव्यावशिष्यं
ते। षष्ठे मासे। प्रथमाभिप्लवे द्वितीयस्य पंचाहस्यैव तान्प्रयुज्य एकाहमेकस्मिन्नह १४९ १४८
नि द्वितीयाभिप्लविकस्य षष्ठेऽहनि एकां पंक्तिं। पंक्तिमेकं तृचं ब्रह्मसामार्थमुपेयुः।
तत्तत्रैषु जैनतृचेन षष्ठमासं षष्ठमासस्य अवशिष्टानि यान्याभिप्लविकान्यहानि षट्संख्याकानि।

यौच प्रथमद्वितीयौ स्वरसामानौ एतदहरष्टकं उपेयुः। षष्ठमासशब्देन उत्क्रान्त्येवा
हानिलक्ष्यंते। तत्रेमाह।। स्वः विषुवान्नविताननविष्यतीति यत्तदूर्ध्वमहस्तृतीयस्व
रसामाकमंतत्र जगतीजागतंत्वेव ब्रह्मसामाधारत यौपेयुः। इदमपिपक्षांतिरं
त्वापहांतरे दर्शयति।।७।। तदाङ्कुरनवकॢप्तानिवा एतानिछंदांसि मध्यंदिने बृह
त्साचैव त्रिष्टुभाचेतव्यमितीति। तत्र विषये ब्रह्मवादिन आहुः। एतानिछंदांसि
सिचतुरुत्तराणि मध्यंदिने सवनेऽनवकॢप्तानि चक्लृप्तसामन्यानियदप्य
त्रसप्तानामनवकॢप्तिः समानैवेति प्रतीयते। तथापि माध्यंदिने पवमाने गाय

त्रीबृहतीत्रिष्टुब्व्यतिरिक्तानामेव चतुर्णामनुवृक्त्वमिति वर्ण्यतोय घेतान्येव कृष्णानाम्म
ध्येकेन छंदसैतद्वीतत्राह । बृहत्या चेति । बार्हतैः प्रगाथैस्तच्चैश्चत्रैष्टुभैरेतव्यमि
१५० त्यर्थः ॥ ननु त्रीणि छंदांसि मध्यंदिने अवकृष्टानि । तेषु गायत्रीं परित्यज्य इतर
159 योर्ग्रहणे किं कारणं तत्राह । छ । एते वै छंदसी वीर्यवती एते प्रत्यक्षं माध्यंदिनस्य
रूपमिति ॥ एते वै बृहतीत्रिष्टुभौ छंदसी वीर्यं वै वीर्यरूपे एव वा यं वै त्रिष्टुबिति १५०
श्रुतेः । त्रिष्टुभो वीर्यत्वं बृहत्याश्च । यत्त्विस्याकुरम्पाणि छंदांसि वषट्याः सिकस्या बृह १४९
त्साम छंदसि दिने स्तुवंतीत्यादिना छंदोंतरस्यापि वैशिष्ट्यं प्रतीतं तव वीर्यत्वं । ननु गायत्र्याश्च सामा

150

हरणे दोश्छंदोंतरेष्वावेशिष्यदर्शनान्माध्यंदिने पवमाने चान्वयित्वात्साऽपि वीर्यरूपैवे
तिप्रयोज्येति चेन्न एते एव बृहती त्रिष्टुभौ छंदसः प्रत्यद्वेत्र्यसाधारणं माध्यंदिनस्यरू
पं गायत्री तु त्रिष्वपि सवनेषु प्रयुज्यते इति सवनत्रयसाधारणं त्रिष्टुप् बृहत्सोऽस्य मा
ध्यंदिन एव प्रयोग इत्यसाधारणं। किमनयोरनियमेन प्रयोगः। उत नियमेनेति जि
ज्ञासायामाह॥ ३॥ राथंतरेऽहनि बृहती कार्या तद्ध रथंतरस्य स्वमायतनं यद्बृहती
स्व एवैनं रथंतरं प्रतितिष्ठति बार्हतेऽहनि त्रिष्टुप् कार्या तद्ध बृहतः स्वमायतनं यत्त्रि
ष्टुप् स्व एव तदायतने बृहद्रथंतरं प्रतितिष्ठतीतरितिः॥ चतुर्विंशादिषु यस्मिन्न

तदायतन

ह्निरथंतरं प्रयुज्यते तस्मिन्नहनि आग्नीवर्त्रस्य बृहति आश्रयत्वेन कार्यो बार्हतः प्रगाथा
इत्यर्थः। बृहतीतियत् एतद्धि रथंतरस्यायतनं स्तानमाध्यंदिनसवने बृहतास्त्वेवं प्र
१५१ 150 युज्यते। अतस्तदायतनत्वं। एवं सतितत्तेन बार्हतेहनि बृहतः करणेन स्वकीयस्य
वस्थाने रथंतरं प्रतिष्ठितं भवति उक्तो ग्रहः सु। यस्मिन्नहनि बृहत्साम प्रयुज्यते तस्मि
न्बार्हतेहनि त्रिष्टुप्कार्या। त्रैष्टुभे तत्त्वे आग्नीवर्त्रे ब्रह्मसाम कर्त्तव्यं। बृहतस्त्रिष्टुभो १५१
द्वितीये प्रयोज्यत्वात् त्रिष्टुभो बृहदायतनत्वं। तत्तेन त्रिष्टुभः प्रयोगेण बृहत्साम स्व १५०
ए वायतने प्रतितिष्ठतीति शेषः। अत्रापि त्रैष्टुभ न बार्हते त्वचानां योयः ह्वर्वं प्रयुज्यते।

ततउत्तरमन्त्रोऽन्यएवउत्तरे षष्ठेऽहः सुप्रयोक्तव्यः आसक्तं कुर्वंति इति प्रयुक्तस्य पुनः
प्रयोगे निंदाश्रवणात्। एवं व्यवस्था बृहतीत्रिष्टुभोः प्रयोगे क्रियमाणे बृहद्रथंतरे सा
मनी प्रतितिष्ठंतीति शास्त्रं तस्य द्विवचनात् तस्य रूपमेतत् स्वस्वे एवायतने प्रतिष्ठिते सति
इतो गच्छतः कृत्स्नमहर्व्याप्नुतः। एतदुक्तं भवति। चतुर्विंशेऽहनि बृहद्रथंतरे उभे अपि
प्रयुज्येते। आग्निमारुत्विके पृष्ठरूपमरुत्वतीयादिषु षष्ठेऽहःसु रथंतरं प्रयुज्यते। द्विती
यादिषु पृष्ठ्यषडहःसु बृहत्साम। अतश्चतुर्विंशेऽहनि प्रथमम् आग्निमारुत्विके च बृहत्साम
त्रिवर्तं कुर्यात्। द्वितीये त्रिष्टुभि एवमतः ऊर्ध्वं विन्यासेनोभयोश्छंदसोः प्रयोगः। यद्वा च

तुर्विंशोहति त्रिष्टुब्जिज्जगतीवर्ज्जः कार्यः। बार्हतंछोतदहः। अत ऊर्द्धं बृहत्स्यैनां त्रिष्टुभो
क्रमेण प्रत्यहं विन्यासेन प्रयोग इति। निदानकारस्तु। एतत्पदद्वयमभिधाय पुनरपि
१५२ पदांतरात्प्रत्याहार बृहत्याश्चैतयं त्रिष्टुभाश्चैतव्यमिति मतीकमुपादाय त्रिष्टुब्जि चतु
१५ र्विंशोत्रीवर्ज्जं कुर्यात्। बृहत्यां प्रथमच्छ्रागमिमृत्विके त्रैष्टुभि द्वितीये एवमनुपूर्वं छंदसोः छं ४
दित्या॰ प्रयोगो भवति। तत ऊर्द्धं विन्यसेदिनात सर्वं तत्रैव द्रष्टव्यं। इत्थं त्रयः पक्षा गताः॥ १५२
प्रगाथे बृहत्यास्सेभुवं दसी सीभुत्सेतव्यमिति। प्रथमं चतुरक्षरैकं दो निरेतव्यमिति द्वि १५१
तीयः। बृहत्याश्चैव त्रिष्टुभाश्चैतव्यमिति तृतीयः। अथान्ये सप्तपक्षाः प्रदर्श्यंते। ७॥

त्रयस्त्रिंशताग्रगाघैरेतर्वै त्रयस्त्रिंशद्देवता देवतास्वेव प्रतितिष्ठंतो यंति चतुर्विं
शत्यैतर्वै चतुर्विंशतिरर्द्धमासाः संवत्सरः संवत्सर एव प्रतितिष्ठंतो यंति द्वादशाभि
रेतर्वै द्वादश मासाः संवत्सरः संवत्सर एव प्रतितिष्ठंतो यंति षड्भिरेतर्वाः षड्ऋतव ऋ
तुष्वेव प्रतितिष्ठंतो यंति चतुर्भिरेतर्वै चतुष्पादाः पशवः पशुष्वेव प्रतितिष्ठंतो यं
ति त्रिभिरेतर्वै त्रय इमे लोका एष्वेव लोकेषु प्रतितिष्ठंतो यंति द्वाभ्यामेतर्वै द्विपाद्यज
मानः स्वर्गस्य लोकस्याक्रांत्या अनेनान्येन हि पदा पुरुषः प्रतितिष्ठन्नेतीति ॥ चतु
र्विंशत्प्रतिपत्तीयस्वरसामांते षहः सुत्रयस्त्रिंशता त्रयस्त्रिंशात सै रक्षा वै बर्हि
न्र

हृतेः प्रगाथैरेतव्यं आदित्यास्त्रयस्त्रिंशत्त्वहःसु त्रयस्त्रिंशत्प्रगाथानानीवर्त्तस्य ब्रह्म
णस्तोत्रीयत्वेन प्रयुज्य पुनरपि तैरेवावृत्तैस्तृतीयः स्वरसामान्तं ब्रह्मसामकर्त्तव्यं । तथा
१५३ 153 सति त्रयस्त्रिंशद्देवता । अष्टौ वसव एकादश रुद्रा द्वादशादित्या इन्द्रश्च प्रजापतिश्चेति ।
तास्वेव प्रतितिष्ठंतः सन्तो यजमाना यंति । एवमुत्तरत्रापि व्याख्येयं ॥ इति चतुर्थ्या
यस्य चा चतुर्थखंडः ॥ ४ ॥ इत्थं पूर्वस्मिन्न्यहस्यानीवर्त्तं ब्रह्मसामत्वेन विधाय तस्य १५३
गाथाश्च निरूपिताः । अथाग्निष्टुत्त्रयः स्वरसामानो दिवाकीर्त्यमहस्त्रयः स्वरसामानो व्रि । १५२
श्वजिदिति । नवरात्र इति नवरात्रो विधातव्यः । षष्ठे मासे त्रीनभिप्लवान् एकं ॥

153

रसंचदृत्वाग्निजिदुष्टेयः ततस्त्रयः स्वरसामानः। ततो विषुवानिति। तत्राग्निजि
द्विषुवतोर्मध्यगतान्स्वरसाम्नो विधत्ते।। ७।। स्वरसामान एते नवेतीति।। यज्ञाय
याश्चपूर्वस्य स्यौयोनावुत्सन्नानि चत्वारि स्वरसंज्ञकानि सामानि येषु नवंति। ते स्व
रसामानः। तानि चत्वारि आर्जवेषु पवमाने षडुत्थ स्तुकर्त्तव्यानि। प्रस्तुन्वानायांचसः
अयंपूषारयिर्भगः सुतासोमधुमत्तमा इति यच्चानुष्टुभ्नास्त्वचा एतेषु कर्त्तव्यानि। अ
परेतु स्वराणि। पृष्ठानीति वर्त्तयंति। तदुक्तं सूत्रकृता।। स्वरपृष्ठाश्च स्वारसामिके
षु पृष्ठस्तोत्रीयेष्विति। यदि स्वरसामानः स्वरपृष्ठास्युः तदा स्वरसामसंबंधि वृहद्रथं

तरस्पृष्ठास्तोत्रीयेषु कृत्स्नकारोत्क्षेषु यज्ञायज्ञीयपाश्च पूर्वमस्त्वपायितेमहः प्रस्यस्मैपिपीष
तइत्येतेष्वेव स्वराणि निकुर्यादिति सूत्रार्थः। एवं विधान् स्वरसाम्न आजिजित ऊर्ध्वमुप
१५४ पुरिस्सर्पथः। तेषां स्वराख्यानां साम्नां स्वराणि पराणीति च। अन्ये देवसंज्ञे न वदतः। तत्र स्व
रसाख्यापूर्वकं स्तौति ॥ ॥ स्वर्भानुर्वा आदित्यं तमसाविध्यत्तं देवाः स्वरैरस्पृण्वन्य
स्वरसामानोऽत्वं साद्धि स्पृस्पस्पृसा इति। आसुरो असुरजातीयः स्वर्भानुर्नाम कश्चिदेका
153 रात्मकः। आदित्यं तमसा स्वशरीरभूतेनांधकारेणाविध्यत। अबाधत। आवृतवानिस १५४ १५३
र्थः। तं आदित्यं ~~तमसास्व~~ देवाः स्वरैः सामभिः अस्पृण्वन्। तस्य तमसोऽपनयनेन अव

स्वप्रीतिबलनयोः । बलिनं हूतवंत इत्यर्थः । तथा सति स्वरसामानो भवंतीति यत् । ४१
तयत्रांतत आदित्यस्य आदित्यात्मना संस्तुतस्य विषुवतः स्वरसे । बल नायक बलीक
रणे यद्भवति । यात् नामनेकार्थत्वात् स्तोति रक्षाकर्मा दिवा उ स्वरैः साम अतिरस्वरन्
इदानीमपि सत्रिभिः क्रियमाणानि स्वराणि विषुवदात्मना आदित्यस्वरणाये भवंति
अतः स्वरणसाधनत्वात् एतेषां स्वराणीति संज्ञा संपन्ना । तथा च तैत्तिरीयकं । यद
स्वारयन् तत्स्वराणां स्वरत्वमिति । अथैतेषां परसंज्ञां तद्धेतुकथनेन प्रशंसति । काप
रैर्वै देवा आदित्यं स्वर्गं लोकमपारयन् यदपारयंस्तत्पराणां परत्वमिति । परशब्दा
भिधेयैरेतैः स्वरैः देवा आदित्यं स्वर्गं लोकमपारयन् स्पष्टमन्यत् । वेदने प्रशंसति । पा

रथंतरेणैनं पराभावयति य एवं वेदेति। एतत्स्वरस्य सायामप्पकपलट्टली॥ स्वराभिर्वराणीति। सौ
र्य्यश्च वेद। एनं वेदितारं स्वर्गं लोकं पारयंति। सामानि प्रापयंति सं प्रावेदनेन स्वर्ग
१५४ प्राप्तिर्भवती त्यर्थः। अथैते षो स्वर सामानो विधत्ते॥ ७॥ सप्तदशो भवंतीति॥ सर्वेषु
स्तोत्रेषु सप्तदश स्तोमो भवती त्यर्थः। तदेतत्प्रशंसति। ८॥ प्रजापति वै सप्तदशः प्रजा
154/2 पतिमेवाप्यं तीति। संवत्सरो हि प्रजापतिः सप्तदशो भवति। द्वादश मासाः पंच र्त्तव १५८
इति। एवं सति सप्तदश प्रयुंजानाः प्रजापतिमेवाप्यंति॥ अनुष्टुप्छंदसो भवंत्या
नुष्टुभो वै प्रजापतिस्तस्मादेवं प्रजापतिमारभंत इति। प्रजापतिः सवनकं दा ८ सिगाय

द्वा २

त्यादीन्त्रिसवनदेवताभ्यो विनन्यमानुष्टुभैस्स्वं कृर्दो ऽकल्पयन्निति । तरेयादिषु अ
वगाप्तप्रजापतेरानुष्टुभत्वं । एवमनुष्टुभी प्रयोगे सति सर्वासामनुष्टुममेव आरनीते । अ
वलंबते । एते स्वरसामानः कुर्यानुष्टेया इति तेषां स्थानमाह । ७ । त्रयः पुरस्तात्त्र
यः परस्ताद्भवंतीति । विषुवतः पुरस्तादभिजितः अर्द्धमुपेतव्याः । परस्तात् विषुवतऊ
र्द्धं विश्वजितः प्राकृतत एव प्रतिलोममनुष्टेयानवेयुः । अपेताम्बरी सतिः ८ । देवा
आ वा आदित्यस्य स्वर्गाल्लोकादवपादादबिभयुस्तमेतैः स्तोमैः सप्तदशैरदृंहन्यदद
ते स्तोमा भवंत्यादित्यस्य धृत्या इति । देवाः पुरा आदित्यस्य स्वर्गाल्लोकादवपाद

र अधःपातनात् अविनयुञ्जीत। आसन्। तमादित्यमेतैः स्तोमैः सप्तदशकैः स्वर
१५५ सामभिः अभितः स्थितैः अदृंहन्। अदृंहयन्। यदेते स्तोमाः स्तोमसुक्ताः स्वरसामा
नोऽभितो भवंति। तदादित्यस्याधस्ताच्चारणायस्थैर्याय भवति। प्रकारांतरेण प्रश
155 सति। ७। चतुस्त्रिंशा भवंति वर्ष्म वै चतुस्त्रिंशो वर्ष्मणैव भवं स्तम्भित इति। ते सु म४
स्वरसामसु सप्रयुज्यमानाः सप्तदशस्तोमाः द्वौ द्वौ सपद्य चतुस्त्रिंशा भवंति। च १५५
तुस्त्रिंशश्च वर्ष्म वै उच्छ्रितः स्थानं यं गताः नच चतुस्त्रिंशाः कपीतस्योच्छ्रितस्थानत्वं।
×× वर्ष्मतद्रूपः खलु। ननु यत्तत्पञ्चविंशे वस्तोमास्म्या वदाघपेक्षया उच्छ्रितस्थान ××

नेयदोषः। त्रयः स्त्रिं० श एव एकाधिकम्भवतु स्त्रिं० शो न भवतीति तदुपपद्यते। एवं सति
वर्षीणा उष्ठितेन स्थानेन सदैव एनमादित्यं विषुवदात्मकं सम्मिमते सत्रिणः स्था
पयीति। स्वरसामभ्यः पुरस्तादभिजित्कार्यः आवृत्तेभ्यस्तेभ्य ऊर्ध्वं विश्वजित्। तयोर्वि
धिरर्द्धवादिनो न्नेय इति॥ तस्य पराचीनातिपादाद् बिभ्युः स्त० सर्वैः स्तोमैः प
र्य्यौषन्विश्वजिदभिजि ज्ज्ञो वीर्य्यं वा एतौ स्तोमौ वीर्य्येणैव तदादित्यं पर्य्यूषतीति च सा
इति। तस्यादित्यस्य पराचीनातिपादात् बिराचीनेन अनाभिमुख्येन अतिपादाद् दत्य
ङ्गमान्नशो त्यमानात्। अबिभयुः भीताः देवाः स्त० सर्वैः स्तोमैस्त्रिवृदादिभिस्त्रयस्त्रिं०

शांतैः पर्य्यावर्त्तन् परिगता आसन् उपागतो। परितो दृष्टौ ध्रुवकुरित्यर्थः। कथं विश्वजि
दभिजिद्भ्यां सर्वस्तोमाभ्यामूर्द्ध्वं विश्वजिता अधस्तादभिजितेत्यर्थः। वीर्य्यं वा एतौ स्तो
१५५ मौ स्तोमवंतौ विश्वजिदभिजितौ यदेतौ भवतः तत्तेन वीर्य्येणैव आदित्यं विषुवदा
ख्यं पर्य्युह्यंति सर्वतः परिगच्छंति दृढं कुर्वंति। किमर्थं अस्य स्थिरत्वाय। अथ वि
श्वजिदभिजिद्भ्यां कृतेषा धृतिः आदित्यात्मना संस्थितस्य विषुवतः अनवपाद्याया
नतिपादाय भवतीत्यर्थः उपसंहरति। अनवपाद्याया नतिपाद्ययेति। एवं स्वरसाम्नो १५६
विश्वजिदभिजितोश्च प्रयोगेण धृतत्वात् आदित्यात्मनो विषुवतोऽधः पतनम
तिर

द्वंगमनंचनन्नवतीसर्ष्छ॥ तदेवंषष्ठेमासित्रयोभिप्लवाःषडहाःपृष्ठ्यःषडहश्चाभि
जित्स्वरसामानइत्यनुष्ठेयंकर्तव्यमाइत्युक्तं॥ तत्रकेचिद्दोषमाशंक्यपक्षांतरमुप
न्यस्यति॥ ७॥ तदाहुःकर्तप्रस्थेदइववाएषयत्त्रयस्त्रिंशात्सप्तदशमुपयंतीतिहृ
ष्टोतरःकार्य्यइति॥ तत्रविषयेब्रह्मवादिनश्चाहुःकिमिति॥ अभिजितोह्यग्निष्टोम
सामत्रयस्त्रिंशस्तोमकेनदनेतरंयस्सप्तदशस्तोमीस्वरसाम्न्यूपयंतिएषःकर्तप्रस्थे
दइववैकर्तेऽवरोहपातइवन्नवति॥ उभयोर्मध्येत्रिणवेकत्रिंशोविद्यमानाव
तिक्रम्यअवाचीनेसप्तदशेप्रवृत्तिरिति॥ तस्यदोषस्यायंपरिहारः॥ अभिजित्स्वरसा

स्तोमर्द्धये पृष्ठ्यः षडहः अनरामघ्यतः कार्यः। ननु तत्रापि पृष्ठ्यस्य षडहस्तस्मात्त्रयस्त्रि
ꣳशमुपेत इति उक्तदोषोऽपरिहृतो भवति। तत्राह। ऊ। तस्य यत्सप्तदशमहस्तदुत्तमे
कार्य्यꣳ सलोमत्वायेति। तस्य पृष्ठ्यः षडहस्य सप्तदशं तृतीयमहस्तदुत्तमे षष्ठं कार्य्यं
तथा सति सप्तदशात्सप्तदशमुपेतो भवति। तत्र सलोमत्वाय। अनुरूपत्वाय भवति।
एतदेव शाट्यायनमुनिनिर्व्वृस्य पृष्ठ्यामनाते। तदाहुः स्तोमहैतत्त्रिववाएतस्तोमायै
ति।। यत्त्रयस्त्रिꣳशात्सप्तदशमुपयंतीति। पुरस्तादेव पृष्ठ्यस्य षडहस्याभिजितमुपे
त्य पृष्ठ्यस्यैव षडहस्य तन्मध्ये सप्तदशास्तदुपरिष्टात्त्रयस्त्रिꣳशस्य पर्य्यूहियुः त

158

सप्तदशात्सप्तदशानुपयंति।समासामेस्तोमहत्तरतत्रस्तोमायनीतितानिमीपद्दीनि
रस्पति॥७॥तदाहुरुदरं वा एषः स्तोमानां यत्सप्तदशो यत्सप्तदशमभ्यतो निर्हिये
युरशनायवः प्रजाः स्फुरशनायवः सत्त्रिण इति। तत्रान्ये ब्रह्मवादिनेन आहुः। स्तोमानी
मध्ये सप्तदश इति यत् एष य ॥ ज्स्योदरं वै उदरस्थानीयः अतो यत्त यदि सप्तदशीमध्ये
तषडहस्यमध्यात् निर्हरेयुः। बर्हिः कुर्युः अन्नाद्यस्थानीय) अतो यत्त यदि सप्तदश
मध्यतषडहस्यमध्यात निर्हियेयुः। बर्हिः कुर्युः अन्नाद्यस्थानस्योदरस्य निर्हाराद्देश
वर्त्तिन्यः प्रजाः अशनायवो बुभुक्षिताः क्षुधार्त्ताः स्युर्नवेयुः। ततः सत्त्रिणोपि अशनाय

वोत्रवेयुरिति। कथंतन्न कर्त्तव्यमितितदाह॥ ७॥ त्रयस्त्रिंशादेवसप्तदशउपेत्सोव
१५८ 158 र्ष्मवै त्रयस्त्रिंशो वर्ष्मसप्तदशो वर्ष्मणएवतद्वर्ष्माभिसंक्रामतीति। त्रयस्त्रिंशा
त्स्तोमात्सर्वेषुच्छ्रयमाणाद्देव अनंतरं सप्तदशएवस्तोमउपेत्यः। उपगंतव्यः। नन्वे
वंसति कर्त्तृप्रस्वेदलक्षणोदोष उक्तइतिचेत्तमेवं त्रयस्त्रिंशस्तोमोवर्ष्म अधिकसं
ख्यत्वात् श्रेष्ठः खलु सप्तदशोपिप्रधानभूतानां पृष्ठस्तोत्राणांनिर्वर्त्तकत्वाद्वर्ष्म
श्रेष्ठः॥ एवंसति यत् त्रयस्त्रिंशात्सप्तदशंमुपयंति तद्वर्ष्म १५८
णएववर्ष्माद्देववर्ष्मश्रेष्ठमभिसंक्रामंति। अतः सप्तदशात्सप्तदशासंक्रांतेः कर्त्तृप्रस्वेद

लब्धलोकदोषो न भवतीत्यर्थः । अथैते ये स्वरसाम्नां संस्थानिर्णयाय ब्रह्मवादिनां विचार
दर्शयति । क्व तानाहुरुक्थ्याः कार्य्या इत्यग्निष्टोमा इतीति । केषुचिद्ब्रह्मलोकेषु स्वरसाम्नामुक्थ
संस्कृतेकेषुचिदग्निष्टोमत्वं तद्विनय दर्शनात्संशये ब्रह्मवादिभिर्विचार्यते । येतान्स्वरसा
म्नो घिहत्सैवमाहुः किमु ते उक्थ्यसंस्थाः कार्य्या उताग्निष्टोमसंस्था इति विचार्यमाणे नाभि
ति वाक्यद्वये श्रुतिः । उक्थ्यत्वपक्षे तावदयं गुण इत्याह । य उक्थ्याः स्युः पशवो वा उक्थ्यानि पशू शांतिः
वः शांतेनैव तद्विभुवेतमुपयंतीति । य उक्थ्याः स्युः स्वरसामानः तदा शांतेनैव कर्मणा लदि
भुवेते आदित्यात्मना संस्कृतमुपयंति । पशवस्तापान्वायेति शेषः । कथमुक्थस्य शी तत्र

159

चेमुते।पशवोवाउक्थानि।तस्मात्पशव्यत्वात्शांतिमत्पशवः।पशुप्रजननेनहीरादिनोत्साघत्वा
त्।अतउक्थस्यशांतत्वं।अग्निष्टोमारव्यविचास्येतिमंपदं दर्शयति।ॐ।तदाहुर्विवीवध
मिववाएतयदग्निष्टोमोविषुवानग्निष्टोमोविश्वजिदभिजितावपेतरउक्थ्याःस्युरिति
ति।तत्रसामवविषयेब्रह्मवादिनआहुः।उभयतःशिक्यगतभारद्वयोपेतस्कंधेनवोढ
व्यीकाष्ठंविवधं।विषमंवीवधं।विवीवधंतादृशमेतत्।यत्रविषुवान्विश्वजिदभिजिता
वितित्रयोग्निष्टोमाः।अपेतरेस्त्वरसामानउक्थ्याःस्युः।अग्निष्टोमानांद्वादशस्तोत्रशस्त्र १५९
त्वादल्पत्वं।उक्थ्यानांपंचदशस्तोत्रशस्त्रत्वाद्गुरुत्वं।नहिगुरुलघुभारौवीवधेनवोढुंश

160

क्यो। अतो वैषम्यादेनद्द्वीव च मू।७। अग्निष्टोमा एव सर्वे कार्य्या इति। सर्वेष्वपि स्वरसा
मानो ग्निष्टोम संस्था एव कार्य्याः। अथैतत्सर्वं स्तौति।७। वीर्य्यं वा अग्निष्टोमो वीर्य्य एवान्न
द्यातः प्रतितिष्ठन्ती नवसंस्कृता भवतीति नव प्राणाः प्राणेष्वेव प्रतितिष्ठतीति। योयमग्नि
ष्टोमः स वीर्य्यं वै सर्वप्रकृतित्वाद्वीर्य्यरूप एव। तथा स्तौति स्वरसाम्नोग्निष्टोमसंस्थान्
कुर्वतः सत्रिणः मध्यतो गवामयनस्य मध्ये वीर्य्य एव प्रतितिष्ठंति ष्वे च नवसंस्कृ
ता एते षट् स्वरसामानो भवंति नवसंख्यया विभागे समाप्यंते। तथा हि। एवैकम
हर्द्वादश स्तोत्रीः। सर्वेषु च स्तोत्रेषु सप्तदशस्वस्तोमः तत्रैकस्मिन्नहनि चतुरधिक

द्विशते स्तोत्रीया भवतीति। एवं षड्त्स्तु त्र्यरसामसु सहस्रं चतुर्विंशत्युत्तरं द्वि
१६० शते च स्तोत्रीया भवतीति। र्ह्वि षड्त्रिंशदधिकशतीनवकाम भवति। किमतो भवति।
उच्यते। नव सीरव्या हि पुरुषे प्राणाः सप्त शीर्षण्याः द्वाववाञ्चाविति। तथा सति न
160 वसीरव्याकेषु प्राणेष्वेव सत्रिणः प्रतिष्ठिता भवंति दीर्घायुषो भवंती सर्व इति। ॥ इति चतु
र्थाध्यायस्य पंचमः खंडः ॥५॥ गवामयनस्य मध्यवर्त्तिनि नवरात्रे अष्टाव हा १६०
न्युक्तानि। अपवर्त्तिरयोः पद्वसोमर्धेष्वनुक्तेषु गवामयनस्य प्रधानभूतं विषु
वदाख्यमहः प्रदर्शयति॥६॥ विषुवानेष भवतीति। एष विषुवान् सीवत्सरस्य

161

सत्रस्य मध्यतो भवति। अथैष मे स्तोति। ७॥ देवलोको वा एष यद्विषुवान्देव लोकमे
व तदन्यारोहंतीति। यत् यो विषुवान् एष देवलोको वै देवानां लोकस्तान भूत आदित्या
त्मको हि विषुवान् तत्रेन विषुवतः प्रयोगेण देवलोकमेव यजमाना अन्यारोहंति
अथ तस्मिन्नहनि स्तोमं विधत्ते। ८॥ एकविंशो भवत्येकविंशो वा अस्य भुवन
स्यादित्य आदित्यलोकमेव तदन्यारोहंतीति। अस्मिन्नहनि सर्वेषु स्तोत्रेष्वेकविं
श एव स्तोमो भवति। अस्य भुवनस्य लोकस्य आदित्य एकविंशो वै अत आदित्या
त्मकस्य विषुवत एकविंशस्तोमस्य मुख्यत्वे एकविंशस्तोममुपयंतीति। यत् तेन आ

१६१ 161

दित्यलोकमेवाभ्यारोहति। कथमादित्यस्यैतल्लोकापेक्षयैकविंशत्वमिति तद्दर्शयति॥
द्वादश मासाः पंच र्तवस्त्रय इमे लोका असावादित्य एकविंश इति। हेमंतशिशिरयोः
समासेनैकत्वादृतवः पंच संख्याः। एकविंशः स्तोमः प्रयुक्तः फलं दर्शयति॥ मध्यत
एव यज्ञस्य प्रतितिष्ठंतीति। एकविंशो वै स्तोमानां प्रतिष्ठा। अतो यज्ञस्य संवत्सरस्
त्रस्य मध्यतो मध्य एवास्मिंल्लोके प्रतितिष्ठंति। यद्वा द्वादश मासा इत्यादिना ये अनु १६१
क्रांता एषु सर्वेषु प्रतितिष्ठंति। तथा च शाट्यायनकं। एकविंशो विषुवान्भवति। एक
विंशो वा अस्य भुवनस्य विषुवान्। द्वादश मासाः पंच र्तवस्त्रय इमे लोका असावादि

सएकविंशः सर्वस्मिन्वाप्योत्तिप्रतिष्ठितः। यद्यस्मिन्नेषसर्वस्मिन्नधिप्रतितिष्ठतीति।
तस्मिन्स्सर्वस्मिन्नधिप्रतिष्ठामेति। अस्मिन्नहन्निबहिष्पवमानस्यप्रतिपदंविधत्ते॥ ७॥
वायोशुक्रोअयामितइतिशुक्रवतीप्रतिपद्भवत्यादित्यस्यरूपमिति। प्रतिपदितिप्र
पमस्तृचउच्यते। अयंतृचोविषुवतिबहिष्पवमानस्यप्रतिपद्भवति। प्रतिपच्छब्दस्यस्त्री
लिंगत्वात्। शुक्रवतीस्त्रीलिंगता। भास्वरवाचकशुक्रशब्दोपेतत्वात् एषआदित्यस्यरू
पे आदित्यात्मकस्यविषुवतोनुरूपे। ननुसर्वेष्वहस्सुपावमान्यागायत्र्याहिप्रतिपदानी
मे अत्रकस्माद्वायव्यानुष्टुप्विधीयतइतितत्राह। ८। वायुर्वा एतेदेवतानामानेश

नुष्टुप्छंदसां यदतोन्यास्वतिपत्स्याप्रदहेदिति। देवतानां देवानां मध्ये वायुरेवैनमादित्य
१६२ मानसेव्याप्नोति। छंदसां मध्ये अनुष्टुबेनमानशे। नान्यश्छंदः। यद्यपि अतो वायव्याया
अन्या अन्यदेवत्या प्रतिपत्स्यात्तदा यजमानान्प्रदहेत्। अथैतौ वायव्यौ प्रशंसति॥ ७॥
162 यीति वा एते प्राणाद्दिसाद्कुर्ये गायत्र्याः प्रतिपदो यंतीति यद्वायव्या भवंति तेन प्राणान्नयं
ति प्राणो हि वायुरिति। ये यजमानाः गायत्र्याः प्रतिपदो यंति अपगच्छंति। गायत्रीं प्रतिप
दं नैव प्रयुंजते। एते प्राणापानव्यानरूपेण गायत्री संस्तुतात् प्राणादेव यंत्यपगच्छंतीति १६२
अत एते प्राणैर्विरहात्। सद्य एव म्रियेरन्न् इति ब्रह्मवादिन आहुः। तत्रायं परिहा

163

र:। वायव्या वायुदेवत्या प्रतिपद्वती तियत्र तेन प्राणान्नयीतिनापगच्छति। तत्कुतो हेतोः
प्राणो हि वायुरतस्तद्देवत्यया प्राणानां नो युक्त एव सर्वः। अथानया अपरोऽपि गुणोऽभ
वतीत्याह॥ ३॥ अपोशमयेत्येवैनमेतयाशीतिर्हि वायुरिति। अपो। अपि च एनं तपंत
मादित्यं एतया वायव्यया शमयेत्येव। वायुः शीति हि तापशीतिकरोऽभवति। पवमानेस्तो
त्रस्य सोमदेवत्यत्वात् वायव्याऽनुपपन्नेत्याशंक्याह॥ ४॥ आयाहि सोमपीतय इति सो
मी पावमानीति॥ वायो शुक्रो अयामि तइत्यस्यामृचि अनेन तृतीयपादेन सोमकीर्त्ती
नात्। सोम एव पवमानोऽभवति। एषा सोमी यौ पावमानी च भवति। अत उपपन्नैवैषा।

पवमानस्तोत्रैतश्ये पाशीति हेतुश्चेति प्रश्ने सति। ५। कानियुत्वतीवेने ति पशवो वै नियुतः शी
१६३ तिः पशवः शीतेनैव तदादित्यमुपयंतीति।। स्याहेदिवनियुत्वतेति नियुत्वद्वो स्यादृश्यते
नियुतश्च वायवो रहिवडवाः साश्चपरावः पशवश्च शांतिरूपा। ६। वंचनियुत्वतीएषा प्रति
163 पद्भवतीति यदनेन शांतेनैवानुष्ठानेन आदित्यप्रदाहाय। अथास्मिन्नहनि सामानि वि
धत्ते।। ७।। दिवाकीर्त्यसामानि भवतीति।। दिवाकीर्त्यानि सूर्यक्रियालिसामानि अस्मिन्न
प्रयुंजत इति दिवाकीर्त्यसामानि। अयं विषुवान् दिवाकीर्त्यसामाकार्यः। कानि पुनस्ता १६३
नि दिवाकीर्त्यानि। भ्राजाभ्राजेत्यादिना अग्रेवक्ष्यमाणानि। अथैतद्दिवाकीर्त्यसाम

खं प्रशंसति ॥ ७ ॥ स्वर्भानुर्ह वा आसुर आदित्यं तमसा विव्याध तस्य देवा दिवाकीर्त्यैस्तमो
ऽपाघ्नन् यद् दिवाकीर्त्यानि भवन्ति तम एवास्मादपघ्नन्ति रश्मयो वा एत आदित्यस्य
दिवाकीर्त्यानि रश्मिभिरेवैनं साक्षादारभन्त इति ॥ आसुरेण स्वर्भानुना तमसा विद्ध
स्यादित्यस्य बाधवं तमो यस्मात् कारणाद् देवा दिवाकीर्त्यैः सामभिरपाघ्नन् व्यनाशयन् अतो
यद् दिवाकीर्त्यान्यस्मिन्भवन्ति तेन तम एवास्मादादित्यादपघ्नन्ति ॥ कथमेषां साम्नां
तमसो हननसामर्थ्यमिति चेत् ॥ उच्यते ॥ दिवाकीर्त्यसामानीति यत् एते आदित्यस्य र
श्मयो वै रश्मिरूपा एव अत एषां युक्तमेव तमसो नाशकत्वं ॥ तत् प्रशंसति रश्मिभिरेवा

दिर्घी साद्धा सच्चाच्छमारनते । ये सत्रिणो विषुवति द्विवाकीर्त्यं निप्रयुंजत इत्यर्थः । दिवा
कीर्त्यं साम निष्क्रमसो पहननी सामान्येनोक्तं । नदेवविद्दृणोति । ७ । आजाआजे पवमा
१५४ 165 नमुखेनवतो मुखतएवास्य ताम्यो तमोपघ्नंतीति । पवमानमुखे माध्यंदिनार्भवयोः पव
मानयोर्मुखे प्रमुखे आगा वाजे सामानी नवतः । गायत्र्यस्यनिस्वात् । ततः परस्मात्क
मिणनवतः इत्यर्थः । अस्यप्रत्नामनुद्युतमिति त्वे गात वी साम आजे तन्माध्यंदिने प
वमानमुखे सामासीवे नस्वद्दस्य परि स्वानो गिरिष्ठा इत्यस्मिन् गेयं साम आभ्रा १५४
जेतदार्भवपवमानमुखेयद्यप्यत्र पवमानमुखइति सामासीवेच एव दृश्यते । गा

यत्रैते गायत्री सूक्तस्थयोः पवमानयोरिति विशेषावगतेरेवं व्याख्यातं। स्पष्टमन्यत्। अत्र
नेन भ्राजाभ्राजयोः साम्नोः स्थाननियमोऽपि द्युक्तो भवति। तथान्येषामपि त्रयाणां साम्नां
स्थानविशेषं प्रदर्शयन् पूर्वोक्तं तमोपहननमेव तत्साध्यं प्रदर्शयति॥ ६॥ महादिवाकी
र्त्यं च विकर्णं च मध्यतो भवतो मध्यत एवास्य ताभ्यां तमोपघ्नंति भासमंततो भवति प
त्र एवास्य तेन तमोपघ्नीतीति॥ विभ्राड्बृहत्पिबतु सोम्यं मध्विति तस्यां जगत्यां गेयं साम
महादिवाकीर्त्यं। इन्द्रं क्रतुं न आभर इति प्रगाथे गेयं विकर्णं। एते साम्नी मध्यतोस्यवि
ष्टुवतो मध्ये पृष्ठस्तोत्रेषु भवतः। महादिवाकीर्त्यं होतुः साम इतरद्ब्रह्मसाम। तथाच

तैत्तिरायके। महादिवाकीर्त्यं होतुः पृष्ठं विकर्णं ब्रह्मसामेति ।। एवं सति ताभ्यामस्यादित्यस्य
मध्यतो मध्यदेशात् एव तमो विनाशयंति । तथा चैततो नेवसाने नासमग्निष्टोमसाम
१६५ कार्यं। प्रकृत्यस्यत्यस्यामृक्षु सत्सु दशस्तोत्रैः साम नासीत् तन्मूर्द्धनि दिव इति त्वचे ऽत्रगा
165 तव्यं ।। तेनो ततः क्रियमाणे नैव नासेन पत्तः पादप्रदेशादेव तमोपगच्छेति । अग्निष्टो
मसामत्वेनन्विहिते नासं प्रशंसति ।। ॐ ।। दशस्तोत्रेन नवति दशाक्षरा विराड् विराज्येव
प्रतितिष्ठतीति ।। इदं नासं दशस्तोत्रेन नवति । आद्यंतयोः प्रजुज्यमान हाउ हावादयो १६५
नासौता दशस्तोत्रा स्तोमेष्वृक्षु मेतत् । विराड् दशाक्षरा सा वागन्नरूपा । अन्नं वै विरा

166

उतिष्ठंते: तथा सति दशस्तोत्रेन साम्नाप्विराज्येव सत्रिणः प्रतिष्ठिता भवंति। मासैः स्य
स्तोत्रियद्वारेण स्तुतिं चिकीर्षुः। कं चिद्यग्रमुपक्षिपति॥ ७॥ यन्विस्माद्भः षड्भिरितोमासै
रुत्थानेयंति षड्भिः पुनरायंति कतर्हि स्वर्गो लोको यस्य कामाय सत्रमासत इतीति॥ इतो
स्माल्लोकात् षड्भिः पूर्वपक्षमासैः नवैर्मासैः अस्थानमेव यंति स्वर्गप्राप्तिसाधनं न्नागमि
वयंति। पुनरुत्तरपक्षीयैः षड्भिर्मासैरायंति। इममेव लोकं प्रत्यागच्छंति। तर्हि तथा सति स्व
र्गो लोकः कं भवति। यस्य स्वर्गस्य कामाय कामं माप्तुं इमे यजमाना सत्रमासत इति। य
त्तु यत्तु खल्वाहुः। कथं पंक्तिबलवान्दिन: तत्रेदमुत्तरमाह॥ ८॥ मूर्द्धानं दिव इति स्वर्गं

ल्लोकमारभन्त इति ॥ विषुवतोग्निष्टोमसाम्नि मूर्द्धानं दिव इति स्वर्गलोकवाचकशब्द
प्रयोगात् प्रयोगमन्तः स्वर्गलोकमारभन्ते । आलभन्ते । प्राप्नुवन्तीति न हि व्याप्तत्वात् । सत्राव
सान एवाम्रियेरन्नित्याह ॥ ऋ ॥ अरति पृथिव्या इत्यस्मिंल्लोके प्रतितिष्ठतीति ॥ अत्र पृथि
व्या इति कीर्त्तनात् एषामस्मिंल्लोके प्रतिष्ठानवती स्तुतिः । अथ तास्तस्य स्तोत्रीयस्य तच्चो
विषुवतो रूपमित्याह ॥ वैश्वानरमृत आजातमग्निमिति विषुवत एवैतद्रूपं क्रियते
इति । ऋतमित्यादिस्तनाम । विषुवानप्यादित्य एव संस्कृतः । अत ऋतशब्दस्य कीर्त्तनेन वि
विषुवतो रूपमित्यर्थः ॥ इत्थं प्रथमायाः स्तोत्रीयायाः पादद्वयेन प्रशंसा कृता । अथ तृती

यपारे अतिथिशब्देनान्नाद्यप्राप्तिर्भवतीत्याह ॥ ७ ॥ कविं सम्राजमतिथिञ्जनाना
मित्यन्नाद्यमेवाप्नोतीति अतिथिर्ह्यन्नेन तर्पणीयः अतस्तद्वाचकेनातिथिशब्देन त
त्सम्बन्धिन्यान्नस्य प्रतीतेः सत्रिणोऽन्नाद्यमेवोपगच्छतीति चतुर्थपादे जनयंतेति पदप्रयो
गेण फलं दर्शयति ॥ ७ ॥ आसन्नः पाजनयंत देवा इति जायंत एवेति ॥ जनि धातोः प्रयोगाद
विशब्देन संस्कृतरूपेण पुत्रपौत्रादिना वा जायंत एवेति विहितमर्थं प्रशंसति ॥ ७ ॥ तत्
त्रिष्टुब्जगतीषु न भवति नैष्टुब्जागतो वा आदित्यो यदतो न्यासु स्यादेवं स्वर्गाल्लोका
त्पद्येरन्निति तदेतद्दिक्षु वदह स्त्रिष्टुब्जगतीषु च भवति अत्र चाहः शब्दपरामर्शे

नतच्छन्देनतस्मिन्नुपधानभूतंपृष्ठस्तोत्रमग्निष्टोमेतिहृयमानिधीयते।तदेतत्त्रिष्टु
बुगतीषुकर्त्तव्यं।८।बृहन्महद्दिवाकीर्त्यंतिन्द्रबृहद्बृहदितिजागतेतत्त्वेगातव्यं।मू १६२
र्द्धानमितितत्त्वेत्रैष्टुभेऽग्निष्टोमसामन्यासीकार्यं।तच्चात्रतच्छन्देनप्रकृतेना
सम्मैवेवं।सामपरामृश्यते।तत्त्रिष्टुब्जगतीषुत्रैष्टुभजागतरूपासुकार्यं।।तथा
167 हि।मूर्द्धानंदिवोरतिंपृथिव्याइत्यस्मिन्नुपादेव्याइत्यत्ररूचव्यूहेनद्वादशाक्षरत्वा १६२
त्।एषाजगतीरूपास्वतस्त्रिष्टुप्पादेवत्रैष्टुभरूपापितिसोऽप्यृचः।त्रिष्टुप्यजगत्यो
नवीति।निदानेस्वेतद्वाक्यमुदाहृत्यत्रिष्टुब्जगतीष्वितिपदंबहुधाव्याख्यातं।त

168

तत्सर्वमनुसंचेयी। आदित्यस्य त्रैष्टुभत्वागतः कथं गायत्रो वा अयं लोकः त्रैष्टुभोऽन्तरि
क्षलोकः जागतोऽसौ लोकः। दिवमन्तरिक्षस्य मध्ये संचरति तस्यादित्यस्य त्रैष्टुभं जागता
भवति। विषुवान्वादित्यः स्तुतः। अतो विषुवतोऽग्निष्टोमस्य सामत्रैष्टुभं जागतमेव स्यादि
त्यर्थः। ननु शाट्यायनकादिषु अनुष्टुप्सु मासे कार्यमिति दृश्यते। तत्र पंक्तित्रिष्टुब्जगतीष्वि
ति चेत्तन्नैवं। अतस्त्रिष्टुब्जगत्यावामन्यासु अन्यच्छन्दस्का अनुष्टुप्यादिनासंस्यात् स्वर्गो लो
कस्य द्वारं न। अथः पतेयुः सत्रिणः। तथा प्रकारांतरेण एताः ऋचः प्रशंसति। छा सम्राड्व
तीषु भवति साम्राज्यं वै स्वर्गो लोकः स्वर्ग एव लोके प्रतितिष्ठंतीति। सम्राडू शब्दवती

पुरश्चरणासाम भग्निष्टोमसाम भवति यत्तु स्वर्ग्गलोकस्य साम्राज्यं वै सम्राजं ईश्वरस्य

कर्म्मास्वी। तथा सति कवि॰ सम्राजमिति सम्राट् शब्दप्रयोगात् साम्राज्ये स्वर्ग्गलोके प्र

१६८ तिष्ठिता भवंति॥ ॥इति चतुर्थाध्यायस्य षष्ठः खंडः॥६॥ पूर्व्वमभवाद्धिष्ण इंद्रः क्रतुन्न आन

168 र इत्यस्मिन् प्रगाथे विषुवति श्विकर्णीत्रलसाम कार्य्यमिति। तं प्रगाथं माध्यंदिने पवमा

ने अभीवर्त्तस्वीसाम भविधास्यन्नाह॥ ७॥ आत्मा वा एष संवत्सरस्य यद्विषुवान्पक्षा

वेतावभितो ये न चेतो भीवर्त्तं नयं यस्य परस्तात्प्रगाथो भवति तावुभौ विषुवति कार्य्यौ प १६८

क्षावेव तद्यज्ञस्यात्मन्प्रतिदध्याति स्वर्ग्गस्य लोकस्य समष्ट्या इति॥ यत् यो विषुवानेष

ति १

169

ये ये

स्य

संवत्सरसत्रं गवामयनस्यात्मा । मध्यमोऽयो हि षण्मासो ऽएतौ विषुवं तमभितः क्रियमाणौ
पक्षाविव भवतः । तत्र पूर्वस्मिन् पक्षसि येनाभीवर्त्तेन यन्ति । यश्च परस्तादुत्तरस्मिन् पक्षसि
इन्द्र क्रतुमिति प्रगाथो भवति । एतौ विषुवतः पक्षभूतौ अतो विषुवति कार्य्यौ प्रगाथौ विवर्णि
द्यः कार्य्याः अभीवर्त्तस्तु माध्यंदिने पवमाने कार्य्यः । तन्नेनैतयोः करणेन यज्ञस्य गवा
मयनस्यात्मनि पक्षौ प्रतिदधतीति यजमानैः एतच्च पक्षयोः प्रतिनिधानं स्वर्गस्य लोकस्य स
मष्ट्यै । समध्यस्यतिकस्यते । पक्षवान् हि कं पतितुं शक्नोति । को सौ प्रगाथ उत्तरपक्षे योऽय
स्मिन्विकर्णी भवतीति तदाह ॥ ८ ॥ इन्द्र क्रतुं न आभरेति प्रगाथो भवतीति । अस्य प्रगाथस्य

उत्त

प्रयोगः प्रजातिहेतुरित्याख्यानमुखेन दर्शयति। ॐ। वसिष्ठो वा एतं पुत्रहतो पश्यत्सप्र
जया पशुभिः प्राजायत यदेष प्रगाथो भवति प्रजात्या इति पुत्रहतो हतपुत्रः सौदासेभ्यो
१६९ प्रद्वेषः अपशुरपास्य पुत्रे हते इमं प्रगाथं वसिष्ठोऽपश्यत्। स तेन प्रगाथेन प्रजया च पशु
भिश्च प्रजायत। यदेष प्रगाथो भवति। गवामयने तत्त्रसत्त्रिणी प्रजात्यै पुत्रादिरूपेण य
169 जमानाय भवति। अस्मिन्न प्रगाथे जीवा ज्योतिरशीमहीति जीवनप्रतिपादनात्संव
त्सरस्यच्छेमेण संतरणमेव प्राप्स्यामीत्याह। ॐ। जीवा ज्योतिरशीमहीति यद्वै स्वस्ति १६९
संवत्सरं संतरंति ते जीवा ज्योतिरश्नुवते इति। ये खलु यजमानाः स्वस्ति खलु क्रमेण

संवत्सरः स तरंति ते जीवाः जीवंतः संतो ज्योतिरश्नुवते । एतत्तृपादेन जीवतामेव सतां
संवत्सरसत्रसंपत्तिजसः प्राप्तिर्भवतीत्यर्थः । तथास्मिन्नु प्रगाथे विद्यमानं दुराध्य इति
व्याचष्टे ॥ ७ ॥ मा नो अज्ञाता वृजना दुराध्यो माशिवासो अवक्रमुरिति ये वैनारिपवस्तेदु स्ते २
राध्यस्तानेव तदतिक्रामतीति । स्तेनाः तस्करा रिपवो बाधकाश्चेतोत्र दुराध्यः दुष्टाध्या
नाः तानेव तत्तेन पदातिक्रामति अशिवकरा अस्मात् प्रतिक्रमिष्णुरिति मंत्रवर्णोहि । उत्त
रार्धे चः सर्वाव्याख्याता अस्माभिरिति । पुनरत्र न व्याख्यायते । पुनरपि प्रगाथशेष
मुदाहृत्य प्रशंसति ॥ ८ ॥ त्वया वयं प्रवतः शश्वतीरपोऽतिशूर तरामसीति संवत्सरो

वैप्रवतः शश्वतीरपस्तमेवतन्तरेतीति। शश्वतीः बह्वीः प्रवतः प्रवणगामिनीः अपोऽतितरा
मइति अतीतरएेक्ष्यते। अत्र प्रवतः शश्वतीरप इति त्रिभिरपिशब्दैर्वक्ष्मउक्ष्यानेदुस्तरत्वा
१७० त्संवत्सर एवोच्यते। तत्तेन प्रार्थनेन तं संवत्सरमेवयजमानास्तरेति। अपोत्तरस्मिन्पद
न सिविकल्पेन्त्रयः प्रगाथाः इंद्रक्रतुमित्यस्यस्थानेकर्त्तव्या इत्युपन्यस्यति॥ ७॥ अघाघाश्व
श्वस्याभिदाद्योनरोवयमेनक्षिदाघइतिसंततयः प्रगाथा भवंतितेषुमेकः कार्यः सतोमहा षा १
170 यश्वसानमिवाग्निसंतन्वंतीति॥ एषु प्रगाथेषु अघाघाश्वः श्वः इदानींइदानींद्यः द १७०
वैद्यकरोति। अहर्द्वयसंबंधदर्शनात्। एते प्रगाथाः संततयः संतानस्य अहर्द्वय

संबंधस्याबाधका भवंति। अतउत्तरस्मिन्पक्षसि तेषां नैकः प्रगाथः कार्य्यः। सच
सलोमत्वायानुलोमतायै भवति। एवं कुर्वंतो यजमानाः स्वस्त्यनं आगाम्यहरेवं वर्तमा
नेनाह्ना आविसे तन्वंति। संततेसी वद्धं कुर्वंति। इमे पक्षी निरस्य पूर्वोक्तमेव प्रगाथं वि
दधाति। ७। अपो खल्वाहुरिंद्रक्रतुन्नम्या अरेत्येव कार्य्यः समस्त इति। अथो खल्वि
ति पक्षीतरपरिग्रहे सम्यक्त्वे सम्यक्छावेमिंद्रक्रतुन्न आ अरेत्येव प्रगाथं कार्यमाहु
न्यरासुरानेव स्वात्मना परास्य भ्रातृव्यो भवति य एवं वेद। पुरा वै देवाश्चासुराश्चादित्ये स्वा अश्वासुरा ४
कमेवेति। तस्मिन्नादित्ये स विषये व्यायच्छंति विवादं कृतवंतः। तमादित्यं देवा अजयन्। अ
सुराः जयं न प्राप्नुवन्नुपृष्टमन्यत। ब्राह्मणस्य जयो यथा स्यात्तथा कर्त्तव्यमित्यर्थः। तदेवं २९०
प्रशंसति॥ ८॥ यदार्ष्यं वर्णमुज्जापयंतीति। आर्ष्यं ब्राह्मणं वर्णमुज्जापयंतीति॥ उत्कर्षेण जयं
प्रापयंतीत्यर्थः। तत्तेन सत्रिण आत्मानमेवोज्जापयंतीति॥ जयतेर्णिचि क्रीङ्जीनां णावि

पर्यंत्यात्मानमेव तदुज्जा २४

२॥

त्यात्वेश्वर्त्तिर्ह्रीङ्कारीत्यादिनानुमागमः। व्यायमनहेतुभूतस्य चर्म्मणः किञ्चिद्गुणं विधाय प्रश
सति॥ ३॥ परिमल्लल्लच्छर्म्मनवस्यादित्यस्येव तद्रूपं क्रियत इति। तच्चर्म्म परितः कृतमल्लका
कारं भवति तत्तेनादित्यस्येव रूपं अस्मिन्नु चर्म्मणि क्रियते। आदित्यो हि पुरा देवानां व्याय
मनं कृतमित्युक्तेः॥ अत एवैतच्चर्म्म आदित्यप्रतिरूपकं भवति। अथान्येऽस्मिन्स्तोत्रे गीयमा
ने दुन्दुभीनां वादनं विधत्ते॥ ४॥ सर्वासु स्रक्तिषु दुन्दुभयो वदन्ति यावन्तस्य पतिषु वाक्यामेव
तज्जयतीति। सर्वासु स्रक्तिषु वेद्याः कोणेषु दुन्दुभयो वदन्ति। शब्दं कुर्युस्सदेवी यथा वदतीति
यातान्वादयतीत्यर्थः॥ वाक् पूर्वं देवेभ्यो निष्क्रम्य वनस्पतीन्पृथिवीञ्च प्राविशत्। तत्र वनस

त्रिषुयाप्रविर्शर्वतामेववाचंतत्तेनदुंदुभिशब्देनजयतीतिप्राप्नुवंति।अथमृमिदुंदुभिवादनंवि
धत्ते॥७॥भूमिदुंदुभिर्भवतियाप्टथिव्यांवाक्तामेवतज्जयंतीति।अग्नीध्रायस्यपश्चाद्द
२११ मेंतर्वेघद्देबध्नहर्विर्वेदिन्तमावववटखाखासवनीयस्यऋषभचर्म्मणापिदधाति।सम्ह्नि
211 दुन्दुभिर्भवतितांवादयंतीतिशेषः।स्पष्टमन्यत्॥अन्यासामपिवाचांविधत्ते॥८॥सर्वा
वाचोवदंतितीवादयंती।येषुलोकेषुवाक्तामेवतज्जयंतीति।सर्वाःसंस्कृताश्चासंस्कृता २११
श्चग्राम्यवाचश्चवदंति।प्रेक्षकाःसर्वेजनाइत्यर्थः।गतमन्यत्॥अथराजपुरुषाणां
देवयजनस्यपरितोगमनंविधत्ते॥९॥समन्नद्धाःकवचिनःपरियंतीन्द्रियस्यैवतद्रूपंक्रिय

तेषोमहाव्रतमेवमहयंतीति॥ सन्नद्धाः सीवद्धहस्तत्रर्णादिकाँकवचिनः चर्म्मयुक्ताश्चराजपुरुषाः
रथमारूह्याग्रहात्त्वापसाराः सतः पर्य्यंति। देवयजनं परितोगच्छेयुः इंद्रियस्य वा लक्ष्येव
तद्रूपं क्रियते। यदेतत्तु कवचिनोपरिगमनं। अयोप्यपिच महाव्रतमेव महाव्रतारव्यमे
वाहमर्हयंति॥ ॥इतिपंचमाध्यायस्य पञ्चमः खण्डः॥५॥ एवम्महाव्रतस्तोत्रस्यशि
रप्रभृतिगाः पैनचावयवानङ्गपर्व्वादयः पंचसहोपक्रमस्ययुगपदुद्गायेयुरित्युक्तंप
रः। उद्गातैवकच्चनं स्तोत्रमुद्गायेदित्यपरः। तत्रप्रथमं पक्षं विदध्याति॥ ॥ सर्व्वेस
हर्त्विजोमहाव्रतेनस्तुवीरन्निति। महाव्रतेशिरआदित्रिपंचविधेनस्तोत्रेणाऽरत्वि

जः सर्वैर्युगपत्स्तुवीरन्। कतमः कतमेनावयवेन स्तुवीतेत्यत आह।। ३।। अध्वर्युः शिर
२१२ सोज्जायेन्मैत्रावरुणो दक्षिणेन पक्षेण ब्राह्मणाच्छंसी उत्तरेण गृहपतिः पुच्छेनोज्जातात्म
212 नेति।। शिरसा शिरस्येन परिकल्पितेन त्रिवृता स्तोमेन गायत्रेण साम्ना अध्वर्युः शिरसो
ज्जायेत्। तथा मैत्रावरुणो दक्षिणेन पक्षेण तथा तेन परिकल्पितेन रथंतरसाम्ना पंचदश
स्तोमेनोज्जायेत्। तथा ब्राह्मणाच्छंसी उत्तरेण पक्षेण तदात्मना परिकल्पितेन सप्तदश २१२
स्तोमेन बृहत्साम्ना स्तुवीत्। गृहपतिर्यजमानः मध्यं यज्ञायज्ञीयेन विकल्पितेन परिक
ल्पितेन। तेनान्यतरेणैकविंशस्तोमकेनोज्जायेत्। स्वयमुज्जाता आत्मना मध्यं आत्मा

213

तदुपतयापरिकल्पितेनराजनसाम्नोद्गायेत।अत्राध्वर्युःशिरसोजायेदित्यादिनाश्रद्धुर्यु
प्रभृतिनामुद्गातृकार्यविधानात्प्रस्तोतृप्रतिहर्त्तारावपि तस्यतस्यकल्पनीयौ।तत्राध्वर्यो
रग्नेर्द्वितीयःप्रस्तोतातृतीयःप्रतिहर्त्ताकार्य्यः।पत्न्योस्तुद्वितीययोरुद्गातृत्वात्।तदनी
तरेऽग्न्याविनोतृतीयश्चतुर्थाववप्रस्तोतृप्रतिहर्त्तारौकार्य्यौ।पुंक्षेत्रविनियुक्तौसुब्रह्मण्या
न्नेतारौप्रस्तोतृप्रतिहर्त्तारौकर्त्तव्यौ।नह्यत्रगत्यन्तरमस्तीत्येकपक्षः।अध्वर्युप्रभृती
नामेवोद्गातृत्वविधानान्नेतरयोर्बाधइतिमत उद्गातृवर्गीयौप्रस्तोतृप्रतिहर्त्तारौव ना २
सर्वत्रक्रमेणसर्वत्रप्रस्तावप्रतिहर्त्तारौकुर्य्यातामित्यपरःपक्षः।इममेवपक्षंसूत्रकारः।

७३

सर्वेसहर्त्विजोमहाव्रतेनस्तुवीरन्नित्युज्ञातृविकारएवस्यादित्यादिनादर्शितवान्।यद्यध्वर्यु

प्रभृतयःसर्वेमहाव्रतेनस्तुवीरन्।तत्रकेचिद्विशेषमाह।।तद्यद्येवंकुर्युरेकैकयास्तोत्री

ययास्तुयोज्ञातारमभिसमेयुरिति।तत्रमहाव्रतेयद्येवंकुर्युःतदास्वायेषुस्तोत्रेषुशिरःप्र

भृतीषुअस्तुतयाएकैकयास्तोत्रीययाउज्ञातारमभिसमेयुरभिगच्छेयुः।इयमस्तुतेस्यज्ञात्रे

निवेदयेयुरित्यर्थः।अथैतानिवेदितानीस्तोत्रीयाणीक्रमेणोज्ञात्राविनियोगप्रकारमाह।

तिसृभिरुज्ञातात्मनउज्ञीयाधयाशिरसःस्तोत्रीयातांदध्यादपराभिस्तिसृभिरुज्ञीयाधया

दक्षिणस्यपक्षस्यस्तोत्रीयातांदध्यादपराभिस्तिसृभिरुज्ञीयाधयोत्तिसृभिर्वैकयावासुतःस्यो

नरस्यपक्षस्यस्तोत्रीयातांदध्या१

214

सुदे:॥ आत्मनः राजनस्यादितस्तिस्रस्तिः स्तोत्रीयाभिरुज्जी योजानीत्कृत्वा अथानीतरैयाशिर
सः स्तोत्रीयाध्वर्युर्लवैशेषिताता मुन्नातादध्यात। प्रथमस्यपर्यायस्यप्रथमाद्विर्ध्वानेतरेतया
स्तुवीतेत्यर्थः। तयास्तुवीतेत्यर्थः॥ एवमुत्तरत्रापियोज्यं। यदा राजननस्यसाम्नः पंचविंशस्तो
मस्य अंत्यास्तिस्रस्तिस्तोत्रीयाभिरेकयावा अस्तुतं स्यात् स्तुतिः कृतान भवेत्। अथास्मि
न्स्थानेगृहपति नोक्षेपितौ पुच्छस्य स्तोत्रीयां प्रक्षिपेत् नत्वेकैकस्यानुक्षेपणी। आत्मनि
प्रतिचार्नेचविमर्क्षमित्यत आह। आत्मन्येवतदंगानिप्रतिदधति स्वर्गस्यलोकस्यसम
ष्ट्या इति। तत्तेन उक्तक्रमेण स्तोत्रीयाणां प्रक्षेपरोन आत्मनि मध्यकाय एव शिरः प्रभृतीन्यंगा

निश्चितं दधति। सद्यो जयतीति। सो ह्युतांगो ह्यङ्गं तु शक्नोति। प्रतिष्ठाने स्वर्गस्य लोकस्य समष्ट्यै संप्रा
२१४ प्त्यै नवति॥ अथ सर्वे महाव्रतेन स्तुवीरन्निच्छन्नुपद्रष्टारिस्य उद्गातैव शिरः प्रकृतिकेन सर्वेण
215 स्तोत्रेण स्तुवीत स्यमुपद्रष्टा दर्शयति॥ ॥ अथो खल्वाहुः कथमद्ध्वर्युर्बह्वृचः साम गायेदिति उद्गा
तैव सर्वेणोद्गायेत्तदेव समृद्धं समृद्धावेव प्रतितिष्ठन्तीति॥ अध्वर्युर्यजुर्वेदाध्यायी मैत्रावरु
णोऽपि बह्वृचः ऋग्वेदाध्यायी। अतिसंहितयोः सामाध्यापने। ततः कथं साम गायेतामिति ब्रह्मवा
दिन आहुः॥ अथो खल्वाहुश्चितिपद्धतिरपरिग्रह एवमुद्गानदनन्तरमेवन्तिष्ठितवन्तः। उद्गातैव २१४
सर्वेणाहस्त्वेन शिरः प्रभृतिकेन महाव्रतस्तोत्रेणोद्गायेत् तदेव समृद्धं स्वशाखात्वेन सम्प

गृहीतत्वात्। स्वरादिविकल्पाभावेन सम्यक्प्रयुक्तत्वात्। तदेव स्तोत्रं समृद्धं संपन्नं भवति।
तथा च सन्निरोगोऽपि सम्यग्भावेव प्रतिष्ठिता भवति। [illegible]स्मिन्नपेक्षस्तुतिप्रकारमाह॥ [illegible]॥ हवि
र्द्धानेशिरसा स्तुत्वा स ७ रथ्याः प्रत्नीचत्प्रयुस्ते दक्षिणेन धिष्ण्यान्परीत्य पश्चान्मैत्रावरुण
स्य धिष्ण्यस्योपविश्य रथन्तरेण पञ्चदशेन स्तुवीरन् ७ स्तउद्गीथः स ७ सर्प्यप्रयुज्य घनेन होतुर्धि
ष्ण्यं पश्चाद्ब्राह्मणाच्छं ७ सिनो धिष्ण्यस्योपविश्य बृहता सप्तदशेन स्तुवीरन् ७ स्तोत्रेणैव प्रसर्प्य
प्रयुस्तेन पुनर्निःसृप्याग्नीध्रं परीत्य पश्चाज्जार्हपत्यस्योपविश्य पुच्छेनैकविं ७ शेन
स्तुवीरन् ७ स्तोत्रेणैव निःसर्प्य युस्तेन पुनः प्रसृप्य पायतनमुपविश्यासीदीमारु ह्येषा ज्ञाता।

नमोरुपेउद्गातारः शिरसास्कुत्वासं०रब्धाः समन्वारब्धाः प्राञ्चोवः प्रत्यङ्मुखाः सीतलयुः। हविर्द्धा१
नमनोजायतीति॥ हविर्द्धानेह विर्द्धानाज्जुछेयुः। अपरया द्वारा हविर्द्धानान्निष्क्रम्य मार्जालीया
215 २१५ दानोधीष्ण्यानीदक्षिणेनतः परीत्य पूर्वया द्वारा सदः प्रविश्य मैत्रावरुणधिष्ण्यस्य पश्चादुप
विश्य पराचीतरेण पञ्चदशेन स्तुवीरन्। ततस्त उद्गातारस्तुदञ्चः उदङ्मुखाः प्रसर्प्पेयुः। होतुर्द्धि
ष्ण्यं परेण ब्राह्मणाच्छं०सिधिष्ण्यस्य पश्चादुपविश्य बृहता सप्तदशेन स्तुवीरन्। ते पुनर्यथेते
वपथाप्रसर्प्पेयुः। तेनैव पुनर्निःसृप्य निर्गच्छ्य दक्षिणेन धिष्ण्यान्परीत्य पूर्वया द्वारा सदोनि २१५
र्गच्छ्य अपरया द्वारा हविर्द्धाने प्रपद्य पूर्वया द्वारा हविर्द्धानान्निष्क्रम्य स्वर्लोकः। तत उत्त
रेणाग्नीध्रमागता धीष्ण्य परीत्य गार्हपत्यस्य पश्चादुपविश्य एकविं०शस्तोमके

न२

नस्कवीरन्त्। तउद्गातारो येनैव पथा निःसर्प्पेयुः सदसोऽतिक्रान्ताः। तेनैव पुनः सदः प्रसृप्य प्रप
द्यय यथायतनमुपविशेयुः॥ तु उद्गाता आसीदीमारुह्य आत्मनो ज्ञानं कुर्यात्। प्रत्नोपविश्येति
पूर्वकालतामात्रे क्त्वाप्रत्ययोद्दिष्टव्यः। अत्रोद्ज्ञाने पत्नीनां वालविशेषैरुपगानं विधत्ते॥
तीपत्न्योपघाटिला निरूपगायेयुः आर्त्विज्यमेव तत्सत्यं कुर्वन्ति सह स्वर्गं लोकमयामेतीति
॥ तमु ज्ञातारं अघाटिलानि वाणाविशेषैरुपगायन्ति। उपगानं कुर्युः। तदुपगानं आर्त्विज्यमे
व पत्न्यः कुर्वन्ति। यजमानैः सह स्वर्गलोकं प्राप्नुयामेति बुद्ध्या। अपघाटिलाशब्दस्यार्थं स
त्रकारो व्विस्पष्टमेवोक्तवान्। पश्चिमेनोपगातृन्द्वे द्वे एकैका पत्नीकाण्डवीणां चित्रो

216 रा वाद्यानन्द दंडेन वाद्यमाना कीड्यासं वादयेदुपमुखं पिच्छोरी वादनो नकांज मयांता अपघाटि
टि ला इत्याचक्षत इति ॥ उपमुखं स्थापयित्वा मुखमारुतेन वाद्यमाना वीणापीच्छोरा वा
२१९ दनदंडेन वाद्यमाना कीडमयी कीडवीणा एतयोरेव अपघाटिला संज्ञे स्पर्धः ॥ अस्मिन्न
हनि सर्वेषामपि यजमानानां गृहेषु ब्राह्मणभोजनार्थं पाकः कर्त्तव्य इति विधत्ते ॥ ८ ॥
कुले कुले नी क्रियते तद्य दृष्टेषुः किमिदं कुर्वीतीति मे यजमाना अन्नमहत्स्वं ताति ब्रूयुरिति । २१९
अन्नमेघहः सुगृहपति प्रधानाः एवं सर्वे ब्राह्मणा नोजयितुमन्नं निकामयंते । अस्मिन्न
हनि कुले कुले यजमानानां गृहे गृहे अन्नी क्रियते । एष कृप एकू ब्राह्मणा भोजयितु

मन्नं कर्त्तव्यं॥ तत्तत्र एवं क्रियमाणे यद्यदि हन्येयुः। प्रहृत्काजनाः किमिदं कुले कुर्वंती
ति। न देवं प्रतिब्रूयुः। इमे यजमानाश्चान्नमत्स्यंतीति। अस्मिंल्लोके बहुलमन्नं प्रदाय अमु
ष्मिंल्लोके बहुलमेते भोक्ष्यंत इति। अपेत स्वशंसति। ८॥ यो वै दीक्षितानां पापं कीर्त्तयति
तृतीयमेषां स पाप्मनो हरत्यन्नादस्तृतीयं पिपीलिकास्तृतीयमिति॥ यः खलु दी
क्षितानां दीक्षणीयेष्ट्या संस्कृतानां पापमशुभं कीर्त्तयति। स पुरुषः एषां पापस्य तृती
यमंशं हरति। यो दीक्षितानामन्नमत्ति। सोऽन्नादस्तृतीयमंशं हरति। आज्येष्वन्नेषु च ब
हुषु सक्तुषु बद्धाः पिपीलिकास्तत्र तत्रागच्छमागच्छंति तास्तृतीयमंशं पापं हरंति। अत

कान१

आज्यादिषु पिपीलिकापतनेदोषाशंकायांइत्यर्थः। परिमादः पूर्वमुक्ताः। तान्प्रशंसति। ०॥ परि

217 २१७ माद्भिस्वरंति। त्वक्कवाएतल्लोमच महाव्रतस्य यत्परिमादस्त्वचं चैवतल्लोमच महाव्रतस्याव

वरुंधत इति। याः पूर्वमुक्ताः परिमादस्ता महाव्रतस्य त्वक्लोमस्थानीयास्ततस्ता आत्वाग्रा

प्यत्रवरुंधते। स्वयमपि त्वचं लोमच लं नंत इत्यर्थः। यदेताहवै पुरुषो देवेभ्यः करोति तादृग

स्मै देवाः कुर्वंतीतिश्रुतेः। अथ वीणाविशेषस्य वादनं विधत्ते। वाणं वितन्वीसी तो वै वाणं २७

तो महाव्रतमेतेनैवतदंतमभिवादयंतीति। वाणो महावीणा तं वितन्वीति। तं त्रीभिः सी

योऽभ्यवादयंतीत्यर्थः। महाव्रतमक्ष्मेतः। ततैतानां तेनैवांतमभिलक्ष्य वादयंति॥ तस्यवाण

वाणोवीणानां श्रेष्ठः परमः॥ श्रेष्ठ इत्यर्थः॥१

स्यतंत्रीसंख्यां विधायप्रशीसति ॥ ॥ शततंत्रीकोभवतिशतायुर्वैपुरुषः शतवीर्यइति ॥ सर्व
मायुरियंतीतिशेषः ॥ ऋचोनिगदसिद्धः ॥ वाणस्योछ्रेखनीं विधायप्रशीसति ॥ ॥ तां ३ । छिद्रे
ष्वाणाय त्वापानाय त्वा व्यानाय त्वेति प्राणापानव्यानानेव तदाह्वावरुंधेइति ॥ प्राणाय
त्वेत्यादिनामंत्रेण अंगुष्ठपर्वशाखया वाणमुह्लिखति हेवाण त्वां प्राणाद्यर्थमुह्लिखा
मीति ॥ मंत्रार्थः ॥ तत्तेन प्राणादीन्विचाह्वा प्राप्य निरुंधतीति ॥ अथ यजमानपत्न्यास्त्रियउदकुं
नीधारयन्त्योन्वयेयुरितिविचेत्ते ॥ ॥ परिकुम्भिन्यो मार्जालीयंताः इदमद्धि दमद्धि
तिसघोषाएवतद्व्योमत्वासहस्वर्गल्लोकस्यंतीति ॥ इदमद्धि दमद्धितिसंवपुनः

218 पुनर्गार्यीत्यः कुन्तिन्योदास्यः मार्ज्जालीयेधिष्ण्यं संपश्यतिपरिश्रितोन्तर्वेदीतीसर्व्वः।तत्तेनएवंस
शब्दपरिवर्त्तमानेनयजमानाः सघोषाएवसीतः वयः पक्षीणइवोतरिक्षगाभस्वासहसी
२१८ द्योलोकंप्राप्नुवंति। देहावसानइत्सर्व्वः॥ इतिपंचमाध्यायस्यषष्ठः खंडः॥ इदंगंगगवामयन
स्योपांत्यमहर्व्विस्तरेणोक्तं। तथाप्यद्यस्मिन्नार्द्दस्याग्निष्टविकेषु हः सुस्वरसामसुचत्र
न्त्वहंएकमेवब्रह्मसामानीवर्त्तः स्तोत्रीयास्तन्या। अन्याउत्तरस्मिन्पक्षा। सिब्रह्म २१८
सामस्तोत्रीयांवाएव। इंद्रक्रतुन्नआभरेतिसामानिक्त्वाचहंअन्येअन्यदितिचस
र्व्वेस्यगवामयनस्याधारः। तेनतात्कां। अपतस्मिन्नप्रकृतेगवामयनेसंभेस्सहतुत्रस

219

सर्वेष्वहःसुत्याह्नं वैपवमाने अनुष्टुप्सुगौरीवितं सामकार्य्यमितिविधिमुराह ॥ ८३ ॥
देवावैवावैवाचंव्यभजंततस्यायोरसोत्यरिच्यतत गौरीवितमभवदनुष्टुभमनुपरि
प्लवतेवागनुष्टुब्वाचोरसोत्यरिच्यतस्तद्गौरीवितमिति देवाःखलुपुरावाचंछंदोरूपींव्य
भजंतगायत्रींप्रातःसवनेअग्नयेवसुभ्योव्यभजंत।त्रिष्टुभंमाध्यंदिनेसवनेइंद्राय
रुद्रेभ्योव्यभजंत।जगतींतृतीयसवनेविश्वेभ्योदेवेभ्यआदित्येभ्योव्यभजंत।एवंविभज्य
मानायास्तस्यावाचःयोरसःसारोऽत्यरिच्यतैतद्गौरीवितन्नामसामाभवत्।तच्चअनु
ष्टुभमनुलक्ष्यपरिप्लवतेसंचरति।कुतएतत्।यदिदमनुष्टुप्पदःसावाक्गौरीवितंच

वाचो रसः अतो अनुष्टुप्छंदस्कामे वर्च्चआधारतया गच्छति। एवं विशिष्टछंदस्येतच्छा

२१९ मविधाय प्रशंसति। ८॥ यद्गौरीवितेनान्वहं स्तुवते वाचेव तद्वाचा रसं दधातीति।

अभिप्रगोपतिं गिरः। तस्यां योनावुत्पन्नं साम गौरीवितं तच्चानुष्टुप्सु गीयते एवमुहेना

नुष्टुप्सूत्तच्च गेयेमतेन साम्ना अन्वहं गवामयने अहन्यहनि सर्वेष्वहःसु आर्भवे पव

मानेस्तुवत इति यत्तत्तेन वाचेव वाचा रसं सा रं दधाति। निदधाति। एतद्वेदनं प्रशंसति। ॥ २१९

रसवद्वाचा वदति य एवं वेदेति। एवमहं य एवं वेद जानाति स वाचा रसवत्तरस युक्तमेव

वदति। वचनस्य सारवत्त्वेन ग्राह्यवाग्भवत्येतीत्यर्थः। अस्मिन्साम्नि विद्यमानं विहितं निदनम्

प्रशंसति ॥ ७ ॥ एसवदाचावदतियएवं वेदेति ॥ एवमप्रंयोवेदज्ञानातिस्सवाचास्सवतस्सपु
णमेवमवदति ॥ वचनस्यसारवत्वेनग्राह्याचा नवतीत्यर्थः ॥ अस्मिन्नसान्निविघमानेकिंचिदन्न
घप्रशीसति ॥ ७ ॥ द्युदासंनवतिस्वर्गस्यवालोकस्यएतौलोकस्यावसानदर्शौपूर्वलोवपूर्वमह
:स्थैः स्थापयंस्युत्तरेणोत्तरमहरभ्यवदंतीति ॥ दावुदासावुत्तरेपावस्मिन्नसान्निनवतइति
द्युदासंउत्तरेपोनामदीर्घविशेषः ॥ एतावुत्तरेपौस्वर्गस्यलोकस्यावसानदर्शौपारदश्वानौ
तत्रपूर्वेणैवोदासेनपूर्वंवर्तमानैर्हः संस्थापयंति ॥ उत्तरेणोदासेनउत्तरमागामिमहःअ
भिउद्दिश्यअतिवदंति ॥ इदमहरतीत्यप्रतिपादयंति ॥ गोरीवितसामगतावुदासावुपजी
व्यप्रशस्यतद्वातिरेकेबाचोपन्यासेनप्रशंशीसति ॥ ८ ॥ एतद्वैयत्तस्यश्वस्तनय्यद्यौरावि

तमनुसृजेयुरश्वस्तनाग्निप्रजसः स्युरिं। यद्गौरीवितं साम एतत्त्वच्छुयज्ञस्य यज्ञसंबंधि श्व
स्तने श्वः परस्मिन्न् दिने भवे ऋत्वी परयोरन्योः संधायकमिच्छेः यत्र यदितं गौरीवित
 मनुसृजेयुः। परित्यजेयुः। तदा सत्रिणोऽग्न्याः स्तनादुत्तरकाले संबंधरहिता अप्रजसः
प्रजारहिताः स्युर्भवेयुः। अतोऽन्यवहे कर्त्तव्यमिच्छेः। प्रकारांतरेणाप्रशीसति।।[illegible]।। संवा अन्यो
यज्ञस्तिष्ठत इत्याहुर्वागेव नस्संतिष्ठते [illegible] इत्यतियद्गौरीवितमन्वहं भवति वाचमेव
तस्मुनः प्रयुञ्जत इति।। अन्यो वा अन्यो यज्ञः संतिष्ठते वै परिसमाप्त एव भवतीति ब्रह्मवा 
दिन आहुः। तथा अन्येषु तिष्ठमानेष्वपि वागेव नस्संतिष्ठते [illegible] साहुः। यस्माद्वेत
स्माद्गौरीवितं साम प्रत्यह महरहरुपु [illegible] कर्त्तव्यमिच्छन्ती भवति। अत एतत् आद्यं तेऽहनी

मुह्वाक्षाक्षेषु मद्धावर्त्तिष्वहस्सु कर्त्तव्यमिति ज्ञायते। अथ सुज्ञानाख्यं सामान्यच्च हैकार्यमिति
विधित्सुस्तस्यानिधनं विदधाति। स्वर्गिधनमन्वहं नवतीति। सोमः पुनान ऊर्मिणेत्यस्यां
योनावुत्पन्ने सुज्ञाने तस्योपेतिनिधनं तस्य स्थाने स्वरितनिधनं कर्त्तव्यमित्यर्थः। तथा च सूत्रकृ
तोक्तं। उपास्थाने धन्यानि निधनानि स्वरितिप्रकृत्या स्वरं स्वः काशीते देवो दास सुज्ञानयो
श्चेति। अपेतत्त प्रशंसति। देवक्षेत्रं वा एते प्यारोहन्ति ये स्वर्गिधनमुपयन्ति स खलु वै सत्रिणः
सत्र उपयेदित्याऊर्ध्व एनं देवक्षेत्रमध्यारोहयेदिति न वै देवक्षेत्र आसीनस्यार्त्तिमार्छतीति यः स्व
र्गिधनमन्वहं नवति नेव काञ्चनार्त्तिमार्छन्तीति। ये स्वर्गिधनमुपयन्ति। उपगच्छन्ति प्रयुञ्ज
त इत्यर्थः। एतत् देवक्षेत्रं। देवानां स्थानं स्वर्गशब्दवाच्यमेवाप्यारोहन्ति। अपि च। यऊर्जा

नादिः एतान् यजमानान् देवहेत्रं स्वर्ल्लोधिनेनारोहेत्। इति हेतोः अतः कारणात् स एव सात्रि
णोयजमानाः सत्रमुपनयेत्। फलप्रदानशक्तं सोमर्णं प्रयोगं प्रापयेत्। ॐ ब्रह्मवादिनः
किंच न वै देवहेत्रे देवानां स्थाने आसीनः पुरुषः आर्त्तिमार्छति। कदाचिदपि न स्यार्त्तिर्नि
२२१ नवनीसर्छः। एवं सति यत्स्वर्ल्लोधिनमन्वहमनुष्ठितं नवति। तेन कांचनार्त्तिं कामपि हिंसा
ने वाछंति तमप्यामवंति। अस्मिन् स्वर्ल्लोधिने कंचिद्दोषमाशंक्य परिहरति। ॐ॥ एवं ते वा एत
तस्माल्लोकादिस्माउ येस्वर्ल्लोधिनमुपयंतीति यद्वास्वरूपयंत अस्मिन्लोके प्रतितिष्ठंतीति य २२१
दकारोंतरिक्षे यत्साम्नामुष्मिन्सर्वेषु लोकेषु प्रतितिष्ठंति स्वर्ल्लोधिनेन तुष्टुवाना इति॥ अ
न्वहं स्वर्ल्लोधिनमुपयंतः स च एवैते स्वर्गं गच्छंति। अतो ऽस्माल्लोकाच्च्यवंत इत्याउ ब्रे

222

ल्पवादिनस्तस्यायंपरिहारः यदश्वा स्तोत्रीयया स्वरूपयंतिस्वर्लिधनमुपगच्छंतीत्यृ
चि हि स्वर्लिधनं गीयते तेनाऽस्मिल्लोके प्रतितिष्ठंति ॥ ऋचात्मको हि मृत्युलोकः ॥ एसुवरिति
पदे कारस्तत्र विधते तेनांतरिक्षलोके प्रतितिष्ठंति ॥ एवं च स्वर्निधनेन नतु सुवानाः स्तोत्रवं
तः सत्रिणः सर्वेषु लोकेषु प्रतिष्ठितान्भवंति ॥ अथ सुज्ञानं विधत्ते ॥ ७ ॥ सुज्ञानं भवतीति
सोमः पुनान इत्यस्यां उत्पन्नं साम शोभनज्ञान हेतुत्वात्सुज्ञानं ॥ एतदेव माख्यायिकामुखे
न प्रदर्शयति सत्रिणामपि शोभनज्ञान प्राप्तिर्भवति साहाय्यं ॥ ८ ॥ देवा वै स्वर्गं लोकं यतो ज्ञाना
दबिभयुस्त एतत्सुज्ञानमपश्यं ॥ तेन ज्ञात्वं [illegible] गच्छन्त्य सुज्ञानमन्वहं न तिज्ञात्रमे
व गच्छंतीति ॥ देवाः पुरा स्वर्गं लोकं गच्छंतः शंकमानाः त अज्ञानादबिभयुः भीतास्त्रा

२२२
२२२

सन्त्स्वदेतत्सुज्ञाने साम दृष्ट्वाप्रायुंजत। प्रायुंक्त। तेन ज्ञात्रे संज्ञानमैगच्छन्त्प्राणाः। तथा स
ति। इदानीमपि सत्रे अन्वहं सुज्ञानं क्रियत इति यत्तेन ज्ञात्रे ज्ञानमेव गच्छंति सर्वे यजमानाः
॥ इति पंचमाध्यायस्य सप्तमः खंडः॥७॥ ॥ अथ श्यावाश्वमिह व श्वेते द्वे सामनी अन्व
हं नवेतामिति विधित्सुराह॥ ॥ये वा वै वाचमन्नमाद्यं संस्यन्नादा भवंति ये वितर्षयंति स
ह्यानवेतीति॥ ये खलु पुरुषाः वाचमन्नमाद्यंति वागन्नमत्ति तां प्रयुञ्जत इत्यर्थः। ते अन्ना
दा अन्नस्यात्तारो भवंति। ये वा चं वितर्षयंति। निरभिलाषां कुर्वंति। अन्नादिनीं न कुर्वंतीत्य
र्थः। ते सुह्या अन्नराहित्येन पुरुषा अस्निग्धा भवंति। किंच तद्वाचोन्नं तद्दर्शयति॥ ॥जो
राश्वेन। श्यावाश्वमिह व एतानि वै सामानि वाचोन्नमेतेषां वागन्नमदेतानि न श्याव वंतेवा २२२

चमेवतदन्नमादयतितेनसर्वेन्नादानवंतीति॥ सर्वविहितस्यापिगोरीचितस्यपुनःसंपाद
नीएतच्चुसर्च्छं। इतरेएवाप्राप्तत्वात्विधित्सिते। एतानिसामानित्रीणिवाचोरुगात्मिकाया
अन्नंवागुह्वरानिष्पत्तिद्वाराअन्नवदुपकारकं॥ तथाएषांचसाम्नांरुगात्मिकावागन्नंसाधार
णत्वेननतावदुपकारकंएवंपरस्परोपकारकत्वात्साम्नांवाचश्चान्नत्वं। एवंसतिएतानिसा
मानिअन्वहन्नश्चावर्तेते। नगच्छंति। प्रत्यहंप्रयुज्यंतएवेतियत्। तत्तेनवाचमेवान्नमादयति।
साम्नांप्रयोक्ताः तेनसर्वेसन्नियोगान्नादानवंति। अथैतानिप्रकारांतरेणप्रशंसति। ब्रा॥ अभि
क्रांतापक्रांतानिभवंत्यभिक्रांतापक्रांतंवैवाचोरूपमिति। अभिक्रांतमारोहः अपक्रांतमवरोहः।
तदुभयमेतेषुसामसुभवति। किमतोभवति। उच्यते। लोकेभद्रांवाचंपुरुषाअभिक्रामंतीतद्धि

पर्य्ययीपुरुषाः परिक्रामंति। अतो अभिक्रांतापक्रांतैवा। अभिक्रांतापक्रांतान्येवैतान्सामानि
वाचोरूपमनुरूपं भवति। अपपा धीदिने पवमाने स्वहतो यन्त्वहं प्लवः कार्य्य इति विध
२२२ त्ते। ॥ प्लवोन्वहं भवतीति। पुनानस्सोमधारये स्वस्याप्योनावुसन्नेसामप्लवः तत्प्रतिदिवसी
कर्त्तव्यमित्यर्थः। तदेतत् लौकिकप्लवसाम्येनस्तौति। ॥ समुद्रं वा एते प्रस्नांति ये संवत्सर
मुपयंति यो वा अप्लवः समुद्रं प्रस्नाति न स ततउदेति यत्प्लवो भवति स्वर्गस्य लोकस्य समष्ट्या
इति। ये संवत्सरं संवत्सरसाध्यं गवामयनमुपयंति। एते समुद्रमेव प्रस्नांति अवगाहते। स २२३
मुद्रवदस्य सत्रस्यातिगांभीर्य्यात् यः खलु अप्लवः उंडुपरिहतः सन् समुद्रमवगाहते
स ततः समुद्रान्नोदेति नोद्गच्छति निमग्न एव भवति। यस्तु प्लववान्समुद्रं प्रस्नाति स तु स

तः सकाशादुदस्थेव। एवं सति समुद्रकल्पे संवत्सरसत्रे अन्वहं प्लवो न वतीति यत्राते
न प्लवेन संवत्सराख्यं सत्रं तीर्त्वा स्वर्गलोकस्य संप्राप्त्यै यजमाना न वीति। अत्र त्वन्निधन
मन्त्र घप्रशंसति॥ ७॥ अति विश्वानि दुरिता तरेमेति यद् वेषां दुष्कृतं दुःशस्तं तदेतेन
तरन्तीति। अस्य साम्नो निधनं। अति विश्वानि दुरितातरेमेति। अस्मिन् निधने विश्वानि
दुरितानि अतितरेमेत्याशासनं दृश्यते। एषां सत्रिणां यद्दुष्कृतं अयथाशस्त्रं स्तुतं यच्च दुःश
स्तं अयथास्तवनं कृतं। एतेनातितरणप्रार्थनेन तदुत्तरंतीति। अथाभिप्लवषडहस्य प्रथमे
हनि अनुष्टुप्छन्दस्को निधनाख्यं साम कर्तव्यमिति विधत्ते। ८॥ उक्तो निधनं षडहमुखे भ
वतीति। आजामिरकलं अथ्येत इत्येतत् स्तोत्रं योनौ तृचे साम उक्तो निधनं न ...हि ... रति

तमू अभि प्रगायत ९

शंसनं

तिम

निधनं दृश्यते । न स्साम षडहस्य मुखे प्रथमे हनि कार्य्यं तदेतत् स्तौतीति ॥ १३ ॥ परां वा एते प
रावतं गच्छंति ये षडहस्यांतं गच्छंतीयदा को निधनं षडहमुखे न वति प्रज्ञात्या इति ।
२२४ ये सत्रिणः षडहस्यांतं गच्छंति प्रथमे हारि अप्ययावत् षष्ठमहस्तावत् पर्य्यंतं गमनेन त
र्पणं कुर्वन्तीति । ते परां परावतं अतिदूरं गच्छंति । अति दूरं हि गच्छंतीति हि मार्गे ज्ञान प्र ४
मपेक्षितं यतः । षडहमुपखे उ को निधनं भवति । तत्र यदि तस्य प्रज्ञात्यै भवति । कथमो २२४
को निधनेन प्रज्ञातिर्भवितितत्राह ॥ १४ ॥ यदा वै पुरुषस्य मोकं आगच्छति संर्वं त
र्हि प्रजानाति सर्व्वमस्मै द्विवा भवतीति ॥ यदा वै खलु पुरुषः स्वं स्वकीयं गृहं
स्वानं मा आगच्छति प्राप्नोति । तर्हि तस्मिन् काले सर्वं प्रजानाति । स्वगृहं प्राप्तः सर्वं अमा

225

धिको न किंचिन्न ज्ञायते। गृह प्राप्तो सत्यां भ्रमापनोदे सति ज्ञानवानत्र वतीत्यर्थः। सर्वं वि
विद्यमानं वस्तु असौ गृहे प्राप्नोति यद्विवादे वेप्रकाशायन्नवति प्रज्ञातं नवतीत्यर्थः। अ
त उक्तो निश्चयेन यस्य प्रज्ञा॰ तिर्मुक्तेत्यर्थः॥ इति पंचमाध्यायस्याष्टमः खंडः॥ ८॥ उक्तं
गवामयनं॥ अथ तस्य दीक्षाकालमाह॥ एकाष्टकायां दीक्षेरन्निति॥ माघकृष्णाष्टमी
एकाष्टका। उक्तं हि माघ्याः पौर्णमास्या उपरिष्टाद्व्यष्टका। तस्यामष्टमी ज्येष्ठयासीपद्यते।
तामेकाष्टकेत्याचक्षत इति। तस्यामेकाष्टकायां संवत्सरसत्राय दीक्षेरन्॥ ६॥ एषा वै
संवत्सरस्य पत्नी यदेकाष्टके तस्यां वा एता॰ रात्रिं वसति साक्षादेव तत्संवत्सरमार
भ्य दीक्षंत इति॥ ५॥ यत्तया इयमेकाष्टका। एषा खलु संवत्सरस्य प्रजापतेस्तमकस्य

225

पत्नीस्त्री तथा सति। एतस्यामेवैकाष्टकायां। एता ६ रात्रिः अस्यां तस्य योगे द्वितीया। व
सति संवत्सरात्मकः प्रजापतिः शेते। लोके पत्न्याः समीपे हि पती रात्रौ वसति। एवं चै
२२५ काष्टकायां दीक्षमाणाः साक्षात्सत्यमेव संवत्सरं प्राजापत्यात्मकं आरभ्य नीत्वा
दीक्षंते। अस्मिन्पक्षे एको दोषः स्यादित्याह॥ ८॥ तस्य सा निर्य्या पदयो नत्ति न दंतो
न्यवयंतीति। यदेकाष्टकायां दीक्षमाणानां शिशिरश्च वसंतः स्यात्तत्तदा वापी सूर्य
रश्मिभिः शोषितत्वेन आप्लीयस्यात्तद्विषया निर्जलाः परहिता एवावभृथं गच्छंति। २२५
योयमत्तिनंदनाभावः सोऽस्मिन्पक्षे दोष इत्यर्थः। अपरोऽप्ययं दोषः स्यादित्याह॥ ९॥
विच्छिन्नं वा एते संवत्सरस्याभिदीक्षंते य एकाष्टकायां दीक्षंते तन्नावृतं भवतीति॥ सी

माना १

226

वत्सरस्य विच्छिन्नौ विच्छेदमभिमुखीकृत्यैते दीक्षंते। य एकाष्टकायां दीक्षां कुर्वंति। कुत
एतत् उच्यते। मधुश्च माधवश्च वासंतिकावृतू इत्यादाविव अत्र ऋतुशब्देन मास ए
वोच्यते। यावेतौ माघफाल्गुनौ मासौ ऋतुशब्दवाच्यौ एतावंतनामानौ। शिशिरः संव
त्सरांत इति। तौ मासावंतशब्दवाच्यौ तयोर्हि संवत्सरः समाप्यते। तथा चैकस्मिन्
संवत्सरे सत्रारंभः अपरस्मिन् यजंत इत्यत आह। । आर्त्तं वा एते संवत्सरस्या
भिदीक्षंते येंतनामानावृतू दीक्षंत इति। ये अंतनामानो अंतशब्दवाच्यौ। ऋतू मासा
वभिलक्ष्य दीक्षंते। एते संवत्सरस्यार्त्तं हि संतमेवाभिलक्ष्य दीक्षंते। एवं दोषप्रसक्त्वादयं
पक्षो न कार्य्य इत्याह॥ । तस्मादेकाष्टकायां न दीक्ष्यमिति॥ यस्मादेते पूर्वोक्ता दोषाः

अभि॰

226 प्रसज्येरन्न् । तस्मादेकाष्टकायां न दीक्षेत । दीक्षणीयं न कार्यं । एवं प्रथमपक्षं निंदित्वा
पक्षांतरमाह ॥ फाल्गुने दीक्षेरन्निति । यस्मिन्मासे फाल्गुनी पौर्णमासी युज्यते
२२६ स फाल्गुनस्तस्मिन्दीक्षा कार्या ॥ तदेतत्कुलकपनेन प्रशंसति ॥ ॥ मुखं वा एतत्संव
त्सरस्य यत्फाल्गुनो मुखत एव तत्संवत्सरमारभ्य दीक्षंत इति ॥ यत्तु फाल्गुनो मा
मुखं ४ सं एते संवत्सरस्य यदुत्तरे फाल्गुनी मुखत एव संवत्सरस्याभिमा चायेति । एतदुक्तं
भवति । यदा फाल्गुनी पौर्णमासी युज्यत उत्तरा फाल्गुनी युक्ता तदा फाल्गुनमासः संवत्सर २२६
स्यादिर्भवतीति । तत्र यथासति मुखत एव प्रथमत एव संवत्सरमारभ्योपक्रम्य दीक्षंते ।
तस्मिन्पक्षे सिदोषो विद्यत इत्याह । ॥ तस्य सा निर्व्यायस्मन्मेघे विषुवान्संपद्यत इति

आदित्यस्तुतोहिविषुवान्तस्यमध्येरंतद्धनिसंनाम्नीतेइतियत्तत्सदोषस्यादित्युक्तः।तर्हिसर्व
दोषविनिर्मुक्तोदीक्षायाःकालःकइत्याशंक्याह॥७॥चित्रापूर्णमासेदीक्षेरन्निति॥चित्रायु
क्तःपौर्णमासःचित्रापूर्णमासः।तस्मिन्दीक्षेरन्।तदेतत्सौति॥[illegible]चक्षुर्वाएतत्संवत्सर
स्ययच्चित्रापूर्णमासोमुखतोवैचक्षुर्मुखतएवतत्संवत्सरमारभ्यदीक्षन्तेतस्यानिर्यास्ति
ति।चित्रापूर्णमासइतियत्रएतत्संवत्सरस्यचक्षुर्वैजायमानस्यहिप्रथमंमुखंजायतेतत्रा
पिचक्षुरेवप्रथमम्आविर्भवति।अतस्तत्सादृश्यादस्यचक्षुषःउक्तक्रमेणमुखतोमुख
प्रदेशएवचक्षुः।अतोमुखतएवतत्संवत्सरमारभ्यगृहीत्वादीक्षन्ते।यःफाल्गुनेगु
णःउक्तःसोऽप्यत्रविद्यतइत्युक्तंभवति।तस्यननिर्यास्ति।कश्चिदपिदोषोनविद्यते।इत्थं

पौर्णमास्यां दीक्षितव्यमिस्यकं। अथ तस्मिन्नेव मासे एकादश्यां दीक्षितव्यमित्याह॥
एका। चतुरहे पुरस्तात्पौर्णमास्या दीक्षेरन्निति। चैत्र्याः पौर्णमास्याः पुरस्ताच्चतुरहे चतुर्णा
मह्नां समाहारश्चतुरहस्तस्मिन्विद्यमाने गवामयनस्य दीक्षा कार्या। एवं दीक्षणस्य गु
णमाह॥ तेषामेकाष्टकायां क्रयः संपद्यते तेनैकाष्टकान्न छंबट्कुर्वन्तीति॥ सर्वेषां
सत्त्राणां द्वादशदीक्षा भवति। तत एकादशीप्रभृति द्वादशसु रात्रिषु त्रयोदशी रात्रि
रष्टमी स्यात्। एकाष्टका च बहुलाष्टमीति। अस्यामेकाष्टके सोमक्रयः। तस्यां क्रयः
संपद्यते। प्रथमेहन्युपसर्जिने राजक्रये तस्मिन्नदिने प्रातःकाले प्रायणीयाद्याय स्त्राव
यवाः प्रक्रम्यीते। तेन प्रक्रमेण एकान्न छंबट्कुर्वन्ति। क्रियानुपयोगेन व्यर्थं न कुर्वन्ति। अ
227

दि॰ एका॰

तद्एकाष्टकायां परं न क्रतोर्गुणभूतास्मिन्नपक्षे तद्भवतीत्यर्थः। अन्येपि शुक्लोश्चस्मिन्नपक्षे सीतीत्या
हा॥ ७॥ तेषां पूर्वपक्षे सुत्यासंपद्यते पूर्वपक्षे मासाः संतिष्ठमानायंति पूर्वपक्षउत्तिष्ठंति
तानुत्तिष्ठतः पशवउपधयोनूत्तिष्ठंतीति तात्का॰ न्यायलिवागमि वदंत्समसुवीमसत्रेणाद्रदिति तेस
मृद्धंतीति॥ ८॥ तेषामेकादशपदाद्द्रमाणीनीसुत्यासोमयागः पूर्वपक्षेसंपद्यते। सत्राणी
सर्वेषां द्वादशोपसदः तत्राष्टमीप्रभृति द्वादशसु गतासु गतास्तु त्रयोदशीषु शुक्लपक्षपंचमी
तस्यां प्रथमोतिरात्र इति पूर्वपक्षे सुत्याप्रारभ्यतइत्यर्थः। त्रिंशता त्रिंशता होमिर्मासेषु
संतिष्ठमानेषु पूर्वपक्षे एव सर्वे मासाः संतिष्ठमानायंतिवर्त्तते। एवं द्वादशसु मासेषु गतेषु
पूर्वपक्ष एव सत्रादुत्तिष्ठंति तानुत्तिष्ठतः सत्रादुत्थानं कुर्वतो यजमानाननुपश्चात् पशव

उभयथयश्चोत्तिष्ठति। उर्ध्वीरोहतितान्यजमानान्कल्याणीशोभनावाक् यशस्करी वाग्गवदति।
किमितिइमेसत्रिणोयजमानाःअराधुःसमृद्धाअभवन्निति तदनंतरं ते सत्रिणो राध्नुवंति। स
२२८ मृद्धा भवंति॥ इति पंचमाध्यायस्य नवमः खंडः॥९॥ उक्तो गवामयनस्य दीक्षाकालः। अथ तस्मिन्ने
228 व गवामयने विकल्पेन मासि मास्येकमहरुत्सृजेयुरिति विधास्यन्नाह॥१०॥ आवा एते संव
त्सरं प्याययंति य उत्सृजंतीति। ये अहान्युत्सृजंति। एते संवत्सरमाप्याययंति। छिद्रवान्हि देहो २२८
रसाद्दिलिराप्नौं एवमेतं संवत्सरमप्येकैकेषां छिद्रकामुत्सर्गो यासंवत्सरश्छिद्रवत्तेनाप्या
यितो भवति। अनुत्सर्गे बाधमाह॥११॥ यथा वै दृतिराध्मात एवं संवत्सरोऽनुत्सृष्टो यजमानो
त्सृजेयुरेवमेवेन अप्रमायुकाः स्युरिति। यथा चर्ममयी दृतिराध्मातः। छिद्रराहित्येन वायु
भवति। एवमनुत्सृष्टः संवत्सरोपि तद्वद्भवति।

229

नानुस्रितः। एवमक्षाम्य स्वज्ञेनानावेसीवत्सरोप्याभातोनवति। एवंस्थितेयद्यद्यहानिनोस्य
जेयुः। अमेहेनभ्यापानकृतेनेदावर्तीकृत्यनरोगणाप्रमायुकाः मरणशीलाः स्फुर्द्धेवेयुः स
त्रिणः। अतोऽहउत्सर्गः कर्तव्य इत्यर्थः। तथाप्रकारेणैतत्प्रशंसति। कः प्राणो वै संवत्स
रउदानामासा यद्युत्सृजेतिप्राणाएवोदानान्दधतियावदीप्सितः प्रमीयते याः संवत्सरस्याद्
स्यष्टस्यप्रयुक्तात्मकनीतिदेहधारकः प्राणएवसंवत्सरउदानाः उर्द्धगमनादिप्रवृ
त्तिहेतवः। तस्य दत्तयः। उदानामासाः। एवंस्थितेमासेग्रहानितियद्युत्सृजेयुः। तेनउदानांस्ति न
मितान्प्राणांवदधति धारयंति। अतउत्सृष्टेषुउर्द्धगमनेनस्तैमिर्त्यंजावासाणसकाशाडुदा
नान्निर्गतास्फः। अपिच। अहोभिरनुष्टुप्स्यसंवत्सरस्ययाम्स्वक्षुशोषकः सातमन्वतिप्रा

ए२

नोति। यो दीक्षितः। स अमध्य प्रमीयते। म्रियते। तस्मादहन्युत्सर्जनं कार्यमिति स्मृतौ भवति। अथ किं
कृत्स्नमहरुत्सृज्यं। उत किंचिदवोत्सृज्यमिति जिज्ञासायां ब्रह्मवादिनां विचारं दर्शयति।। छ।।
२२९ तदाहुरुत्सृज्या३ं नोत्सृज्या३मितीति।। त तत्र गवामयनविषये ब्रह्मवादिन आहुः। किमि
२२९ ति। किं कृत्स्नमहरुत्सृज्यं। उताहोः किंचिदवोत्सृज्यमहस्तनोत्सृज्यमिति। अस्यान्तरे तुप
द्वयदर्शनाद्ब्रह्मवादिनां विचारः विचार्यमाणेनामिति श्रुतिः। तत्र न सर्वमुत्सृज्यं। अ
पि तु किंचिदेवोत्सृज्यमिति। पक्षमवलं ब्याह।। छ।। यदेके उत्सृजेयुरहन्यनुत्सृजेयुस्तदेवो २२९
त्सृज्यमिति। यद्यहन्यनुत्सृजेयुः। यदीति वचनाद्यमुत्सर्गपक्षो वैकल्पिक इति गम्यते।।
तस्मिन्पक्षे उक्थसीस्थेष्वहस्सु उक्थ्याग्निष्टोमसाम्नः पराणि स्तोत्राणि शस्त्राणि चोत्सृजे

द्विष्टं तदनु २

230

रन्। तद्वाहरुक्तषष्ठमग्निष्टोमसाम्नः परस्य प्रयोगस्य परिपरिहागात् उक्तदर्शनं भवति। तस्य
यन्तस्यानुष्ठानात् अनुक्तदृष्टं च भवति। अथास्मिन्नपवादे प्रकारान्तरेणोत्सर्जनानुत्सर्जने
दर्शयिष्यति॥ अथो खल्वाहुरेकत्रिकं कार्यं तदेव साहादुक्तषष्ठमध्नुतुष्वेवेतीति॥ अ
थो खल्विति पक्षान्तरपरिग्रहे अहरुत्सर्गपक्षे एकत्रिकमेव स्तोमं कार्यं। उक्तषष्ठ्येह
नि विषमेषु स्तोत्रेष्वेकैव स्तोत्रीयास्यात् समेषु च तिस्र इत्यर्थः। तत्र च साहादेव स्वीय
स्य स्तोमस्योत्सर्गः। कृत इत्यत्र उक्तषष्ठे स्तोमम भिप्लव्यम ध्नुतुष्वेवेति। सवनात्सवनादुप
रि सुत्त्वीति अभिप्लवं कुर्वन्तीत्यर्थः। एवं स्तोममात्रस्योत्सर्जनादन्येषां स्तुतशस्त्राणां अ
नुत्सर्जनाद्व्रतदहरुक्तपृष्ठमनुक्तदृष्टं च भवति। अथ पक्षान्तरविधित्सया मे पक्षे दूषय

ति ॥ ७ ॥ छिद्रो वा एतेषां संवत्सरः स्यादुप्य सोममुत्सृजेतानीति । य उत्सृप्रकारीतेरणस्तो
म ठ हृत्सृजेति । एतेषां संवत्सरः संवत्सरसाध्यो यागः छिद्रो वै छिन्नाव यपवा एव भवतीति भ्र
२३० ल्मवादिन आहुः अतः अहरेवोत्सृज्यमिति । अयमेव पक्ष आदरणीयः । अस्मिन्पक्षे
छिद्रपिधानाय कर्तव्यं संक्षिप्तं प्रयोगमाह ॥ ८ ॥ पशुमालभन्ते सोममेव तदालभन्ते सोमो
230 हि पशुरिति । यदहरुत्सृजेयुः तामयीतेत स्याकः सवनीयं पशुमेवालभन्ते । तत्रेन सोममेवाल
भन्ते । सोमग्रहणं शस्त्रादीनामप्युपलक्षणार्थं सोमो हि पशुः पशुर्वै देवानां श्री २३०
तिकरत्वात् । अतः पश्वनुष्ठानेनैव सोमादिकं सर्वमनुष्ठितं भवतीत्यर्थः । अथ तस्मिन्न
हनि प्रातःसवनप्रयोगमाह । य उत्सृष्टा स्म इति वत्सानपाकुर्वंति प्रातःपशुमालभन्ते

तस्यवपयाप्रचरंति ततस्सवनीयेनाष्टाकपालेन ततआग्नेयेनाष्टाकपालेन ततोदध्नैंद्रे
त एतैश्चरुणोवैश्वदेवेन ततःप्रातःसवनःसीतिष्ठतइति।अश्वःपरेद्युरहःउत्सृष्टाःस्मःअ
रूत्सर्जनंकरिष्यामइतिबुद्ध्यापूर्वस्मिन्नेवाहनिवत्सानपाकुर्वंति।सायंदोहार्थमस्मात्प्रा
प्तपकुर्युः।उत्सृष्टास्मइतिसृजेरुद्उत्तमबहुवचनेरूपमेतत्।अनेनविहितस्यवत्सापा
करणस्यदोहार्थत्वात्सायंदुग्धान्तत्पयोदधिकुर्वंतिइत्युक्तंभवति।ततःप्रातःका
लेउत्सृष्टवत्स्याक्वायःसवनीयःपुरुस्तमालभंते।आलंभनस्ययागार्थत्वादालंभना
दीसंस्कारान्कुर्युरित्यर्थः।ततस्तस्यपशोर्वपयाप्रचर्यततःसवनीयेनाष्टाकपाले
नअष्टसुकपालेषुसंस्कृतेनपुरोडाशेनप्रचरंतिततोऽन्येनाग्नेयेनाग्निदेवत्येनाष्टाक

पालेनततऐंद्रेणाद्दष्ट्वाततोवैश्वदेवेनचरुणाप्रचरेयुः॥तत्रैतेनानुष्ठानेनप्रातःसवनंसंति
ष्ठतेसमाप्यते॥अथमाध्यंदिनसवनस्यप्रयोगमाह॥७॥ततःपशुपुरोडाशेनैकादशक
२३१ पालेनततस्सवनीयेनैकादशकपालेनततोमरुत्वतीयेनैकादशकपालेनततश्चरुऐं
द्रेणतन्माध्यंदिनंसवनंसंतिष्ठतइति॥ततोमाध्यंदिनसमयेपशुपुरोडाशेनयद्देव
231 त्यःपशुस्तद्देवत्येनैकादशसुकपालेषुसंस्कृतेनपुरोडाशेनप्रथममिष्ट्वाततःसवनीयेनै
न्द्रेणैकादशकपालेनप्रचर्यततोमरुत्वतीयेनमरुत्वद्गुणविशिष्टेनैंद्रदेवत्येनैका २३१
दशकपालेनप्रचर्यततःकेवलेंद्रदेवत्येनचरुणाप्रचरेयुः।तत्रैवमेवमाध्यंदिनंसवनं
परिसमाप्यते॥अथतृतीयसवनकृत्यमाह॥८॥पशुनाप्रचरंतिततःसवनीयेनद्वाद

232

शकपालेन ततो वैश्वदेवेन द्वादशकपालेन ततश्च रुणो ग्निमारुतेन तत्तृतीयसवन ७ सेति
घृतइति॥ पशुना पश्चवयवैः हृदाद्यंगैः प्रथमं प्रचरंति। ततः सवनीयेनैंद्रेण पुरोडाशेन द्वा
दशकपालेन। प्रकर्ष ततो वैश्वदेवेन विश्वेदेवादेवत्येन द्वादशकपालेन प्रचर्य्य। ततोग्निमरु
द्देवत्येन चरुणा प्रचरेयुः। तत्तावत्ते वत्तृतीयसवने परिसमाप्यते। एवं सवनत्रयपरिसमा
प्येयत्न सायंकाले कर्त्तव्यं तद्दर्शयति। ७॥ दृषदाज्येन प्रचर्य्य पत्नीस्सयाजयन्तीति॥ दधि
मिश्रमाज्यं दृषदाज्यं तेनानुयाजान् इष्ट्वा ततः पत्नीस्सयाजयंति। पत्नीसंयाजांतमहः
समापनीयइत्यर्थः॥ ॥इतिदशमःखंडः॥१०॥ वेदार्थप्रकाशेन तमो हार्दं निवारयन्। पु
मर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ ॥इतिश्रीमद्भाराधिराजपरमेश्वरवैदिकमा

र्गप्रवर्त्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेणसायणाचार्य्यविरचिते माधवीये सामवेदा
र्थप्रकाशे तांड्यमहाब्राह्मणे पंचमोध्यायः॥ ॥समाप्ता प्रथमपंचिका॥ ॥श्रीशुभं भवतु॥ २३२
॥ मिठा भटेन लिखितं॥

२३२

प्रजापतिरकामयत बहुः स्यां प्रजायेयेति स एतमग्निष्टोममपश्यत्तमाहरत्तेनेमाः प्रजा असृजतेति ॥ २

॥ श्री ॥ ॐ नमः श्री ढुंढिराजाय ॥ ॥ द्वितीयापंचीका आरभ्यते ॥ यस्य निःश्वसितं वेदा यो वेदे
भ्योऽखिलं जगत् ॥ निर्ममे तमहं वंदे विद्यातीर्थं महेश्वरम् ॥ चतुर्थपंचमे वेवं गवामयनमीरि
तं ॥ सर्वप्रकृतिभूतोयमग्निष्टोम इहोच्यते ॥ तमेतमग्निष्टोमं विवक्षुराह ॥ ॐ ॥ प्रजापति
र्ब्रह्मा हिरण्यगर्भ अकामयत कामितवान् ॥ किमिति उच्यते ॥ बहुः स्यां इदानीमेक एव सन्नानारू
पो स्यां विभवेयं ॥ तदर्थं प्रजायेयेति स्वरूपानुपमर्देनैव प्रकर्षेण नानारूपेणोत्पद्येयमिति ॥ स ए
वं कामयमानः एतमग्निष्टोमं प्रजननसाधनरूपमपश्यत् दृष्टवान् ॥ यज्ञायज्ञा व इत्य
स्यामाग्नेय्यामुत्पन्नेनाग्निष्टोमसाम्ना समाप्तेरस्याग्निष्टोम इति नाम संपन्नं तमग्निष्टो
ममाहरत् अन्वतिष्ठत् ॥ तेनाहृतेन इमा दृश्यमानाः प्रजाः असृजत सृष्टवान् ...

स्मात्प्रजापतिराहरत्॥ तस्मादन्यैरयमग्निर्मोऽनुष्ठातव्य इति विधिरुन्नेयः। पतनुस्तु यतेतद्वि
धीयत इति न्यायात्। कथं प्रजाः सृष्टवानित्यत्राह॥ क॥ एकादशेन चैव सतां स्तोत्रेणा
२३२ ग्निष्टोमस्यासृजतैकादशेन च मासा संवत्सरस्य तां द्वादशेन च स्तोत्रेणाग्निष्टोमस्य पर्य
गच्छत् द्वादशेन च मासा संवत्सरस्येति॥ सं त्वग्निष्टोमे द्वादश स्तोत्राणि। द्वादशाग्निष्टो
मस्य स्तोत्राणीति श्रुतेः। तत्रैकादशेनैव स्तोत्रेणाग्निष्टोमस्य संबंधिना तथा संवत्सरस्य
गवामयनसत्रस्य संबंधिना एकादशेन च मासा मासेनोर्ध्वां सिसृक्षुः प्रजापतिः ताः प्र २३३
जा असृजत। एवं गवामयनप्रस्तावे गवामयनेन सर्वमसृजतेति वर्णितत्वात्। तदेवमेव
न तेन एकादशेन मासेन सह। इदानीं स्वष्टाभिधानं एकादशस्य स्तोत्रस्य स्तुत्यर्थमेव

234

आन्म सात्क न मन लोके एकादशा द्वादशयोर्मासयोरनतिक्रमेण प्रसवः प्रजायते ॥ २

पुत्तरश्चापि इष्ट्वी। ताः सृष्टाः प्रजाः अग्निष्टोमस्य द्वादशेन चस्तोत्रेण। सैव संवत्सरस्य गवाम

२ यनैस्य द्वादशेन मासा मासेन पर्य्यगृह्णाति। उक्तलक्षणेनानुष्ठानेन लप्सत इति प्रशंसति।

तस्मात्प्रजा दशमासो गर्भं भृत्वैकादशमनु प्रजायन्ते तस्माद्द्वादशन्नात्यति हरीति द्वादशेन

हि परिगृहीतास्तद्य एवं वेद परि प्रजाताः प्रजा गृह्णाति प्राजा ताजैंयतीति। यस्मात्प्रजाप

तिरेकादशेन प्रजा असृजत तस्माल्लोके प्रजाः स्त्रियः दशमासो दशमासान्गर्भं भृत्वा

धारयित्वा एकादशमनु एकादशे मासि प्रजायन्ते प्रजनयन्ति। यस्मात्द्वादशेन प्रजापतिः

पर्य्यगृह्णात्तस्माद्द्वादशमासे अनिलत्वीकस्य नातिहरति गर्भं न धारयन्ति। अनतिक्र

मणे कारणमाह। हि यस्मात् द्वादशेन स्तोत्रेण परिगृहीताः प्रजाः परिगृह्णाति। परि ग्रहं के

रोति ॥ न कदाचित्तं परित्यजतीत्यर्थः । किंच जाता ऽश्वतरूसता: प्रजा: प्रजनयति । उत्पादयति । अथ
प्रजापते: सृष्टिप्रसंगेन किंचिदर्थमाह ॥ ६ ॥ तासां परिगृहीतानामश्वतर्य्यसंक्रामत्तस्या
२३४ अनुहाय रेत आदत्त तद्वडवायान्न्यमार्द्रं तस्माद्वडवा द्विरेतास्तस्मादश्वतर्य्यप्रजा आ
त्तरेता हीति । तासां प्रजापतिना परिगृहीतानां प्रजानामश्वश्वतर्य्यस्य क्रामत् अति
235 क्रम्यागच्छत ॥ तामनुहायानुगम्य तस्या रेत: प्रजोत्पादनसाधनं वीर्य्यमादत्त स्वीकृत
वान् । आदाय वडवायामन्यमार्द्रं निमार्जनं स्थापनमकरोत् । यस्मादेवं तस्माद्वडवा द्विरे २३६
तास्वकीयरेतसा सह द्विरेता अभवत् ॥ अश्वमश्वतरं च रेतोद्वयसामर्थ्यात् प्रसूत इत्य
र्थ: । रेतसः ग्राहृतत्वात् । अश्वतर्य्यप्रजा आत्तपशा अभवत् । अश्वतर्य्य: कदाचिदप्य

235

तरो न्यो ष्यो वा न जायत इत्यर्थः। साग्नात्तरेता हि परित्यक्तप्रजननसामर्थ्यो खलु। अयमर्थः
सर्वोऽपि तैत्तिरीयके स्पष्टमाम्नायते। अग्निष्टोमेन वै प्रजा असृजत ता अग्निष्टोमेनैव पर्य
गृह्णात्। तासां परिगृहीतानामश्वतर्य्यः सत्क्रामन्तस्ता अनुहाय रेत आदत्ते सादिना। अत्र
या स्यादक्षिणो न हि तां विषयविशेषेण दर्हतां वाह॥७॥ तस्मादुद्दक्षिणीयास्ति हिसायद्
मरिक्ष्यतातिरिक्त स्यदक्षिणो स्यास्सलोमत्वाय षोडशिन स्तोत्रे दयातिरिक्तो वै षोडश्य
तिरिक्त एवातिरिक्तं स्यद दद्यातीति॥ तस्मादु तस्मादेव वहेतोरश्व ते श्वतदक्षिणा या दक्षि
णा या मन्नर्हति स्मादिस्तत्तं वि वृणोति॥ हि यस्मात्तस्ता यष्टं यष्टव्यो प्रजा नति मन्त्रस्सरिच्यत। अ
तिक्रम्याऽगच्छत। यद्दो वै प्रजापतिरिरिति हि श्रुतिः। अत एवाय स्येयदतिशीर्ष्णो तस्य दक्षिणोस्या।

रा। अतिरिक्तायाद्दक्षिणा कल्प्यं तं सलोमत्वाय। आनुलोम्याय सा दक्ष्यायनवतिः। कोसावतिरिक्तः
प्रदेशः यस्मिन्नसादीयते। तमाह। षोडशिनो यज्ञस्य स्तोत्रे सादेयादातव्ये षा तस्मिन्कैर्यागे व
२ २३५ पंचदशभिः स्तोत्रैः क्लृप्ते षोडशकुद्यादिष्वप्यक्के षोडशिस्तोत्रमतिरिक्तं भवति। तदेवाह। यत्षोड
शं स्तोत्रमतिरिक्तं तच्चाश्वतरीं दद्याद्यजमान अतिरिक्तं भवति षोडशिनि अतिरिक्तामिमीं द
दाति। प्रयच्छति इत्थं प्रासंगिकं परिसमाप्य प्रकृतमनुसरति। प्रजापतिः प्रजाः सृष्टि साधनं से
नाग्निष्टोमम पश्यत् तेन प्रजा असृजत इति। याग्निष्टोमउक्तस्तस्य त्रिवृदादिभिः स्तो २३५
मैर्गायत्र्यादिभिश्छंदोभिरग्न्यादिदेवैरन्यैश्च ब्राह्मणादिभिः साध्यत्वात्तेषां सृष्टि
क्रमेण त्रिवृच्चतुरादेस्त्रिवृज्जायत्यादिसंपत्तीसृष्टिमाह॥ ७॥ सोकामयप्र ८ सृजेयेति

236

न्वे ता
समुखत एव त्रिवृतमसृजतेतं गायत्री छंदोसृ ऽग्निर्देवता ब्रांह्मणो मनुष्यो वसीत ऋतु

स्तस्मात्त्रिवृत्स्तोमानां मुखं गायत्री छंदसामग्निर्देवतानां ब्राह्मणो मनुष्याणां वसंत

ऋतूनां तस्माद्ब्राह्मणो मुखेन वीर्यं करोति मुखतो हि सृष्टः इति। स प्रजापतिरकामयत

किमिति सर्वसाधकं यज्ञं सृजेयेति। स एतमग्निष्टोममपश्यत् तमाहरदित्स्फत्तेस्ये वे

दविवरणं॥ स प्रजापतिः मुखत आस्यान्नेमुखाद्देवैस्त्रिवारमावृत्तित्रयसाध्यमेतन्ना त्रिवृतं५

मकं स्तोममसृजतत त्रिवृतमनुपश्चाद्गायत्री छंदः गायत्रं नाम छंदोऽसृजत। तदनु अ

ग्निर्देवतान्वसृज्यतत मनु मनुष्यो ब्राह्मणोन्वसृज्यत॥ तथा तमनु वसंताख्य ऋ

ऋतुरसृज्यत तस्माद्यदेते मुखत एव सृष्टाः। तस्मादेते त्रिवृदादयः स्वस्वजातीयानाम
य

ष्ठो मुख्यात्सृजनवत्ता । त्रिवृदादीनाम्मुख्यानाम्मध्ये ब्राह्मणस्य मुख्यत्वप्रयुक्तं वीर्यं लोक
सिद्धं दर्शयति । तस्मान्मुखसृष्टत्वेन मुख्यत्वात् ब्राह्मणो मुखेनेदानीमपि वीर्यं स्वाध्या
यप्रवचनादिजन्यसामर्थ्यं करोति । तस्मान्मुखसृष्टत्वेन मुख्यादित्युक्तं विवृणोति । हि य
२२५ स्माद्ब्राह्मणो मुखतः सृष्टस्तस्मादित्यर्थः । उक्तार्थविदुषः फलमाह ॥ ॥ करोति मुखेन वीर्यं
226 य एवं वेद ॥ एवमुक्तमर्थं यो वेद सोपि मुखेन वीर्यं करोति । मुखसाध्येन स्वाध्यायप्रवचना
दिनैवाभीष्टं साधयतीत्यर्थः । अथ पंचदशस्तोमत्रिष्टुभादीनां सृष्टिमाह ॥ ॥ स उरस्त ए २२६
व बाहुभ्यां पंचदशमसृजत तं त्रिष्टुप्छन्दोन्वसृज्यत इंद्रो देवता राजन्यो मनुष्याणां ग्रीष्म ऋ
तुस्तस्माद्राजन्यस्य पंचदशस्तोमास्त्रिष्टुप्छंद इंद्रो देवता ग्रीष्म ऋतुस्तस्माद्बाहुवीर्यो

~~दुर्बो~~ बाहुभ्यां हि सृष्ट इति। स प्रजापतिरुरस्त एव तस्यैव व्याख्यानं बाहुभ्यामिति।
पंचदशस्तोमं तच्च गतानां तिसृणामृचां त्रिष्वपि पर्यायेषु पंचवारावृत्तिः सा चैव पंचदशस्तो
~~मं तच्च गतानां तिसृणामृचां त्रिष्वपि पर्यायेषु पंचवारावृत्तिः सा चैव~~ पंचदशस्तोममसृजत
। एवमुत्तरत्र सप्तदशादीनामावृत्तिप्रयुक्तसंख्यावत्त्वमिति द्रष्टव्यं। तमनु त्रिष्टुप्छंद इत्यादि
ग्रीष्म ऋतुरित्यंतः पूर्ववद्योज्यः। तस्माद्यस्मात्पंचदशादीनां राजन्येन सहोत्पत्तिः तस्माद्रा
जन्यस्य पंचदशादयो भवंति। तेषां पंचदशादीनां राजन्यसंबंधः श्रुतिषु प्रसिद्धः। वसंते हि
ब्राह्मणमुपनयीत ग्रीष्मे राजन्यं। ग्नीनादधीत। ग्रीष्मे राजन्य इत्यादिना राजन्यसंबं
धः। एवं प्रथमेपि पर्याये ब्राह्मणस्य त्रिवृद्गायत्र्यादीनां विशेषसंबंधोऽवगतः। तस्माद्बा

वसंते ब्राह्म २

ऽुवीर्यमित्यादि स्पष्टं । अथ विदुषः फलमाह ॥ ७ ॥ करोति बाहुभ्यां वीर्यं य एवं वे-
देति । स्पष्टं । अथ सप्तदशादिसृष्टिमाह ॥ ८ ॥ स मध्यत एव प्रजननात्स-
२३१ 227 प्तदशमसृजत तं जगती छन्दोऽन्वसृज्यत विश्वेदेवा देवता वैश्यो मनुष्याणां वृष्णी
स्तु तस्मात्स वैश्योऽद्यमानो न क्षीयते प्रजननाद्धि सृष्टस्तस्मादु बहुपशुर्वैश्वदे- ष
गतो वो हि जागतो वर्षा ह्यस्यर्तुस्तस्माद्ब्राह्मणस्य च राजन्यस्य चाद्यो धरो हि सृष्टः इति ।
स प्रजापतिर्मध्यतो मध्यदेशाद्देवतस्यैव व्याख्याने प्रजननात्सप्तदशं ८ सोऽमृम- २३१
सृजत । तमनु जगती छन्दोऽन्वसृज्यत । तदनुक्रमेण विश्वेदेवा देवता वैश्यो मनुष्याव-
र्षी ऋतुश्चान्वसृजीत । तस्मात्सृजोत्पादकप्रजननाद्युत्पन्नत्वात् वैश्यजातीयोऽद्य

मानोन्नस्य मानो राजादिभिर्द्विरपद्रियमाणोपि न क्षीयते। किंतु पशुपालनादि
नासमृद्धो भवत्येव। तत्र हेतुः प्रजननादि सृष्ट इति। तस्मादुत्स्मादेव कारणात्तस्य वै
श्यो बहुपशुर्भवति। तत्रोपपत्तिरुच्यते। वैश्वदेवो हि जागतो विश्वेर्देवैः सह सृष्ट
त्वात्। असावपि वैश्वदेवस्तस्मादि सृष्टः। वैश्वदेवत्वमस्य बहुपशुत्वे हेतुः। जागतः
जगत्या सहोत्पन्नत्वात्। असौ जगती संबंधो भवति। वर्षाह्यस्यर्तुरित्ययमपि ब
हुपशुत्वे हेतुः। एतत्तु स्तोमसंबंधस्याप्युपलक्षणं। अनेन वैश्यस्य सप्तदशस्तोम
जगतीछंदः प्रजननी च विशेषसंबंधो भवति। तस्मादपि पूर्वस्य पृष्ठस्य ब्राह्मण

तस्य च राजन्यस्य चाद्योदनीय उपजीवनीयो भवति। तस्माद्धित्येकस्य हेतुर्विहरोति। ६ यस्मा
द्धर्तःपश्वाद्भावीनि सृष्टाः सृष्टस्तस्मादित्यन्वयः। आपैकविंशस्तोमादिसृष्टिमाहा ७
२३८ 238 सपत्त एव प्रतिष्ठाया एकविंशमसृजत तमनुष्टुप्छन्दोन्वसृज्यत न काचन देवतान्व
शूद्रो मनुष्यास्तस्माच्छूद्र उत बहुपशुरयज्ञियो विदेवो हि न हि तं काचन देवतान्वसृ
ज्यत तस्मात्पादावनेज्यं नातिवर्द्धते पत्तो हि सृष्टस्तस्मादेकविंशस्तोमानां प्रतिष्ठा
प्रतिष्ठाया हि सृष्टस्तस्मादनुष्टुब्नैर्छन्दांसि नानु व्यूहति पापवसीयसो विधृत्यै २३८
इति स प्रजापतिः पत्त एव प्रतिष्ठायै ति परस्परं सामानाधिकरण्यं पादयोः प्रति
ष्ठात्वं स्पष्टं। प्रतिष्ठारूपाभ्यां पादाभ्यामेकविंशस्तोममसृजत तमनुष्टुप्छ

६१ ६२

दोन्वसृज्यत तदनु इतरेष्वपि वचात्र काचन देवता न सृष्टा । किंतु शूद्रो मनुष्यान्वसृज्य
त । तस्मात्सर्वदैव स्वभावात् शूद्रा उत बहुपशुः पशुबहुत्वोपेतोऽपि अयज्ञियो य
ज्ञानर्हो भूत् । तस्माच्छूद्रो यज्ञेऽनवक्लृप्त इति हि श्रुतौ तरं । तस्मादित्यत्र कस्मादित्याह ।
विदेवो देवरहितः खल्वयमेतदपि कुत इत्यत आह । तं शूद्रमनु न हि काचन देव
तासृज्यत । तस्माद्विदेवः तस्माच्छूद्रः पादावनेज्यै वर्णिकानां पादप्रक्षालनमपि
कर्मातिक्रम्य न वर्द्धते । एतद्वितरशुश्रूषोपलक्षणं । द्विजातिशुश्रूषातिरिक्तं किंचि
दपि धर्मं नानुतिष्ठेदित्यर्थः । तथा च स्मर्यते । शूद्रस्य द्विजशुश्रूषा परमो धर्म उच्य
ते । अन्यथा कुरुते किंचिद्भवेत्तत्तस्य निष्फलमिति । तत्रोपपत्तिरुच्यते । हियस्मादय

पत्तः स्पष्टः ॥ किं च ॥ तस्मात्प्रजापतिः प्रतिष्ठारूपपादतः सृष्टत्वादयमेकविंशस्तोम
इतरस्तोमानामप्यध्ये प्रतिष्ठा भवति एकविंशस्तोमकेन यज्ञायज्ञीयेनाग्निष्टो
२३९ मस्य समाप्तेरस्य प्रतिष्ठात्वं हि यस्मादेकविंशः प्रतिष्ठायाः सृष्ट अत इत्यर्थः ॥ तस्मा
ष४ सादतो निह्नप्रदेशादुत्पन्नत्वात् अनुष्टुप्छंदः छंदांस्यनुवर्तीयात्मिति स्पष्टः ॥ अनोः
239 कर्मप्रवचनीयत्वात् छंदांसीति द्वितीया ॥ अनुसवनप्रयुक्ते गायत्र्यादिछंदोभिः
सदनमर्हंति ॥ एष्वादिषु छंदसी वृहे क्रियमाणे स्वस्थानए वानुष्टुभं प्रयुंजते न त २३९
स्य स्थाने न्यजाय त्र्यादिकं छंदः तेषीवास्थाने नुष्टुभं प्रयुंजत इत्यर्थः ॥ किमर्थमेव
मिति तत्राह ॥ ॥ पापवसीयसो विवृत्त्या इति ॥ पापीअपरस्थानां दुस्पत्नी अनुष्टु

पष्ठीदः। वसीयः पुण्यमुखाद्युत्तरस्थानो यन्नी गायत्र्यादिके तदुत्तमयस्य विधस्यैव विचरणा
यत्र असांकर्यायेत्यर्थः। अथ वेदितुः फलमाह॥ ४॥ विधृतिः पापवसीयसो भवति य एवं वे
देति॥ यदुक्तमर्थं ज्ञानाति स पापपुण्यद्वयस्य विधृतिः विवेचनको भवति॥ तस्मिन्नु
क्ते समानाम्नायेन स्त इत्यर्थः॥ ॥इति सामवेदार्थप्रकाशे तांड्यमहाब्राह्मणे पष्ठस्याध्या
यस्य प्रथमः खण्डः॥१॥ तदेवमग्निष्टोमाख्यस्य ज्योतिष्टोमस्य प्राधान्येन त्रिवृदादिस्तो
मचतुष्टयस्य सृष्टिरुक्ता। इदानीं तद्वेदितुः फलमित्याह॥ ३॥ यो वै स्तोमानुपदेशनव
तो वेदोपदेशनवा भवतीति वैशब्दो वाक्यालंकारे यः पुमान् स्तोमान् त्रिवृदादीन् उपदे
शनवतो वक्ष्यमाणोपदेशेन युक्तान् वेद जानाति स उपदेशनवान् भवति। वक्ष्यमाणेन

दशस्तोमोप्यर्द्धमासात्मकः पंचदशाभिरहोभिर्युक्तत्वात् तत्संख्यासाम्येन स्तुतिः। योयं सप्त॰ ५

प्राणादिदेवता वा अभवन्। के ते उपदेशा इति तानाह॥ ७॥ प्राणो वै त्रिवृदर्द्धमासाः पंचदशः
संवत्सरः सप्तदश आदित्य एकविंशः एते वै स्तोमा उपदेशनवैत उपदेशनवा अभवति
२८० य एवं वेदेति। यस्तु त्रिवृत्स्तोमोऽस्ति प्राणो वै त्रिवृदिति आह स्म अनवद्यः। सोपद्यं ते मुख्यः
240 प्राणः शिरसि शीर्षण्येः सप्त प्राणाः अवाङ्नवत्रिभ्यो प्राणद्वयाभ्यां सह नव प्राणात्मकः अतो
नवत्वेन साम्यात् त्रिवृत्प्राण इति स्तूयते। यथा पंचदश स्तोमः संवत्सरः द्वादशमा
साः पंचर्तवो हेमन्तशिशिरयोः समासेन तावान् संवत्सर इति श्रुतेः। सप्तदश सं २८०
ख्यासाम्यात् सौ सप्तदश इत्युच्यते। योयमेकविंशस्तोमः स आदित्य एव द्वादश मा
साः पंचर्तवस्त्रय इमे लोका असावादित्य एकविंश इति श्रुतेरादित्यस्यैकविंशत्वा

रतत्संख्यासाम्येनास्यादित्यत्वं। एते स्तोमा उक्तास्त्रिवृदादय उपदेशनवंतः त्रिवृदादीनां
प्राणाद्यात्माधिकपनमेवोपदेशने तद्वैतः शिष्टंगतं। अथो ह स्तोमचतुष्टयस्य प्रसंगेन
त्रिणवत्रयस्त्रिंशयोरप्युपदेशनेनाह यच्छ्रः। ७॥ इमे वै लोकास्त्रिणवास्त्रिरव
स्य वै स्वाहुल्लोनैमे लोकास्त्रिष्पुनर्नवान्नवैतीति। त्रिणवस्वरूपस्य त्रिवृत्त्रयात्म
कत्वविधानेन इमे मरादयो लोकाः त्रिः पुनर्न्वेवा नवेति। त्रित्वसंख्योपेताः संतः पुनर्न्वे
वसंख्याकान्नवेति। त्रयो वा इमे त्रिवृतो लोका इति श्रुतेः। एकैकस्य त्रिवृत्त्वान्मिलित्वा त्रिण
वसंख्याकं खं लोकत्रयस्य। अस्य स्तोमस्य त्रैलोक्यात्मकत्वमेवोपदेशनवत्त्वं। अथा
त्वार्चविदुषः फलमाह॥ ८॥ एषु लोकेषु प्रतितिष्ठति य एवं वेदेति॥ स्पष्टोऽर्थः। यद्वाति

णवस्यवाइत्यादिकमेवंवेदेत्यंतंवेदितुःफलं।त्रिणवस्यवैब्राह्मणेनेमेवैलोकास्त्रि
तावइतिब्राह्मणेनेमेलोकास्त्रिषुनन्नवेषुप्रतिष्ठितोनवेति।अथत्रयस्त्रिं६
२५ शस्योपदेशानवत्वमुच्यते।।९।।देवानांतावत्त्रयस्त्रिं६शोष्टौवसवएकादशरुद्रा
२५। द्वादशादित्याःप्रजापतिश्चवषट्कारश्चत्रयस्त्रिं६शाइति।अयंत्रयस्त्रिं६शःस्तोमः
देवतावावदेवताएवउक्तेस्तोमेदेवतासुचैककृत्वापादकेसौरभ्यासाम्यमुपपादय
ति।अष्टौवसवइत्यादिना।।अथविदुषःफलमाह।।११।।सदेवेनयरेनयजतेय २५
एवंवेदेति।यःपुमानेवंजानातिसदेवेनसन्निहितदेवकेनयज्ञेनयजते।उक्तदे
वतात्मकत्वमेवास्यस्तोमस्योपदेशनवत्वं।अथप्रकारांतरेणत्रयस्त्रिं६शः६स्तो

तुमाह ॥ ८ ॥ यो वा अधिपतिं वेदाधिपतिर्भवति त्रयस्त्रिंशो वै सोमानामधिपतिः पुरु
षः पशूनामिति ॥ त्रयस्त्रिंशो वै त्रयस्त्रिंशः खलु सोमानामधिपतिः उक्तसोमेध्ये
धिकसेरव्यापेतत्वात् पुरुषस्यापि अधिपतित्वोपन्यासः सोमदृष्टीतत्वेन स्पैवस्तु न
त्सर्वः । अथ पुरुषस्याधिपतित्वमेवोपपादयति ॥ ९ ॥ तस्मान्यस्त्वोन्ये पशवो दृस्यूर्द्धः
पुरुषोऽधिपतिर्हि स इति । तस्मात्पुरुषस्याधिपतित्वात् अन्ये पुरुषव्यतिरिक्ताः गवाश्वा
दयः पशवोऽन्यं चौंवा अनुखाः सन्तः आ ददति न दद्यति त[illegible]णानि । पुरुष ऊर्द्ध्वमुखः सन्नत्रु
त्रै ऊर्द्ध्वस्तो हेतुर्विवृणोति । सः पुरुषः अधिपतिः खलु । अथ विदुषः फलमाह ॥ १० ॥ अ
धिपतिः समानानां भवति य एवं वेद ॥ ११ ॥ स्पष्टार्थः ॥ इति पञ्चाध्यायस्य द्वितीयः खं

३।२।१। अथ संस्थाक्रमेणाग्निष्टोमे प्रथमं विवक्षुस्तं बहुफलसाधनत्वेन प्रशंसति। ३।
एष वाव प्रथमो यदग्निष्टोम इति। एष वाव एष एव मुख्यो यज्ञः यदग्निष्टोमः अग्निष्टोम
२५२ इति सर्वफलसाधनत्वेन मुख्यत्वादेष एव यज्ञः। इतरे त्वेकैकफलसाधनत्वाज्जघ
न्या इत्यर्थः। अथ तदेवाह। ३। एकस्माद्वान्यो यज्ञः कामायाह्रियते सर्वेभ्योऽग्निष्टोम
इति। अन्यस्तु क्रतुरित्यु [redacted] एकस्मै [redacted] कामायैकैकफलबुद्धि
श्याह्रियते अनुष्ठीयते। यथा उक्थेन पशुकामो यजेत। षोडशिना वीर्यकामो यजेत। वा २५२
जपेयेनाधिपत्यकामो यजेतेति। अग्निष्टोमस्तु सर्वेभ्य आह्रियते। अतोऽयमेव मुख्यो
यज्ञः। अथ सर्वकामसाधनोऽग्निष्टोम इत्युक्तौ। तत्र पशोरपि फलस्य साधनत्वेनापि

संख्यासादृश्याद्ग्निष्टोमएव संवत्सरः। अनुसंवत्सरे हि पशवो गर्भंभूत्वा प्रजायंते। अतः ×२

समृद्ध इत्याह॥ ॥ द्वादशस्तोत्राण्यग्निष्टोमो द्वादश मासाः संवत्सरः संवत्सरं पश
वोऽनुप्रजायंते तेन पशव्यं समृद्धइति॥ द्वादशानां स्तोत्राणामाहारोऽग्निष्टोमः। द्वा
दशमाससमुदायात्मकश्च संवत्सरः। अतः संवत्सरः पशव्यस्तेन संवत्सरेणास्याग्ने
द्रादयमपि पशव्यः पशुभ्यो हितो भवति अतएव समृद्धः। यास्यप्रकारांतरेणाप
शव्यत्वमाह द्वादशस्तोत्राणि द्वादशशस्त्राणि तच्चतुर्विंशतिश्चतुर्विंशतिरर्द्धमासाः सं
वत्सरः संवत्सरं पशवोऽनुप्रजायंते तेन पशव्यः समृद्ध इति। अग्निष्टोमे यज्ञे द्वादशस्तो
त्राणि द्वादशशस्त्राणि तदुभयमिलित्वा चतुर्विंशति संख्या संपद्यते। संवत्सरश्च चतु
र्विंशतिरर्द्धमासात्मकः तथा सत्ययं संसर्गः सात्म्यात्। अयं संवत्सरात्मकः शिष्टं पूर्ववत्

अथ ब्रह्मवर्चसफलसाधनत्वेन प्रशंसति। छ।। अग्नेः स्तोत्रमग्नेः शस्त्रं प्रतितिष्ठति ते
२४३ न ब्रह्मवर्चसस्य इति। अस्य स्तोत्रमिति मैत्रयस्यायज्ञीयमग्नेः प्रतितिष्ठति। तच्छायेयै।
तथास्य शस्त्रं चांतिममाग्निमारुतं अग्न्यावेव प्रतितिष्ठति। स माप्नोति। अग्निमा
243 रुतेप्यग्निः श्रूयते। अतस्तदुक्तयोपेतोग्निष्टोमो ब्रह्मवर्चस्यो भवति। ब्रह्मवर्चस
स्य तेजो विशेषरूपत्वात्। आग्नेरपि तेजो विशेषसद्भावात्। अस्तोत्रफलसा
धनत्वं। अथास्याग्निष्टोमव्यपदेशः किंनिबंधन इति प्रश्नमाश्रित्योत्तरमाह। छ।। २४
किं ज्योतिष्टोमस्य ज्योतिष्टोमत्वमिति साऊ द्विराज संस्तुतः संपद्यते विराडु
वै दसा ज्योतिरिति।।। अस्य ज्योतिष्टोमस्य किं ज्योतिष्टोमत्वं किं कारणमिति सो

स्यज्योतिष्टोम ३

विराजः संपद्यते। दशाक्षरा विराडिति श्रुतेः। दशसंख्या संपद्यत इत्यर्थः। तथा सति ×२

ऊर्ध्वमेवाहिनः। अथ यथायज्ञस्त्रिवृद्दशादिभिः संस्तुतः स नूनं विराजन्त इति विराडिति व्यु
त्पत्त्याछिद्रसाम्यं छन्दो विराट् ज्योतिः। एवं च स्तोमानां मध्ये विराड् द्वारा संपन्ने रयं
ज्योतिष्टोम इत्युच्यत इति। विराजेन दशसंख्याधिक्यमनुमित्य क्रमवगन्तव्यः। प्रा
तःसवने बहिष्पवमानस्त्रिवृत्तेन नव स्तोत्रीया भवंति। आज्यस्तोत्राणि च चत्वा
रितानि पंचदशानि षष्टिः स्तोत्रीया भवंति। तदुभयं मिलित्वा एकोनसप्तति स्तो
त्रीया भवंति। माध्यंदिने सवनेऽपि पंचदशो माध्यंदिनः पवमानः पृष्ठस्तोत्राणि च
चत्वारि अपि सप्तदश स्तोमानि मिलित्वा चाशीतिः स्तोत्रीया भवंति। तृतीयसवनेऽपि
सप्तदश आर्भवः पवमानः एकविंशस्तोमकमग्निष्टोमस्तोत्रं मिलित्वा अष्टत्रिं

ंशस्तोत्रीया भवंति सवनत्रये मिलित्वा नवत्यधिकं शतं स्तोत्रीया भवंति। अतश्च दशशो
भागे सति शिष्यंते दशावशिष्यंते। एवं दशसंख्योपेतत्वं विराड्रूपत्वं संपद्यते। अस्य संबंधादस्य ज्योति
२४४ ष्टोमत्वं। अथ विदुषः फलमाह॥ ७ ॥ ज्योतिः समानानां भवति य एवं वेदेति॥ ऊर्ज्वं स्तौ। अथा
244 ग्निष्टोममेव प्रकारांतरेण प्रशंसति॥ ७ ज्येष्ठयज्ञो वा एष यदग्निष्टोम इति। अग्निष्टोम इ
तियास्ति। एष ज्येष्ठयज्ञः खलु देवानां ज्येष्ठः प्रजापतिर्हिरण्यगर्भः समवर्त्तताग्र इत्यादि
श्रुतेः तत्संबंधादस्य ज्येष्ठत्वं। प्रजापतेर्वा एष यज्ञो यदग्निष्टोम इति श्रुतेः॥ अथामुमेव प्रजा २४४
पतेः श्रेष्ठत्वसंपादकत्वद्वारा पुनः प्रशंसति॥ प्रजापतिः प्रजा असृजत ता अस्मै
श्रैष्ठ्यायनातिष्ठंत स एतमग्निष्टोममपश्यत्तमाहरत्ततोऽस्मै प्रजाः श्रैष्ठ्यायातिष्ठंत इति॥

सर्वं प्रजापतिना सृष्टाः प्रजाः अस्मै स्वष्टे प्रजापतये श्रेष्ठाय यस्मै प्रणावाय नातिष्ठी
ता। अमुं श्रेष्ठमिति नाशासिषुः इतरः सुहाने। अथ पविदुषः फलमाह। ३। तिष्ठन्ते स्वैस
माना श्रेष्ठाय य एवं वेदेति। स्वष्टार्थः। सर्वं मुखतस्त्वजिह्वलमसृजत तेनायपत्रीवं हो त्वस्
ज्यते त्यादिना एक्षे दक्षिणमनुष्टय स्वस्ति रक्षः। तत्र्यादिलस्त्वयाणामेव सवनत्रयसीवं यो
दृश्यते। कथं तरीयस्यतरीवीर्य इति ब्रह्म वादिनः। श्रीकाउपद्विपाल। ४। यच्चिस्त्ता
ऽग्यायत्र्यै प्रातःसवने त्रैष्टुभे माध्यंदिने सवने जागते तृतीयसवनं कतमहितुरी
यकं दोउदहबितीति। यद्दिदुइदानी मितिवदस्य माणप्रकारे णाकुर्ब्रह्म वादिनः।
तेषां प्रश्नोत्तरप्रकारमाह। गायत्री गायत्र्या संबद्धं प्रातःसवनं। प्रातःसवने गायत्र्या

सैवं घोदस्यपत इत्यर्च्छः। एवमुत्तरस्योपियोज्यो। नहि एवं सति तुरीयं चतुर्थमनुष्टुप् छंदः
कुत्र सवने संबध्यत इत्येवं यघाकुरिति समन्वयः तदावध्यमाण मुत्तरं ग्रन्थयादि
245 विशेषः। अनुष्टुप्स्वीयंचः किमर्च्छेन्नृच्छ्यत इति तत्राह॥ ७॥ छंदसां वा अन्ववक्लृप्ति
यजमानोऽन्ववक्लुप्यत इति। छंदसां गायत्र्यादीनां चतुर्णां मध्ये यस्यापि छंदसो
वक्लुप्तिनाशमनुयजमानोप्यनुक्रमेणानुक्लुप्यते। नश्यति। अत उक्तं प्रयोक्तुः इ
त्यर्च्छः। अयतस्योत्तरमाह॥ ८॥ अष्टाक्षरा गायत्री हिंकारो नवम एकादशाक्षरा त्रि २५
ष्टुब्द्वादशाक्षरा जगती छंदोभिरेवानुष्टुभमाप्नोति यजमानस्यानवक्लोपायेति॥
गायत्र्याः पादस्यस्वतोऽष्टावक्षराणि हिंकारो बहिष्पवमानस्याघोक्षरः तेन सह न

वसंपद्यते।माध्यंदिनस्यपवमानस्यांस्तायौत्रिष्टुभिएकादशाक्षराणि।आर्भवपवमान
स्यांस्तायीजगत्स्यांद्वादशाक्षराणिसहिंकारश्छंदस्त्रयगताक्षराणिमिलित्वाद्वात्रिं॰श
संपद्यते।अनुष्टुबपिद्वात्रिं॰शदक्षरा।तथासतित्रिभिरेवछंदोभिःसहिंकारैरनुष्टु
नमाप्नोतिस्तोत्रा॰साचानुष्टुप्स्वावयवैस्त्रिभिःसहिंकारैरष्टाक्षरादिरूपैश्छंदस्त्र
यंव्याप्यतद्वारासवनत्रयमप्याप्नोतीत्यर्थःभवतिसावाग्भिर्यजमानस्यानवलोपा
पाविनाशायभवतिएवंतुरीयस्यछंदसःसवनत्रयसंबंधइत्युत्तरेत्र्ययुरित्यभिप्रा
यः।उक्तार्थविज्ञानंसंकोचविस्तराभ्यांप्रशंसति।।योवाअनुष्टुभं॰सर्वत्रापि॰स
वनान्यन्त्वायत्तांवेदसर्वत्रास्यापिभवत्येषावाअनुष्टुप्सर्वत्रापिःसवनान्यन्त्वायत्ता

तद्य एवं वेद सर्वत्रास्यापि भवतीति । यो वाऽयं कश्चिदपि पुरुषः अत्र ह्येवं सर्वत्रापि
सर्वत्र यद्व्याप्तिं तां वेद जानाति । कथं तस्यावाप्तिरित्यत आह । सवनानि त्रीण्यपि अनु
246 क्रमेणायत्तां गायत्र्यादिछन्दोद्वारेण संख्याप्राप्तां वेद अस्य विदितुः सर्वत्र व्यापि व्या
पने अप्रतिहतसंचारो भवति । कासावनुष्टुप् । एषा वै छन्दोदोहरसमाहारसिद्धा खल्व
नुष्टुप् उक्तलक्षणोपेता । तथा एवमिन्द्रादेरपसंहारार्थत्वात् पुनरुक्तिः । [illegible]य एवं
विहितं स्तोमचतुष्टयं यज्ञनिर्वाहकत्वेन प्रशंसति । [illegible]य है राज्ञानो ध्वानं धावयंति २४
मा२ येषां नां वीर्यवत्ताः स्तानुक्त्वा तत्त्रिवृत् संच दशः सप्तदश एकविंशः एते वै स्तोमानां वी
र्यवत्तमास्तान्येव युङ्क्ते स्वर्गस्य लोकस्य समष्ट्या इति । [illegible]य है यदा वा रथं तु राजनः सं

247

यामकर्त्तारः अह्वानं अजिमार्ग्गं धावयन्तिगमयन्तिरथान् । तदानीये आज्यानामद्ध्ये वीर्य्य
वत्तमा अतिशयेन वीर्य्यपेताः अश्वाः सन्तितान् युङ्क्ते योजयन्ति रथेषु अयं दृष्टान्तः एवमु व
ज्जातास्तोमानामद्ध्ये त्रिवृदादयोऽतिशयेन वीर्य्यवत्तमाः अतस्तानेव युङ्क्ते स्वर्ग्गप्राप्ति
साधनेयज्ञे नन्तेषांयोजनं स्वर्ग्गस्यलोकस्य समध्ये सम्यक् प्राप्तये संपद्यते । एवं प्रश
स्यस्तोमचतुष्टयमग्निष्टोमस्य प्रतिष्ठा साधनं विधत्ते । चतुष्टोमो भवति प्रतिष्ठा वै
चतुष्टोमः प्रतिष्ठित्याइति । अग्निष्टोमः चतुष्टोमो भवति । विहितं त्रिवृदादिस्तोम
चतुष्टयं निवेशः कर्त्तव्यः सचतुष्टोमः प्रतिष्ठा वै प्रतिष्ठा रूपः स्वत्तुयथापादचतुष्ट
पानयोःशयनंत्रकार्यमितिविधत्ते॥ संवत्सरस्यैतौदृंहौयदतिरात्रौतयोनस्वप्न्यं संवत्सरस्यदृंहूयो
रात्मानन्तेद्विदधानीतीति॥ यतूयोपूर्वोक्तावतिरात्रौएतौसंवत्सरस्यदृंहौसंवत्सरस्यप्रतिमावे

श्री

द्वादशरात्रय इति श्रुतेः। सैव सरस्य द्वादशाहस्य दक्षिणास्कानीयौ तयोर्नास्ति अवश्यं स्वापो न कार्यः सैव सरस्य
दक्षयोः स्वापान्ते दर्शनं न पिद्यादिर्गाप्यदक्षौ प्रश्लिष्येयमिति बुध्या॥ अथ पर्यं हां तरमाह॥ ॥ नंदा रूः को स्वप्तु
३९३ 393 मर्हति यद्यावप्राणेण जागार तदेव जागरितमिमाति। तत्रत्रपि पथे अभिज्ञा ब्रह्मवादिन आहुः लोके को नाम
पुरुषः अस्वप्तुं स्वापमकर्त्तुमर्हति। स्वापस्यावश्यंभावित्वात् तर्हि कथं पूर्वोक्तदोषपरिहारः उच्यते॥ यद्य
वयदेवप्राणो देहे वर्त्तमानः प्राणकार्यं जागर्त्ति न कदाचिदपि न स्वपिति स हि जागरस्वप्नसुषुप्तिरूपावस्था सु पुति ५
त सर्वदा प्रबुद्ध एव वर्त्तते देवप्राणकर्त्तृकं जागरणं कदाचिदपि न स्वपिति स हि नायं तु सुरणं अस्य यजमा
नस्य जागरितं जागरणमिति। उक्तदोषो न भविष्यति। अथ पूर्वोक्तानी चतुर्णाम् क्रामंतरालेऽरुक्षा
संस्थान्यष्टावहानि कर्त्तव्यानीति विधित्सुराह॥ ॥ गायत्री वा एतां ज्योतिष्पक्षामासते यदेतं द्वादशाहमष्टोम
मध्यतः उक्थ्या अग्निष्टोमावभितो भासास्वर्गं लोकमेत्याजरसं ब्रह्माद्यमन्नमत्तिदीप्यमान इति॥ ॥ यद्य ए
ते द्वादशाहमासते प्रस्तुतिषं स्तितेएतावद्वक्ष्यमाणां ज्योतिःपक्षां गायत्रीमेवासते। केया गायत्री किं वा तस्यांप ३९३

394

द्भूतं ज्योतिस्तदुत्तयमुच्यते ॥ येद्वादशाहस्य मध्येष्टाकुस्था: ध्यासंस्थासैषा गायत्री अष्टाक्षरा
च गायत्री स्तनयोरष्टसंख्यासाम्यात्तु अग्नित: पार्श्वयो: उक्थ्यानां पुरस्तात् परस्ताच्च यावदग्निष्टोमो
क्रियमाणो तावेव गस्था: गायत्र्या: पक्षौ अग्निर्देवतानामग्निर्ज्योतिरग्निर्देवतानां ज्योतिर्विराट् छंदसां
ज्योतिरिति श्रुते: तस्मिन्ज्योतिष्टोमे सभा तत्साद्दग्निष्टोमोपि ज्योति: तस्मादेषा गायत्री ज्योति: पक्षोदवे
ज्ञात्वानुतिष्ठन्देहावसाने भासादीस्वासहस्वर्गलोकमेति गच्छति अस्मिं श्चलोके आजरसं यावज्जीवी
ते तावस्पर्यंति ब्रह्मादीन्ब्रह्मलज्जा स्पाअदनीयं प्रशस्तमन्नं अत्ति भुंक्ते अदीप्यमान: मध्ये मध्ये ज्वरादि
ना इत पवमान: सत्वे एतदुक्तं भवति द्वादशाहस्य प्रथमम् अतिरात्र: ततः एकमहरग्निष्टोम: ततोष्टाकुक्था
ति : ततोग्निष्टोमातिरात्रावित्येवं क्रमेण कर्तव्यानीति। अपि तेषां ह: उक्थ्यानां तावतिरात्रौ न्यायोम ध्येदशरात्र: तत्र
तत्रापि तस्मिं घहः सुष्टु स्तोत्रे विकल्पेन रथंतरं साम कार्यमिति विधत्ते ॥१॥ त्रिष्टुरस्तादथंतरमुपयंति अथ
द्वैवा कस्वर्गमेव वाचमवरुध्य सर्वमन्नाद्यं द्वादशाहं तन्वत इति ॥ ॥ पुरस्तात्सर्वस्मिन्नागे द्वादशाहस्यादि

३६४ त

394

तः त्रिवृदहस्सु रथंतरं त्रिरूपयंतीति। त्रिर्वा इदं प्रमुं आरभ्याहृदै त्रिधाप्यावर्त्तमाना खल्वाक्रुसु
पतिः कृद्रूपेणयद्यावेदन्नयरूपेण त्रिधावर्त्तमाना एव मनेन रथंतरस्य त्रिरूपावृत्तेनैस तृ
र्वे हि स्तामेवंवाचं सर्वमनाधीपावरुद्धं द्वादशाहं तन्येनेविस्तारयंति। अस्मिन्पक्षे रथंतर
स्यनैरंतर्येणप्रयोगाज्जामितादोषमाशंक्यपरिहरति।। ८।। जामि वा एतद्यज्ञे क्रियत इत्यादु
र्यत्त्रिष्पुरस्ताद्रथंतरमुपयंतीति सौभरमुक्थानां ब्रह्मसाम भवति तेनैवतदजामीति। पुरस्ता
द्रथंतरं पूर्वस्मिन्नहनि रथंतरं साम नैरंतर्येणोपयंतीति यत्तदेतद्यज्ञे जामिनीरसमेव क्रिय
ते। प्रयुक्तस्यैव पुनः प्रयोगादिति ब्रह्मवादिन आहुः। तत्रायं जामितादोषपरिहारः। उक्थानी
तृतीयसवनगतानां स्तोत्राणांमध्ये ब्रह्मसाम ब्राह्मणस्तोत्रनिर्वर्त्तकं साम तत्सौभरं कार्यं ते
जामि नप्रयुक्तेन सौभरेणैव एतद्रथंतरजामित्वदोषरहितं सारवदेव भवति।। ननु दशरात्रस्य प्रथमे ३६४
हन्यग्निष्टोमसंस्थे तृतीयसवने उक्थ्यतनसी[illegible]ति नचनकथं अजामित्वमित्यत आह।। ९।। प्र

न्मवत्सः प्रायणीयस्याह्नः प्रतिपदो भवंतीतिते नौर्जमीति। प्रतिपद्यंते प्रारंभं तेजनेनाह्ने ति प्रायणीयं प्रथ
ममहस्तस्य प्रायणीयस्याह्नः प्रत्नवत्यः अस्य प्रत्नामनुद्युतमित्याद्यास्तृचः प्रतिपदो बहिष्पवमानस्य
प्रारंभोर्थं भवंतीति। तेनोतेनउत्तेनैवप्र लवतीनां प्रतिपत्त्वेनैव तत्प्रायणीयमहरजामितत्रस्यातीप्र
ति पदानां प्रत्नवत्त्वेनाहलेन विशेषणेन प्रयोगात्तैहरंतं स्मात द्योगानावाच्छ्य अस्याप्यहोजामित्वदोषो
न भवतीत्यर्थः। अपदशरात्रस्योपरि भागे अष्टमनवमदशमेहःस्वपि रथंतरस्य त्रिरुपायनं वि ९५
धत्ते। ७। त्रिर्द्वेवोपरिष्टाद्रथंतरमुपयंति प्राणो वै वाक्स्वामेव वाचमवरुध्य सर्वमन्नाद्यं द्वा
दशाहादुत्तिष्ठंतीति। उपरिष्टाद्दशरात्रस्योपरि तनेष्वपि त्रिष्वप्यहःसु एवमेव रथंतरं त्रिरुपयं
ति त्रिवारमुपगच्छेयुः अन्यत्सर्वं बृहद्धात्स्येयं। संवीवाचं सर्वमन्नाद्यं च प्राप्य द्वादशाहादुत्तिष्ठं
ति ताद्यागादुत्तिष्ठं उत्क्रामंतितं परिसमापयंतीत्यर्थः। अत्रापि पूर्ववदजामित्वाशीकापरिहारस्वपूर्ववं
द्योजनीयो। दशमेहन्यपि प्रत्नवत्यः प्रतिपद इति विधास्यति। अतः पूर्ववदजामित्वं॥ ॥इति साम

म

वेदार्थप्रकाशे तांड्यमहाब्राह्मणे दशमाध्यायस्य चतुर्थः खंडः ॥४॥ गा॰प्र॰ वास्मि द्वादशाहे त्र्याधी
३९५ 395 नावतिरात्रौ दशमहश्च मुख्यामध्ये योनवरात्रः तथ स्तोमैस्त्रेधा विनजति ॥ टी॰। त्रयो वा एते
त्रिरात्रा य- देष द्वादशाहो गायत्रमुखः प्रथमो गायत्रमध्यो द्वितीयो त्तमस्तृतीय इति गाय
गायत्र द्वादशाह शब्दः तदवयवेन नवरात्रे वर्त्तते। यत एष द्वादशाहो द्वादशाहावयवो नवरात्रः एते
त्रयस्त्रिरात्राः तत्र त्रिरात्रो गायत्र मुखः। गायत्रीछंदस्कमहर्मुखे प्रथमतो यस्य स तथोक्तः। द्विती
यस्त्रिरात्रो गायत्रमध्यः तत्र मध्यमस्याह्नो गायत्रत्वात् तृतीयस्तु गायत्रोत्तमस्तृतीयमहः तत्र प
त्र गायत्रं वाभिप्रेत्य गायत्रमुखइत्यादिव्यपदेशः। एतैश्छंदोभिर्वा अग्निर्भ्यस्य लोकमञ्ज्यायन्तिति छं
दसीव्यूहनविधानसमये विस्पष्टं दर्शयिष्यामः अस्त्वेवं ततः किं जातमत आह ॥ टी॰। यस्मा गाय
त्रे मुखं प्रथमस्तस्मादूर्ध्वोऽग्निर्दीदाय यस्मा गायत्रं मध्यो द्वितीयस्तस्मात्तिर्यञ्चः पशवः पवते यस्मा ३९५
गायत्रोत्तमस्तृतीयस्तस्मादर्वाञ्चः दिवसस्पशीति। टी॰॥ यस्मात्प्रथमस्त्रिरात्रो गायत्रमुखोऽज्व

396

ध्यंतस्माज्ञायत्याम ध्यतः

ति॥ तस्मात्तेजोरूपायागायत्र्यांप्रथमतः प्रयुक्तस्मात्तत्प्रदेशादारभ्य ऊर्द्ध्वाभिमुखः सन्नग्
न्निर्दीदायज्वलति यस्माद्द्वितीयस्त्रिरात्रो गायत्र्याम [illegible] पुयोगात्पश्याग्राप
थि व्योमर्ध्यतियेऽिति तिरश्चीनो वायुः पवतो यस्मात्तृतीय [illegible] त्रिरात्रौस्तमस्तस्मा गायत्री
ज्ञायत्र्या उपरिस्थितत्वादादित्येयः लोकस्योपर्यवस्थयैगर्वाक् अवाङ्नु सतपति प्रकाशयति। अथ
प्रकारांतरेण एतेषां त्रिरात्राणां गायत्रीसंबन्धं स्तौति। ९। तेजसा वै गायत्री प्रथमं त्रिरात्रंदाधा
रपदैर्द्वितीयमक्षरैस्तृतीयमिति॥ ।येषा गायत्री चतुर्विंशत्यक्षरा। त्रिकाम्याग्निना तेजसैव प्र
थमं त्रिरात्रं धा रयति। पदैः पादैर्द्वितीयं त्रिरात्रं। अक्षरैरात्मीयैश्चतुर्विंशत्यक्षरैस्तृतीय दाधार
त्रिरात्रं धारयति॥ किं नत स्यातेजः किंवा पादाः कियंति वा न दीपाल्पक्षराणिकथं वा तेस्त्रयस्त्रिरात्रा
धृता इति सर्वमेतद्दर्शयति॥ ७॥ त्रिवृद्वै गायत्र्या सेनस्त्रिवृत्सायत्नीयमहस्तेन प्रथमस्त्रिरात्रो धृ
तस्त्रिपदा गायत्री त्रिरात्रो मध्ये तेनद्विरात्रोधृतं श्चतुर्विंशत्यक्षरा गायत्री चतुर्विंशत् स

तीयस्त्रि

प्रथम मह स्तेन तृतीय स्त्रिरात्रो ध्वतर इति॥ ॥त्रिवृत्स्तोमो हि गायत्र्यास्तेजः प्रजापति मुखात् अनयोः
२९६ सहोत्पन्ने अग्नि र्नो होत्पन्नत्वात् त्रिवृत स्तेजो रूपत्वे। दशरात्रस्य प्रायणीयं प्रथम मह स्त्रिवृ
त्त्रिवृत्स्तोमकं त्रिवृदेव स्तोमो भवतीति विधास्यमानत्वात् तेन त्रिवृदात्मकेन गायत्र्यास्तेज सा
प्रथमस्त्रिरात्रो ध्वतोस्त्रिवृत स्तुच त्रयात्मकत्वेन त्रिसंख्यायुक्तत्वात् अष्टाक्षरास्त्रयः पादा
अस्यामिति त्रिपदा गायत्री। संख्यासु पूर्वे स्याति पादशब्दस्यांत्यलोपः पादोन्यतरस्यामिति ङीपि प्रा द्व ५
प्ते टाबृचीति टाप् पादः पत् इति पद्भावः। मध्ये प्रथम तृतीययोस्त्रिरात्रयोरंतराले त्रिरात्र
यो स्त्रिरात्रयः ते नो भयोस्त्रिरात्रैर्योगेन गायत्र्याः पादे द्वितीयस्त्रिरात्रो ध्वतर इत्युच्यते। चतुर्वि
ंशस्य दशरात्रिको ऐवं प्रथमम अमोत्तमानां त्रिरात्राणां तानाम ङ्गां गायत्रत्वे गायत्रो वा एष इत्यव
यवे गायत्री प्रायणीय महरित्यादिना शाखांतरे स्पष्टमाम्नातं। यद्यप्रथमे त्रिरात्रे त्रीण्यपि २९६
प्रातः सवनानि गायत्राणि म छंदतु माध्यंदिन सवनानि उत्तमे त्रिरात्रे त्रीण्यपि प्रातः सवनानि गाय

[illegible] तेतुतृतीयसवनानि गायत्राणि ॥ एकांगायत्रींस
प्तममह्नश्चतुर्विंशः स्तोमः अर्कंगतए नद्वयं संख्याद्वारेण संबद्धेन सप्तमस्याह्नः संबंधेन तृतीय
स्त्रिरात्रोत्तरे द्व्यहे तद्वै स्कन्धते । उक्तप्रकारेण गायत्र्यास्त्रिरात्रंप्र्यासं स्तौति । ॥ तेजसा वा
एते प्रयन्ति तेजो मध्ये दधति तेजो ऽभ्युद्यन्ति ज्योतिषा वा एते प्रयन्ति ज्योतिर्मध्ये दधति ज्योतिरभ्युद्यं
ति चक्षुषा वा एते प्रयन्ति चक्षुरभ्युद्यन्ति प्राणेन वा एते प्रयन्ति प्राणं मध्ये दधति प्राणमभ्युद्यन्ति ये गा
यत्र्या प्रयन्ति गायत्रीं मध्ये दधति गायत्रीमभ्युद्यन्तीति । ये यजमाना गायत्र्या गायत्रीछन्दसा प्रयन्ति
प्रगच्छन्ति प्रथमं त्रिरात्रमारभन्ते । एते तेजसा वै तम सोतिवर्चकमालोकादिकं तेजः तेनैव प्रयन्ति आरभ व
न्ते । ये गायत्रीं मध्ये दधते द्वितीये त्रिरात्रे माध्यंदिनसवनेषु धारयन्ति । एते तेज एव मध्ये दधति ।
स्थापयन्ति ये गायत्रीमभ्युद्यन्तीत्युक्तं ति गायत्र्या तृतीयसवने तृतीये त्रिरात्रे समापयन्ति
एते पूर्वोक्तं तेजोऽभ्युद्यन्ति उदयनं समापनं कुर्वन्ति ॥ एवमुत्तरेष्वन्येषु पर्यायेषु योज्यं । तेजसा ते

जः शब्दाभिधेयेन अग्न्यादिना। अन्यत्र काशो ज्योतिश्चष्टेः पश्यतिकर्मणः चक्षुर्ज्योतिर्वै गायत्री रन्ध्री
३९७ ष्ठानं चक्षुः। प्राणापानादिपंच हस्तात्मकः प्राणः। गायत्र्या अग्नितेजः आदित्यसंबंधस्तेजो वै गायत्री ज्योति
भि र्वै गायत्री इत्यादिर्वाक्यशेषे रश्मिगतत्वात् अपि नं द्वादशाहत्वस्यात्मकत्वेन रूपयन् विस्तार्यमाण
397 स्य तस्य प्रांतदार्ढ्यहेतुशंकुस्थानतयेतां गायत्रीं स्तौति।।४।। तंत्रं वा एतद्वितायते तेय देष द्वादशाह
स्तस्यैते मयूखा यज्जायत्र्यः संव्याय्यायेति। तायते विस्तार्यते इति। तंत्रं वस्त्रं तदेव वै तद्वितायते विस्ता
र्यते। तन्नो तेर्यक्तीति अनुनासिकस्याकारः। यत् एष द्वादशाहः। तस्य विस्तारितस्य अग्न संव्याय्याय
संव्यायः संचलनं। व्यय अय चलनयोरिति धातुः। वा ऊतना मा वायद्दार्ढ्याय एते मयूखाः प्रांतेषु निरवा
तव्याः शङ्कवः यत् ये या गायत्री सर्वं द्वादशाहं व्याप्नुवती गायत्री कृत्स्नमेव द्वादशाहं दधती सर्वः।
अथो किमस्य व्यासदृष्टांतं द्वादशाहो गायत्र्यां प्रतिष्ठित इति प्रदर्शयति।। ५।। गिरिक्षिदो च्चामन्य ३९७
वेति होवाचाभिप्रतारी काक्षसेनिः कथं द्वादशाहं इति यथा रान्नेमिः पर्येस्व मेतं गायत्रीप

398

य ~ व

यैस्य विसृष्टः सायैथा राना नौ ध्वता एमस्यो द्वादशाहो ध्वतइति। उक्त्वा मन्यु पुत्रो गिरिक्षित् नामकः क

श्चिद् ऋषिः हे उक्त्वा मन्याव गिरिक्षित् इति तं से बोध्य कौहसेन स्य पुत्रः अपि प्रतारी नाम ऋषिः इति

ह इति खलु हर्ष मुवाच। इति शब्द परामृष्टमेव प्रदर्शयति। कथं द्वादशाह इति कथं केन प्रकारेण गोक्षि

तो द्वादशाह इति उक्त्वा मन्य वी कौहसेनिः पप्रच्छ तस्योत्तरमेतत् यथा अरान् रथचक्रस्य मध्यस्थान्

कीलकान् नेमिर्बहिर्वलयः पर्येति परितो व्याप्नोति एवमेनं द्वादशाहं गायत्री पर्येति परितो व्याप्नो

ति किमर्थं अविसृष्टः सायविसर्जनाय नावायायोशेषित्य जावाय। यथा वा अराना नौ चक्र मध्ये ध्वताः

संबद्धा एवमस्यां द्वादशाहो ध्वतः। अपि नीम अनुष्टुप् रूपेण स्तौति।४॥ अनुष्टुभं नाएताम न्वायत्यां व्याहृ

त्यासत ते यदेतं द्वादशाहमिति। यत् यमेनं वितैर्हि द्वादशाहमासते। अनुष्टुभं द्वात्रिंशदक्षरामिमां

मे वै तां व्याहृत्यविमज्य अन्वायत्याय अन्वत्तदार्थं च अन्वाद्यं तदर्थं आसते अनुतिष्ठन्ति॥ कथं द्वाद

शाहमनुतिष्ठन्ति रनु ति ष्ठुभोविभागः क्रियत इति तदर्थं तद्विभागमाह॥५॥ अष्टाभिर्वा अग्रदरैर

उष्टु प्रथमे द्वादशाहस्याहरुपच्छन्सैकादशभिर्द्वितीयं द्वादशभिस्तृतीयमिति। द्वात्रिंशदक्षरात्मिका
नुष्टुप् अष्टाभिरात्मीयैरक्षरैर्द्वादशाहस्य प्रथममहः उपच्छति उष्णिहाभिव्याप्नोति तस्याश्चागायत्र-
त्वात् तत एकादशभिरात्मीयैरक्षरैर्द्वितीयमहरुपच्छति तस्याश्च त्रैष्टुभत्वात् त्रिष्टुभश्च पादस्यै-
398 कादशाक्षरा इति तद्योगः द्वादशभिरवशिष्टैरक्षरैस्तृतीयमहरुपच्छति जागतत्वात् तदहः
अतो जागतपादयोगात्तदभिप्रायेणेदं। अत्र प्रथमेऽह्नि निर्मुक्तानामष्टानामक्षराणामन्त्यमक्षर-
मुपादाय तत्स्थाने पुनरेकादशाक्षराणि द्वितीयेऽह्नि प्रयुज्यन्ते। तत्रापि प्रत्यमक्षरमुपादाय तदार- नि
भ्य द्वादशाक्षराणि तृतीये सवने प्रयुज्यन्ते एवमेकैकमक्षरमादाय विनियोगे सति त्र्यक्षरमवशिष्य-
ते। तान्येवाक्षराणि चतुर्थादीनि त्रीण्यहानि व्याप्नुवन्तीत्याह।। ।। अक्षरं त्र्यक्षरमुच्छिष्यते तत दे-
वोक्तश्च त्रिरात्रमनुविधोदेतीति। उक्तप्रकारेण प्रत्यमक्षरमादाय परिगणनायां त्र्यक्षरमुच्छिष्य- ३९८
ते अवशिष्यते। तदेवाक्षरत्रयं द्वितीयत्रिरात्रमनुक्रमेण विदधातीति करोतीत्यनुष्टुभि विधमा

मक्षरत्रय

मानानि सर्वाण्यहरालिंगतानि ॥ अथ तृतीयत्रिरात्रस्य कथमनुष्टुभा व्याप्तिः ॥ क ॥ छंदांसि वा अस्यास्तृ
तीयं त्रिरात्रं वहंतीति । अस्या अनुष्टुभः संबंधीयानि गायत्रीत्रिष्टुब्जगत्याख्यानि कानि [illegible] एव
तृतीयं त्रिरात्रं वहंति निर्वहंति । अनुष्टुब्वै सप्तदशस्य समवगामिन्या इदं नाछंदसामनुष्टुभः
सकाशात् सृष्टिरुक्ता तेभ्यो गायत्र्यादिभ्यश्छंदोभिर्निर्णीयमानानि सप्तमादीन्यहानि चतुर्विंशस्य
प्सराहि गायत्री सप्तममहश्चतुर्विंशस्तोमकं चतुश्चत्वारिंशदहरात्रिष्टुप् अष्टममहश्चतुश्च
त्वारिंशस्तोमकं अष्टाचत्वारिंशदहरा त्रिष्टुप् अष्टममहश्चतुश्चत्वारिंशस्तोमकं अष्टा
चत्वारिंशदहरा जगती अष्टाचत्वारिंशस्तोमकं नवममहः अत एतानि छंदांसि तृतीयं त्रिरात्रं
वहंतीत्युच्यते । एतेषां चानुष्टुप्प्रभवत्वात् अनुष्टुब्वै व्याप्नोतीति ॥ क ॥ कृत्स्नस्य नवरात्रस्य अनुष्टुप्प्र
पतां आह नो ह्यादशाहमनुष्टुप्छंद एतामनुष्टुभं एवं विभज्य आसत इति पूर्ववदन्वयः ॥ अथो केन
नवरात्रस्यानुष्टुभो व्यापनेयत्तातिरात्रं व्याप्तिर्वैलक्षण्यं तत्प्रशंसति ॥ क ॥ तीवा एतां प्रतांचीति

399

रश्मीनां पराचीमासते ला घायतस्मात्सत्ये चीतिर्यञ्चं पराञ्चं प्रजाः पशुमुपजीवंतीति॥ तां पूर्वो
क्तामेतामनुष्टुभं प्रतीचीं प्रतिमुखं प्रचीनां प्रत्याहीभूतां प्रथमे त्रिरात्रे प्रयुञ्जते। तत्र प्रष्टावेक
दशद्वादशेतिपानुष्टुभाद्वरसंख्यमाभूयस्त्वेनोपलं आतद्धितीये तु त्रिरात्रे तिरश्चीतिसंचं
तीमेत द्वितं प्राङ्मवेतीमासते। तत्र हि त्रीण्येकादशानि विभज्य प्रत्यहं एकैकमक्षरमानुष्टुभे
संयोजितं। अतो दूरस्यास्या यत्ता न तस्यास्तिर्यञ्चं॥ अथ तृतीये त्रिरात्रे पराचीं परावृतीं परोक्षमे
वानुष्टुभमासते। तत्र हि अनुष्टुभः समाप्तात् उपसन्नेषु दोषिर्गोप आदि भिस्तोमसंख्यासामपनु

प्रसंवं ४ ष्टुभोप्याहितुरितिवर्णितो। आसमंतिमुखं तिर्यञ्चं तिरश्चीनं अन्यथावृत्तमुखं परां चपरावृत्तीं पारो

क्षात्स्थितं चोपजीवेति॥ अथ छंदसां व्यूहनप्रकारं विधित्सुराह॥ छ॰॥ छंदांसि वा अन्योन्यस्यलो ३९९
कमभ्यध्यायन्गायत्री त्रिष्टुभस्त्रिष्टुब्जगत्या जगती गायत्र्यास्तानि प्रोहन्यथालोकं ततो वै ता
नीयं काममैमयंततमसन्वमिति॥ ॥ छंदांसि वै गायत्री त्रिष्टुब्जगत्यास्तेकानि छंदांसि पुरा

मका

न्योन्यस्य लोकं स्थानमभ्यध्यायन् । एतेषां छन्दसां क्रमेण प्रातःसवनादीनि सवनानि स्थानतया क्लृप्तानि
गायत्रं प्रातःसवनं त्रैष्टुभं माध्यंदिनं सवनं जागतं तृतीयसवनमिति श्रुतेः । एवं व्यवस्थितानि परस्पर
व्यतिहारेणान्यदीयमन्यदीयं स्थानमकामयन्त तेषां मध्ये किं कस्य स्थानमित्येतदत्र विविच्यते । गाय
त्री त्रिष्टुभः स्थाने माध्यंदिनसवनं जगत्याः स्थानं तृतीयसवनं चाभ्यध्यायत् । त्रिष्टुप् गायत्र्याः स्था
नं प्रातःसवनं जगत्याः स्थानं तृतीयसवनं चाभ्यध्यायत् जगती गायत्र्याः स्थानं प्रातःसवनं त्रिष्टुभः स्था
नं माध्यंदिनसवनं चाभ्यध्यायत् अत्र गायत्री त्रिष्टुप् इत्यादिना एकैकं छन्दः एकैकमेव स्थानमभ्यध्या
यदिति प्रतीयते तदेतदन्यस्याप्युपलक्षणं तथा चैतरेयकं छन्दांसि वा अन्योन्यस्यायतनमभ्यध्यायन् गा
यत्री त्रिष्टुभश्च जगत्यै चायतनमभ्यध्यायत् त्रिष्टुप् गायत्र्यै जगत्यै च जगती गायत्र्यै च त्रिष्टुभे चेति ।
ति एवमभ्यध्यानानन्तरं तानि छन्दांसि व्यौहन्यथा लोकं लोकमनतिकाम्यन्त तत्कामितं स्थानं देवाः प्रापयन् छन्द
छन्दांसि वा अन्योन्यस्य लोकमभ्यध्यायन्तानि एतेन देवा व्यौहन्निति हि तैत्तिरीयकं । अतः अ

यमेत्रिरात्रे प्रातःसवनानि सर्वाणि गायत्राणि माध्यंदिनसवनानि । त्रैष्टुभानि जागतानि तृतीयसव
४०० नानि द्वितीये तु त्रिरात्रे गायत्र्याः स्थाने प्रातःसवने जगती त्रिष्टुभः स्थाने माध्यंदिनसवने गायत्री ।
जगत्याः स्थाने तृतीयसवने त्रिष्टुप् तृतीये तु त्रिरात्रे गायत्र्याः स्थाने त्रिष्टुप् त्रिष्टुभः स्थाने ज
गती जगत्याः स्थाने गायत्री । एवं योऽनेन क्रमेण गायत्र्यादीनि त्रीण्यपि प्रत्येकं सवनत्रय नीज
संपद्यंते । अतो जामिदोषोऽपि परिहृतो भवति । इतरथा नवरात्रस्य सर्वाण्यपि प्रातःसवनानि गा
यत्राणि सर्वाणि माध्यंदिनसवनानि त्रैष्टुभानि सर्वाणि तृतीयसवनानि जागतानीति जामिता
दोषः स्यात्तत एवं सूत्रनान्तरमेतानि छंदांसि यं काममकामयंत । तमसवन्नभवन् । य
द्वार्षयं कामं देवाः ऐच्छन् तं कामं तानि छंदांसि प्रसवन्त्यायच्छन् ३ छंदसां ७ सीं सूत्रेन मुख्या तद्दि
शिष्टस्य द्वादशाहस्य काम [illegible] प्राप्तिहेतुतामाह ॥ २ ॥ यत्कामो छंदसां द्वादशाहे ४००
न यजते सोऽस्मै कामः समृद्ध्यते । इति । यत्कामो यस्य फलं कामयमानः पुरुषः छंदसां द्वादशाहेन विधंस्कामी

वि



स्यादिनाछंदसां ३

401

तदं आयितानि छंदांसि यस्य स तथोक्तः। तेन द्वादशाहेन यजते सकामः काम्यमानो ऽच्छं अस्मै यजमाना
य समृध्यते एतदुक्तं भवति द्वादशाहस्तावद्द्विविधः सत्रात्मको ऽहीनात्मकश्च पुनरप्यहीनात्मकं द्वेधा भव
ति। समूढो व्यूढश्चेति। यत्रोक्तं व्यूहनं न क्रियते स समूढः इतरस्तु व्यूढः सकामप्राप्तिहेतुरित्य
स्मिन्ब्राह्मणे प्राधान्येन प्रतिपाद्यत्वादवगम्यते। अथैतं द्वादशाहं देवानामोकस्थानत्वेन स्तौति॥ ७ ३ ओको वै दे
वानां द्वादशाहो यथा वै मनुष्या इमं लोकमाविष्टा एवं देवता द्वादशाहमाविष्टा देवता वा ताह वा एते
न यजते य एवं विद्वान्द्वादशाहेन यजत इति॥ ॥योऽयं द्वादशाहः स देवानामोकस्थानं वै तदेवोपपा
द्यते। यथा खलु मनुष्या इमं लोकमाविष्टाः एवं देवता द्वादशाहमाविष्टाः तथा सति य एवं विद्वा
ञ्जानन्द्वादशाहेन यजते स देवताभ्य एवैनं एतेन द्वादशाहेन यजते॥ अथैतं गृहत्वेन प्रशंसति।
८॥ गृहा वै देवानां द्वादशाहो नागृहतायानयामिति॥ ॥देवानां द्वादशाहो गृहस्थानीयः स एव गृहाः
सर्वदा तत्रैव वासात् अत एवं जानता द्वादशाहेन यष्टव्यः। अगृहतायाः अगृहत्वात् गृहराहित्यात् तेन
न

य्यं भेतव्यं॥ भीतिस्तस्य न जायते। सर्वत्र गृहस्थानामाईत्यर्थः॥ भयप्रश्न यथो वच्छंदसीति विभेतेर्हेतुभयेयचून्नत्ययेनिपात्यते।
एवं द्वादशाहे बहुधा प्रशस्य अथ तस्याग्निष्टोमसाध्यतां जानतः फलमाह। ७॥ यो वै द्वादशाहमग्निष्टोमेन कल्पमान
वेद कल्पते सस्मै प्रातःसवनेनैव प्रथमेनैव त्रिरात्रः कल्पते माध्यंदिनेन सवनेन द्वितीयस्तृतीयसवनेन तृतीयो
ग्निष्टोमसाम्नैव दशममहः कल्पत इति॥ ॥ यः खल्वेवं द्वादशाहमग्निष्टोमेन अग्निष्टोमसंस्थेन ज्योतिष्टोमेन क
ल्पमानं निष्पद्यमानं वेद जानाति। अस्मै जानते यजमानाय अग्निष्टोमस्य यत्प्रातःसवनं तेनैव द्वादशाहकल्पत्प्रथमो
रात्रस्य प्रथमस्त्रिरात्रः कल्पते तस्मै नो तु स्तोभवति। अग्निष्टोमस्य माध्यंदिने सवनेनैव दशरात्रस्य द्वि
तीयस्त्रिरात्रः कल्पते। तृतीयसवनेन तृतीयस्त्रिरात्रः तस्मिन् तृतीयसवने यदंतिममग्निष्टोमसाम तेनाग्नि
ष्टोमसाम्नैव दशममहरविवाक्याख्यं कल्पते तस्मै नो तु स्तोभवतीति॥ इममुक्तमर्थं वेदितुरपि फलमाह। ८॥
कल्पते स्मै य एवं वेदेति। स्पष्टोर्थः॥ इति साममवेर्थ प्रकाशे ताण्ड्यमहाब्राह्मणे दशमाध्यायस्य पंचमः खंडः॥ ॥
अथ द्वादशाहस्य दशमरात्रस्य यंत्र भिरष्यायेक्ष्स्तोत्रियाः सामानि च विधीयंते। तत्र पृष्ठ्यषडहे यांस्तोत्रीयाः सा

मानि चैतेषां साम्नां पर्याये प्रत्यहं विभिन्नानि रूपाणि। इतः परं षड्भिः खंडैः प्रदर्शयति। तत्रादितः त्रिभिः स्तोत्रीया
णां रूपाणि ततस्त्रिभिः साम्नां रूपाणीति विवेकः। एवं प्रदर्शितरूपे रूपेता स्तोत्रीयाः तद्युक्तानि सा
मानि चतुरुत्तरत्र विधेयानीति यो तत्र गायत्र्याः सत्यस्यांश्च पुनो रूपेण त्रिवृतः सत्योजगत्यो रूपेणेयांस्
नाच्छंदसामपि प्रत्येकमसाधारणरूपं ब...चं सिद्धं व द्वाम्नायते। अतोऽनेन खंडेन सह स्तोमच्छंदः
साम्नां साधारणानि रूपाणि षड्भिः खंडैः संबंधीन्यपि धीयंते। तत्र प्रथमस्याह्नस्तदायस्तोमादेश्च रूपाणि द
र्शयति। ह्य एतिघे साम्नुमह्रीति मद्युक्तान्तेजः स्वद्यक्तानं प्रथमस्याह्नो रूपं त्रिवृतः स्तोमस्य गायत्रस्य छं
दसो रथंतरस्य साम्न इति। आ इति प्र इति एवमेतदुपसर्गद्वयं प्रथमस्य त्रिवृत्स्तोमकस्य प्रायणीय
स्याह्नो रूपं अहरंतरा...वर्तकं। अत एव अग्न आयाहि वीतय आनो मित्रावरुणा प्रसोमासो विपश्चि
तः प्रसोमासो मदच्युत इत्यादिकं उक्तरूपद्वय द्वयोपेतं तस्मिन्नहनि प्रयुज्यमानस्य त्रिवृत्स्तोमस्य गाय
त्रस्य छंदसो रथंतरस्य सर्वमप्यदनद्वयरूपं। अत एतेषां प्रथमसाधारणरूपं खंसिद्धः एवमाद्यम

दिस्यादावप्ययोऽर्थः। अश्मद्ध्याश्नात्विति अस्माद्धातोर्निष्पन्नाप्सुशब्दः सचास्मिन्नहनि अप्सवनेत्वा वा
४०२ जिनं अप्स्वायतो मघवन्निन्द्र वाजिन इत्यादिषु दृश्यते। तदभिप्रायेणेदमाप्सुमदिति। आप्सुमत् आपु
धातुनिष्पन्नशब्दयुक्तं। यद्वा आप्सु स्थानीयैः परोयमाप्सुशब्दः आप्सुशब्दार्थयुक्तमिति सूर्पः। वातिम
402 त्वा ग[illegible]षु एतद्धातुनिष्पन्नेन शब्देन युक्तं। तथाहि वितयुक्तं दृश्यते। अन्न आयाहि वीतये प्र
सोप्प देववीतये इति। तथा रुक्मत्। रुचि धातुयुक्तं। तेजः स्वत् तेजःप्रतिपादकशब्दोपेतं। युञ्जानं। युजि
धातुयुक्तं एतान्यपि रूपाणि प्रथमेहनि विनियुज्यमानासु स्तोत्रीयास्वग्न्यन्त्रविघमा-नायी गायत्री
द्रष्टव्यानि। अहरादिषु साधारणत्वाद्रूपाणां प्रतएवान्नत्र गायत्र्यां दविद्युतत्या रुचेति रुचिधातु
योगो दृश्यते। अस्मिन्नहनि अय सूर्यरवोपदृश्गिति तेजःप्रतिपादकसूर्यशब्दश्रवणात् तदभिप्रा
येण तेजस्विदिति रूपं। ब्रह्माणस्त्वा युजा वयं आत्वा ब्रह्मयुजा हरी इति युजि धातुयोगस्य दृष्टः एतदभि ४०२
प्रायेण। तेजस्वदिति रूपं ब्रह्माणस्त्वा युंज्महे वयमपि पश्यसी। यद्वा युञ्जानं योजनत्वमेव कुर्वन्तीति संबोधन

आ

403

नियोगः ॥ [illegible] टो निट्यमस्य ममपु रूपयोगः [illegible] एतावत् प्रथमस्याह्नो रूपं त्रिवृदादेर्भ्यः ॥ अथ एष षडहे द्वितीयस्या
ह्नः तदीयस्तोमादीनां साधारणानि रूपाणि दर्शयति ॥७॥ वृषा [illegible] अह वदयिम द्विम्बवदुपस्थितं द्वितीयस्याह्नो रूपं पञ्चदशस्य स्तो
मस्य त्रैष्टुभस्य छन्दसो बृहतः साम्न इति वृषण्वत् वृषि धातुनिष्पन्नशब्दयुक्तं द्वितीयस्य पार्ष्ठिकस्याह्नो रूपं पञ्चदशस्तोमादेर्म
तदेव रूपं [illegible] एवच्च अस्मिन् द्वितीयेऽहनि वृषा पवस्व धारया [illegible] इत्यादिकाः वृषण्वत्यः स्तोत्रिया विनियुज्यन्ते । एवमुत्तरे
ष्वपि रूपेषु योज्यं ॥ [illegible] अहवत् वृत्रहननलिंगयुक्तं । तथाहि तत्र मंत्रवर्णः हंति वृत्राणि दाशुषे । जघ्निर्वृत्रममित्रियमिति त
था [illegible] एवरयिं वीरवतीमिषमिति दृश्यते । तथा विश्ववत् विश्वशब्दोपेतं च तत्र एव तत्र दृश्यते ।
का अभि विश्वानि [illegible] उपस्थितमित्यनेन रतिष्ठति धातुनिर्दिष्टः । तद्युक्तमपि द्वितीयस्याह्नो रूपं तथाहि तस्मिन्नहनि दृश्यते । म
हित्तिसोम [illegible] इति यद्वृ उपस्थितं शासे विद्यमानस्यैव कथनं वर्तमानकालापदेशिनो लटः प्रयोग इति भावः । अ
थ तृतीयस्याह्नः सप्तदशस्तोमादेरस्य रूपाणि दर्शयति ॥८॥ [illegible] भवत् तृतीयस्याह्नो रूपं सप्तद
शस्य स्तोमस्य जागतस्य छन्दसो वैरूपस्य साम्न इति । [illegible] युक्तं [illegible] तृतीयस्य पार्ष्ठिक

स्यस्याह्नो रूपं तदीयस्य सप्तदशस्तोमादेस्तत्तदेव रूपं स्यात एव तस्मिन्नहनि तिस्रो वा चतुरो रत इति रूपद्वयं दृश्यते। तथाहि कृश
इव त्वं चापरं रूपं तस्मादेव दिशं विशः हस्तितिदि कृश इत्यो गो दृश्यते। तथा गोमत् गोश इव चं चान्य रूपं गावो मिमन्ति येन व इति
तत्र स्तोमंत्रवर्णः अपमवत् अर्थपरोक्षनिर्दिष्टः। स्यमश शार्थवच्च परं रूपं इमस्वदीव वंसग इति तत्र दृश्यते। यद्दशो मन शद्दोव
403 वंसगः वननीयगामीह यमस्व इ।। कदाश्च तयर्त प्राप्नोतीति। अथ चतुर्थस्याह्नः एकविंशस्तोमादेस्तु रूपाणि दर्शयति।। ८।।
राजन्वेऽनहत्सूर्यवद्विराड नुतो द व च चतुर्थस्याह्नो रूपं मे एकविंशस्य स्तोमस्य ... स्यानुष्टुभस्य छंदसो वैराजस्य साम्न इति।
राजवत् राजन्वश इव त्वं तत्र राजति धातुयुक्तं रवा मादिकं चतुर्थस्य पाष्ठिकस्याह्नो साधारणरूपं एकविंशस्तोमादेस्तदेव
रूपं। तथाहि मंत्रवर्णो दृश्यते। राजाना वभिद्रुह पवमानो अजीजनदित्यादौ। तथा सूर्यवत् सूर्यशब्दयोगोऽथवा तद्रूपं। उभास्सू
र्यो नरश्मिभिरितिहि तत्र मंत्रवर्णास्तथा विराट् छंदस्कोनुतो दवत् अनुतो दृश्युक्ते अन्यद्रूपं तत्राहि पिबा सोममिंद्र मन्द
त्या तु त्वे दिका विराड् मत्स्वा हो वो जो हाउ सहो हाऊ व लं हाविंद्रो हाऊ वयो हाऊ दृहद्दा इ तं हाउ स्वहाऊ ज्योतिहउदा उ १ ध।
इत्यादिभिः स्तोमैश्च तिपाद्य मनुनोद्यते अवधीयते। यदा अनुतोदो भ्यासः सच चतुर्थेऽहनि विहिते महावैराजसामासो ४०३

तथा हि मंत्रवर्णो दृश्यते। यत्सोम चित्रमुक्थ्यं। प्राणा शिशुर्महीनां मिति च ४

ऊ्ह २ मा १

404

दृश्यते तथा हि ।। पिबा सोममिंद्र मंदतु त्वेत्यादिकं त्रिरभ्यस्यते। अथ पंचमस्याह्नः त्रिणव सोदेश्व रूपाणि दर्शयति।। व।।

चित्रवच्छिशुमत् पंक्तिः शक्करी व्यूनाक्षरा गोमद्वृषण्वदूर्ध्वा अग्निमत् सर्वमस्याह्नो रूपं त्रिणवस्य स्तोमस्य यथाह्नः अपि

छंदस्य शक्करी गौसाम इति। चित्रवते चित्रशब्दमुक्तं। शिशुमत् शिशुशब्द अशब्द युक्तं एतदादिकं पंचमस्याह्नो

रूपं। त्रिणवस्तोमादश्वेतदेव रूपं शक्वर्य इति एकैस्यैव विदग्ध पवनिस्तु स्वां गीयमानस्य साम्नः सी हास्त्री त्वं च

हृत्वेचापेत्र्यया शक्वर्यो रथस्य साम्नं इत्यर्थः। तथा पंक्तिछंदो ष्यस्याह्नो रूपं मत एव इंद्रो मदायवावृध इत्यादिका

पंक्ति दृश्यते। स प्रथयदा शक्करी सा च विदामघवन्नित्यादिका पंचमेह्नि विचिक्षिता। तथा ऊनाक्षरा ह्यो न्याम

क्षरा या न्यूनाप न्याक्रकुं अस्याह्नो रूपं। तथा च गोमत् गोशब्दयुक्तं ऋषभवत् ऋषभशब्दयुक्तं ऊर्ध्वगाम

गोमिरक्षां स्या स्यादिकमपि पंचमस्याह्नो रूपं। तथा वज्रिवज्रयुक्तं। अग्निमत् अग्निशब्दयुक्तं वज्रं। वज्रं नि

चंति सायकं। अमि व्रतानि पवते पुनान इति हि तत्र सोमे मंत्रवर्णो एताव सर्वं पंचमस्याह्नः स्त्रिणवस्तोमादे

श्वरूपं। अथ षष्ठस्याह्नः स्त्रयस्त्रिंशस्तोमादेश्व साधारणानि रूपाण्याह।। ऊ।। परि व स्तुति व स प्रव

गर्णो सोम जसा यं मुरिसादिका ४



शाक्करस्य पम सङ्कं साम तद् इदि ३

स्तद्वि पदा विनाराशंऽसा गोमद् ऋषभवत्सषष्ठस्याह्नो रूपं त्रयस्त्रिंऽशस्य स्तोमस्य सर्वेषां छंदसां रूपं रेवतीना
ऽ साम्न इति । परिवत्परिशब्दयुक्तं प्रतिवत्प्रतीत्यनेन युक्तं च षष्ठस्याह्नो अहरेतरा छावर्तीके रूपं गतएवैत
प दुभयं तस्मिन्नहनि दृश्यते । भिन्धि विश्वा अच्छिद्रः परि बा इति प्रतिबांऽ सूक्तउदित इति प्रतिशब्दस्य त्रयस्त्रिंऽशस्तोमस्य
404 तस्मिन्नहनि प्रयुज्यमानस्य तथा सर्वेषां गायत्र्यादीनां छंदसां तथा रेवतीनां रेवतीर्नः सधमाद इत्यस्यामुत्पन्न साम्न रे
रेवत्यः । आपो वै रेवत्य इति अप्त्वेन संस्तुतत्वात् अपूशाद्वत् । अस्यापि स्त्रीत्वं बहुत्वं च रेवत्या रवस्य साम्नो ऽथेता
:पादे देवरूपं एवमुत्तरेष्वपि योजना । सप्तपदा सप्तभिः पदैरुपेता । सप्तपदया यजतीति ब्राह्मणे विशेषदर्शनात् होत्रा
साम्नयोज्येत्यवगंतव्यं । ऋषन्निंद्र वृषपाणास इंदवः सुषुमा यातमद्रिभिः अजायत धनुर्धारी स्त्यादिकाः सप्तपदास्व मणी
ऋग्विनियुज्यंते । द्विपदा पादद्वयात्मिका । अग्ने त्वं नो अंतम इत्यानुकं भुवना सीषधेमेत्यादिकां विनाराशंसाः न
नाः शस्यंते अनयेति नाराशंसी स्तुतिः तद्वसिता स्वक् अस्याह्नो रूपं तथा गोमत् गोशब्दयुक्तं ऋषभवत् ऋष
साम भयुक्तं वेगोभिरं ऋणानी अर्षसि सुदुघाभिर्गोदुह इत्यादिकं अथोक्तानां षडहस्य बधिनांऽ रूपाणां नानात्वं ४०४

स्तोति ॥७॥ यस्मादेषा समाना सती षउहविभक्तिर्नानारूपा तस्माद्विरूपः संवत्सर इति ॥ ॥ यस्मादेषोक्ता षउह
विभक्तिः षउहस्य विभक्तिर्विभागः समाना सती षउहविभक्तित्वेन सदृशी भवत्यपि नानारूपा उक्तरूपप्रकारेण
परस्परं विभिन्नरूपा तस्मात्संवत्सरो विरूपो विभिन्नरूपः उक्तप्रकारेण विलक्षणान्यहानि षड् तुल्यानीयानि
अतो वसन्तादीनां परस्परं विभिन्नधर्मत्वात्तु ऋतूनां संवत्सरस्य विरूपत्वं यत्तद्वेदनं प्रशंसति ॥८॥ विरूपमेनम
नु प्रजायते यएवं वेद ॥ य एनं वेदितारमनु पश्चात्तु विरूपं विविधरूपमपत्यादि प्रजायते उत्पद्यते य एवमु
क्तां विलक्षणां षउहविभक्तिं वेद जानीयात् ॥ इति माधवे दशमप्रपाठके तांडमहाब्राह्मणे दशमाध्यायस्य ष
ष्ठः खण्डः ॥६॥ अथास्मिन्नेव षउहे अग्निविभक्तिर्वीचयं स्तोति ॥७॥ अग्न इति प्रथमस्याह्नो रूपमग्नि प्रदर्श ४
विभक्तेरग्निमिति द्वितीयस्याग्निनेति तृतीयस्याग्नेरिति चतुर्थस्येति । अग्निविभक्तेः अग्निशब्दस्य या
या विभक्तयस्ता आम्नाये अग्न इति संबुद्धान्तं प्रथमस्याह्नो रूपं अग्न आ याहि वीतय इति हि तस्मिन्नहनि
दृश्यते ॥ अग्निमिति द्वितीया विभक्तिर्द्वितीयस्याह्नो रूपं अग्निं दूतं वृणीमह इति हि तत्र मंत्रवर्णः अग्निनेति

तृतीयात्तृतीयस्याह्नो रूपं ... एवं रूपं अत एव तत्रापि अग्निनाग्निः समिध्यत इति दृश्यते ॥ अग्निरिति प्रथमे वच चतुर्थस्या
405 ह्नो रूपं अत एव तत्रापि अग्निनाग्निः जनस्य गोपा अजनिष्ट जागृविः अग्निः सुदक्ष इति तत्र दृष्टत्वात् अथ पंचमस्याह्नो साधा
रणामिति विभक्तिं विवक्षुराह ॥ ८ ॥ देवा वै श्रियमैच्छंस्तां न प्रथमेहन्नविंदन्न द्वितीये न तृतीये तां चतुर्थेहन्नविंदन् विंदते
पं श्रियं य एवं वेदाग्नेरिति पंचमस्य तेनो श्रीः प्रत्यपोदिते त्याकृतिः । देवाः एव तु पुरा श्रियं संपदं रेछन्त इच्छमेते तं नादृशा
हमन्वलिष्ठन्त तत्र च तां श्रियं प्रथमेहनि नाविदन् नालभंत तथा द्वितीये वाहनि नाविन्दन् तृतीये चाहनि नाविन्दन् एवं प्रथ द
मे त्रिरात्रे अलब्ध्वा तां चतुर्थेहन्यविंदन् एवमुक्तां श्रियो लाभं यो वेद असौ श्रियं संपदं विंदते लभते ॥ एवं चतुर्थेनाह्ना श्रियः
प्राप्तौ सत्यां अग्नेरिति विभक्तिः पंचमस्याह्नो भवति । यत्नूतेनो तेनैव सा प्राप्ता श्रीः प्रत्यपोदिता प्रत्याख्याता त्याकृ बु
लवादिनः तत्र श्रियो वर्षस्येव विद्युतो निष्कृति नहीति पंचमेहनि दृश्यते । तत्र चाग्नेः श्रिय इति संबंधः प्रतीयते
तस्मात्संबंधः प्रत्याख्यात इति तेषां ब्रह्मवादिनामभिप्रायः । एतद्दैन्यस्य फलमाह ॥ ९ ॥ अप्रतिवाद्येनं भ्रातृव्यो
भवति य एवं वेदेति । एवमुक्तप्रतिवचनं यो वेद भ्रातृव्यः शत्रुः एनमप्रतिवादी भवति । अनेनोक्तप्रतिवक्तुं न शक्नो ४०५

तिंगमारं त्मा वस्नानयोः स्नानत्याद्यर्थं तमेव संबुद्ध्यं तमेव षष्ठस्याप्यङ्गो रूपमित्याह ॥ ७ ॥ अग्न इति षष्ठस्य येनैव
रूपेण प्रयंति तद्युद्धंतीति । अग्न अग्ने सख्ये मा रिषामा वयं तवेति षष्ठे हनिदर्शनात् । अग्न इत्येतदेव षष्ठस्याङ्गो
रूपं तथा च येनैव रूपेण प्रयंति षड् हं भारत्येते । तदेव रूपमभिलक्ष्य तेनैव रूपेण युद्धंति षड् हं समापयं
ति । उक्त विभक्ति नानात्वं प्रदर्शयति । ८ । यस्मादेषा समानासु सप्त विभक्तिर्नानारूपा तस्माद्यथर्त्वादित्यस्मा
पतीति । एषोक्ता सप्तविभक्तिः समानाग्न्याद्यभिविभक्तित्वेन सरूपा समीपस्मान्नानारूपा संबुद्ध्यादिविभ
क्तिभेदेन परस्परं विलक्षणाकारा तस्माद्धेतोर्यथर्तुसत्ता वृत्तौ वसंतादिके प्रादित्यो नानारूपः सन्नुप
प ति सर्वं जगज्जासैति ॥ इति सामवेदार्थप्रकाशे तांड्यमहाब्राह्मणे दशमाध्यायस्य सप्तमः खंडः ॥ ७ ॥
अथास्मिन्नपषडहे विभक्तीनां संप्रदर्शयन्नोति । ई इन्द्रेति प्रथमस्याङ्गो रूपमिन्द्र विभक्तेरिन्द्रमिति
द्वितीयस्यैंद्रेणेति तृतीयस्यैं इ इति चतुर्थस्यैं द्रादिति पञ्चमस्यैं द्रेति षष्ठस्य येनैव रूपेण प्रयंति तद
युद्धंति यस्मादेषा समानानीन्द्र विभक्तिर्नानारूपा तस्माद्यथ प्रैषि चयः पञ्च न्त इति । इन्द्र विभक्तेः ई इ शब्द

स्य इंद्रविभक्तीनामन्ये इंद्रेति संबुध्यंतं प्रथमस्याह्नो रूपं तथा च तत्रस्यो मंत्रवर्णः । आयाहि सुषुमाहित इंद्र सोममिति ।
। इंद्रमिति द्वितीयाविभक्तिर्द्वितीयस्याह्नो रूपं इंद्रमिद्गाथिनो बृहदिति हि तत्र त्रदृश्यते । इंद्रेणेति तृतीयस्य इंद्रेणासं
४०५ हि दक्ष स इति दर्शनात् । इंद्राय इति प्रथमांतं चतुर्थस्य इंद्रीद्धीवो अस्य मिरिति हि तत्रमंत्रो दृश्यते ॥ इंद्रादिति पंचमस्य
इंद्रात्यदि तन्वं ममइति त्रयाणां तत्रस्या मंत्रवर्णात् । इंद्रेति संबुद्ध्यंतमेव षष्ठस्य यद्दिजा विंद्र स्थिर इति हि त
406 त्र दृश्यते । शिष्टं सिद्धमाय ॥ ॥ इति सामवेदार्षेयज्ञकाशीताख्यमहाब्राह्मणे दशमाध्यायस्याष्टमः खंडः ॥ ८ ॥ १० ॥ इत्थं
स्तोत्रियागतानि रूपाणि दर्शयित्वा साम्नामपि दृश्यः षड्विधास्य मानानां रूपाणि इत उत्तरैर्निभिः खंडैः प्रदर्श्यं
ते । तत्र प्रथमस्वराश्रयाणि रूपाणि षडहस्य दर्शयति ॥ १ ॥ यदृचा प्राप्नोति तत्प्रथमस्याह्नो रूपं स्वरविभक्त्येयं स्तु
रस्तात्स्तोभं तद्द्वितीयस्य यदुभयतः स्तोभं तत्तृतीयस्य यदंतस्तुतं तच्चतुर्थस्य यदक्षारसं तत्पंचमस्य यदिहकारे
णाभ्यस्तं तत्षष्ठस्याह्नो रूपमिति ॥ स्वरविभक्त्ये स्वराणां विभक्तयो विभज्यमाना एकदेशाः स्वरविभक्तयो जाता
वेकवचनं स्वरविभक्तीनां मध्ये स्वरो वा स्तोभादिवर्जितया केवलयैवर्चा प्रस्तोतासाम प्रस्तौतीति यत्तत्प्रथ ४०५

अथमस्याह्नोरूपं तथाहि प्रथमेहनि माध्यंदिने सवने विधास्यमानानि आश्वं स्तोमसाम यौधाजयौशनानि दैवैः प्रस्तूयन्ते॥
पुरस्तात् त्रिककुभ् आरंभात् पूर्वमेव स्तोभयुक्तं साम तत्तद्द्वितीयस्याह्नोरूपं तथैव तस्मिन्नहनि यो कामा मो यास्य वासिष्ठं बृह
हदित्येव माध्यंदि निसामानि पुरस्तात् स्तोभान्ते व विधास्यन्ते। ककुभ यत्र स्तोभं पादस्यान्ते यो स्तोभयुक्तं साम तत्तृतीयस्याह्नोरू
पं। हावभि सोमास आयवो हाऊ इत्यादि ककुभय तत्स्तोभगौ तमस्य तत्र विभाजातायत् अनुतुन्ते अनुपादः स्तोभैस्तु यथा
तं साम तच्चतुर्थस्याह्नोरूपं। विराडनुतोद वदित्यचैव र तत्साम प्रदर्शितं यत्सामाभ्यारब्धं अभिउपर्यधः एकत्यासं चतुष्पदाः
→अर्धत्र्यं भवति तत्पञ्चमस्याह्नोरूपं। सर्वाण्यपि सामानि एकैकस्यामृचि समाप्यं तेषां प्रस्तावम तुनि स्वचत्वृत्तु समाप्य
त इत्यभिगायेरा अनुसम्पार ब्रभित्यत्र। एवं तिस्रः तिस्र एकैकास्तोत्रीयेति पञ्चमेह्नि एष स्तोत्रे नवभिर्ऋग्भिः स्तो
त्रीयस्तद्वोनिष्पद्यते। भद्रद्रीचं भ्रो एं इत्यादिकं तत्षष्ठस्याह्नोरूपमुक्तं। स्वरविभक्तिना नानात्वं च शांसति॥ उ॥ स्व
राणा यस्मादेषा समाना सती स्वरविभक्तिनानारूपा तस्माच्चतुर्थं वायुः पवतइति। स्वराणाम ध्येये भास्वरवि
भक्तिरुक्ता सा समाना सती सैमावयवत्वेन सदृशी भवंतीयस्मान्नानारूपा उक्तमकारेण प्रत्यहं विभक्ति वि
भिन्नरूपा तस्माच्चतुर्थे तार तोवीप्सा तरुरोथे यथाश्वदस्याख्य यीभावः प्रत्तु वायुर्नानाकारः पवतेगछति
तथा चाश्वलायनेन नवरूपमस्तिर्स्तोमा भवंतीति॥ पञ्चमेह्कारेण प्रस्तुपुनः पुनरिहकरणे न इडद्वाभ्रोद्धारणेन युक्तं ४

इति सामवेदार्थप्रकाशे ताण्ड्यमहाब्राह्मणे दशमाध्यायस्य नवमः खण्डः ॥९॥ अथ तस्मिन् षडहे निधनविभक्तिं नानात्वं प्रदर्शयतीति ॥ ०॥
४०७ पदनिधनं प्रथमस्याह्नो रूपं निधनविभक्ते बहिर्निधनं द्वितीयस्य दिङ्निधनं तृतीयस्येनिधनं चतुर्थस्याथकारणिधनं पंचमस्य
यदिह का रेणाभ्यस्तं तत्षष्ठस्याह्नो रूपं निधनानां यस्मादेवासमानासती निधनविभक्तिर्नानारूपा तस्मादिमे लोकाः सहसं
तो नानेवेति ॥ ॥निधनानि तावद्द्विधानानि । अन्तर्निधनानि बहिर्निधनानि च । हकारहुंकारैर्गीतं च निधनस्वरपूर्वं हीषीस्वरे
चक्षुरूपं देवताश्चारय्ये गेयुष्ठुलान्यं तः सामनिधनानीत्यादिना सूत्रकारेण अन्तर्निधनान्युक्तानि सर्वं च तदेव चत्वारस्य वसा
मां तां स्वरोनिधनमिडा वागित्यादिना बहिर्निधनान्यपि सूत्रे प्रोक्तानि तदुभयमत्रानुसंधातव्यं । अयमर्थः ॥ निधनविभ
क्तीनां मध्ये पदनिधनं पादे पादे क्रियमाणे निधने न युक्तं प्रथमस्याह्नो रूपं यथायो वाजवः । बहिर्निधनं सगच्छमाद्रुहि [illegible] तं निध
नं यस्य तत् द्वितीयस्याह्नो रूपं । यथायो क्राम्यादिकं । दिशाइति निधनं यस्य तत् दिङ्निधनं तृतीयस्याह्नो रूपं यथा ऋतुस्थेके वै षुमम
हावे ष्टंभे । इति निधनं यस्य तदीनिधनं चतुर्थस्याह्नो रूपं यथा महावाससप्रमहावेराजे । अथकारः यथेतिधादोनिधनं यस्य तद
थकारणिधनं पंचमस्याह्नो रूपं । हकारहुंकाथकारैर्गीतं च निधनस्वमित्यादिना सूत्रकृता अथकारस्यान्तर्निधनमुक्तं ४०७
तच्च शाकरे साम्नि दृश्यते । ई३ डा ध्रुम्नाय नार्द३ पा ई३ डा अथा ह्वजा ई एवं तत्साम भद्रं दीर्घश्रोत्रादिकं हकारणिधनेनाभ्य

त्यादि

407

संतत्सष्ठस्याह्नोरूपंनिधनानांसर्वेषांनिधनीएषानिधनविभक्तिः समानासतीयस्माइत्थंप्रकारेणनानारूपात
स्मात् इमेभूरादयस्त्रयोलोकाः सहसंतः एकरूपाः संतोपिनानेवनानारूपाएवभवंति॥ ॥इतिसामवेदार्थप्र
काशेताण्ड्यमहाब्राह्मणेदशमाध्यायस्यैकादशःखंडः॥११॥ ॥अथेडाविभक्तिनानात्वंप्रदर्शयंस्तौति॥ द्रु॥ द्रवदिडंप्र
थमस्याह्नोरूपमिडाविभक्तेरूर्ध्वेडंद्वितीयस्यपरिष्टुब्धेडंतृतीयस्येडाभिरेडंचतुर्थस्याध्यर्धेडंचतुर्थ
स्याध्यर्धेडंपंचमस्यपृथ्विहकारेणाभ्यस्तंतत्षष्ठस्याह्नोरूपमिडानाध्यस्मादेषासमानासतीडाविभक्तिर्ना
नारूपास्तस्मात्समानासंतःपशवोनानारूपाइति। इडाविभक्तेः इडाविभक्तिनी इडाप्रभेदानामग्धोद्रवदि
ति। इहिहिप्रनामद्रवीतीडायस्यतद्द्रवदिडंकालेयगौतमादिकंतत्प्रथमस्याह्नोरूपंइडाभिरेडौभिशवेनयु इडा ४
क्ताइडायस्यपृश्निसामादेः तत्तथाक्तं। इडा २२ नै २४ ३ २२४ ५ इडा। इतिहितत्रदृश्यते। अध्यर्धमर्धंयस्याः स्या
साअध्यर्धाअध्यर्धाइडा इ द इडे सैवैरूपंयस्यवार्शावामादेः तद्ध्यर्धेडं पंचमस्याह्नोरूपं। यद्यपिवार्शवामा
देरध्यर्धेरूपाङ २२३४ पाएवाध्ययने दृश्यतेतथापिसूत्रकारेणउपास्थानेधन्यानिनिधनानीरूप
ऊर्ध्वेडंऊर्ध्वस्वरमारभ्यप्रवृत्तेडायास्मिंस्तदूर्ध्वेडंआयास्यादिकंतद्द्वितीयस्याह्नोरूपं। परिष्टुब्धेडंपरितस्तोभयुक्ताय स्मिं
स्तत्परिष्टुब्धेडंरौरवादिकंतृतीयस्याह्नोरूपं। ४

चा दि

ऋग्भ्य इडा[illegible]नादेशा इत्यौवाग्रध्यर्षीलाध्यर्षो पानामित्येतेन ऋड्यर्षोपास्थाने इड् ईडे स्येवं रूपाग्रध्ये

डाप्रयोगकाले प्रयोज्ये उ स्तुत्त्वात् वार्शवाम्रयोरध्यर्धेडत्वी। य[illegible] सामइरुकारेणाभ्यस्तेत्या वर्त्तमा

४०८ नेइकारयुक्तोवारवतीयादिकेतत्तु षष्ठस्याक्लो रूपे इडानी संबंध्येनेयषाडुदाहृतेडाविभक्तिः समाना दशी स

408 सस्वपि यस्मान्नानारूपाद्भवहूर्ध्वता दिनेदेन विभिन्नाकारातस्मात्तपशवः समानाः समाना कृतयः संतो पि

नानारूपाः॥ ॥सामवेदार्थप्रकाशे तांड्यमहाब्राह्मणे दशमाध्यायस्यैकादशमः खण्डः॥ ॥अथास्य

षडहस्य प्रस्तुतं विशिष्टफलहेतुतां ब्रह्मवादिनां प्रश्नप्रत्युक्तिभ्यां दर्शयति। भा॥ भारद्वाजायना वै सत्रमासत

तेतान पृच्छन् किं प्रथमेनाह्ना कुरुतेति प्रैवेमेति किं द्वितीयेनेत्यवरममेवाकुर्महीति किं तृतीयेनेति पर्यै

वाग्नवामहीति किं चतुर्थेनेति सतेव सतप्यस्मेति किं पंचमेनेति प्राणान् एवस्वधिष्ठि द्दीतऐमेति किं ष

ष्ठेनेतीदमेवागन्मेत्याति। भारद्वाजायनाः भारद्वाजगोत्राः खलु पुरा ऋषयः सत्रं सत्रात्मकमेतं द्वा ४०८

दशाहमासत अन्वतिष्ठन् सत्रमासीनान्यजमानान् अन्येतु ब्रह्मवादिनोपृच्छन् हे षेऋयो यूयं प्रथमे

४०९

नपार्श्वके नाकातुं किं कुरुते किंफलं प्राप्नुयेति तान्प्रस्येव मब्रुवन् । प्रएवमेवेति पदच्छेदः एतेन त्वं त्रिरूपमेत
तस्मै वै मैवयन्तस्यप्रायणमेव केवलमकार्ष्मेति । अथ द्वितीये नाके किं कुरुथेति पुनस्तेन ब्रह्मवादिनो पृष्ट
स्र अयसंग्रन्नमेवाकुर्म ह्यनिष्पादितवन्तो वयमिति प्रत्यवोचन् । अथ तृतीये नाके किं कुरुथेति ब्रह्मवा
दिभिः पृष्टे तस्येदमुत्तरं परितः सर्वतः एव वाऽऽव्रा महेशांश्च वर्तस्म इति । पुनश्चतुर्थे नाके किं कुरुथेति ब्र
ह्मवादिनां प्रश्नः तस्येदमुत्तरं सतैव विद्यमानेन निष्पन्नेन एतेन सुपांसुपांसुगिति तृतीयायाः आकारः अन्वादेश
विशयादेनादेशौ एतेन चतुर्थे नाके सत्त्व विद्यमानेन सर्वं फलमुत्पाद्य अपिहितवन्तः आदितवन्तः प्राप्तव
क्रि न्तो वयमिति । पंचमे नाके कुरुथेति ब्रह्मवादिभिः पृष्टे तस्येनौ विद्विषौ प्राणानेन विच्छिंदन्तः वि योजयन्ती
तः । एतानु प्राणानेव प्राप्ताः स्म इति प्रत्यब्रुवन् । अथ षष्ठे नाके किं कुरुथेति ब्रह्मवादिभिः पुनः पृष्टे त
स्येदमुत्तरं इदमेव स्थानं इह लोकावस्थानमेव प्राप्तवंतस्म इति । अथ यदिच्छा प्रस्तोत्सान्दिनायेषा
स्वरविभक्तिः पूर्वं प्रदर्शिता तत्रैकैकमन्वयस्तोति । ७ ।। यस्य पदेन प्रस्तोत्स्य पस्वार मन्त्रि वा वतेन देवाः

पशून्‌ पश्यन्त्वसुरस्तात्स्तोमं अथस्वारमुदेवतेनासृजंत यदुभयत तःस्तोमं अथस्वारमेभ्यस्वतेन लोकेभ्यो देवाः पशुभ्यो न्ना
द्यं प्रयछन्त्यदनुतुन्नमथस्वारमुमेवतेनाग्निन्नस्य मध्ये निधतं मथस्वारं गर्भाः स्तेनादधतता निहव तास्वारेण प्राजन
409 यन्निति स्य प्रथमेहनि विहितस्य साम्नः पदेन स्तुचः पादेनैव स्तोमं रहितेन प्रस्तोति। प्रस्तोता प्रस्ताव भागं ब्रूमा॥
अथानंतरं स्वारं स्वर्यमाणां स्वरिति विविधएउञीथभागं चोक्ता ताब्रवीति। तेन साम्ना स्तूयमाना देवाः पशूनेवा
सा न्यपश्यन्‌ यजमानायदातुमञ्जानन्‌ यत्पुरः स्तोमं स्तेचः पुरस्तात्‌ क्रियमाणे क्रियमाणेन स्तोमेन युक्तं
अथानंतरं स्वारं स्वर्यमाणो द्वितीयेहनि विनियोज्यं साम तेन स्तुतां देवाः उदसृजंतैव पूर्वदृष्टान्यपशून्यजमा
नोन्नाद्युं व्यमुं चन प्रायछन्निसर्थः। यदुभयत स्तोमं आयं तयोः स्तोमयुक्तं। अथानंतरं स्वर्यमाणां स्वारं तृ
तीयेहनि विनियोज्यं साम तेन साम्ना स्तुताः देवाः एभ्यस्वं भूरादिभ्यो लोकेभ्यः एव दृष्टेभ्यः पशुभ्यः सकाशा
ए दन्नाद्यं क्षीरादिकं अदनीयमन्नं प्रायछन्‌ प्रकर्षेण दत्तवंतः। यदनुतुन्नं प्रथमं अनुतोदवत्‌ अथानंतरं स्वारं स्व
रितयुक्तं चतुर्थेहनि विनियोज्यं साम तेन स्तुताउपेवाग्निर्न्नन्नशं प्रियितुमेछन्‌ यजमानान्नशानाकतुमेष ४०९

नित्यर्थः ॥ ऐक्रोतें सनिमीमाचुर भलभक्रमेत्यादिमां सुनुप्रत्यये परतः र्वस्त्वावे अत्र लोपोभ्यासस्येत्यभ्यासलोपः ॥
यद्वा शिशिलिर्दनिकर्मा यजमानैर्यद्यस्मार्थितं लत्वा दुरित्यर्थः ॥ यस्य साम्नो मध्ये निधनं इडा अथेत्यादिकं अथा
पु नंतरं स्वारं स्वरितं लं तेन साम्ना स्तूयमाना देवाः गर्भान्निदधत प्रजासु गर्भाशां निक्षेपणाम कार्षुः इव ताह् दृ
इती हाँ हकारवता स्वारेण स्वर्यमाणेन साम्ना तान् पूर्वमाहितान् अग्निजनेनेरा प्र कर्षेणोपपादयन् पर निधने य
प्रथमस्येत्यादिना येषां निधनविभक्तिरुक्ता स्ता वयुस्यस्तोति ॥ ७ ॥ इमं वाव देवलोकं पद इति निधनेनाभ्यजयन् न
पुंबाहि निधनेनांतरिक्षं दिक्ष्विधनेनामत त्वमीविभनेनागच्छन्नुसवचसमथ निधनेनावाकं पूतास्मिन्नेव लोके
इट निधनेन प्रत्य प्रत्यातिष्ठन्निति ॥ ॥ देवाः स्वर्ज्जुपुरा इममेव भूर्लोकं पद निधनेन पादपादे क्रियमाणेन नि
निधनेन तहूता साम्नाभ्यजयन् ॥ अमुं स्वर्गं लोकं बाहि निधनेन स्वर्ग च्छनात् इहिभूत निधनयुक्तेन साम्नाभ्य
जयन् ॥ अथ दिक्ष्विधनेन नागच्छन्नाप्नुवन् ॥ दिशा इति निधनवता साम्ना अंतरिक्षमभ्यजयन् अथा अम
न्तर्वं कदाचिदपि मरणादित्य ई निधनेन ईकारलिधनेन साम्ना आगच्छन् प्राप्नुवन् ॥ अप निधनेन अय

ऊर्ध्वेडेनामुंद्युलोकमभ्यजयन् ५

कारनिधनेनसाम्नाब्रह्मवर्चसीन्ग्रास्तेतेजः अवरुंधत प्राप्नुवन्। तथा इहनिधनेन इहकारनिधनेनसाम्ना अ
४१० स्मिन्नेवमर्त्यलोके प्रत्येवंतिष्ठन् चिरकालावस्थायिनो ऽभवन्। अथ इवदिडं प्रथमस्याः ऋग्रूपमित्यादिनायेषा
इडाविनक्तिर्लौनारूपोक्ता तामेवम्युत्थानुवादेनस्तौति॥छ॥ इममेवावदेवलोकंइडवदिडेनाभ्यजयन्न
मुम्नर्हेडेनांतरिक्षंपरिष्टुब्धेडेनप्रतिष्ठामिडाभिरैडेनावारुंधतप्रतिष्ठायाधायइडेनव्यजयंतास्मिन्ने
वलोकइहेडेनप्रत्यतिष्ठन्निति॥ ॥इममेवमर्त्यलोकंदेवापुराइडवदिडेनहोइडाइतियुक्तेनसाम्नाभ्यज
यन्। परिष्टुब्धेडेनपरितःस्तोभयुक्तेडाशब्दोपेतेनसाम्नाऽन्तरिक्षलोकमभ्यजयन् इडाभिरैडेनसाम्ना
प्रतिष्ठाप्रतिष्ठानं अवरुंधत प्राप्नुवन्प्रतिष्ठायच॥ अर्ध्वेडेन अर्ध्वाधिक्ययेडयायुक्तेनसाम्नाअभ्यजयं डे
तअजितोजयंतजिताजयं प्राप्नुवन् अस्मिन्नेवमर्त्यलोकेइहेडेन इहकारयुक्तयेडयोपेतेनसाम्ना प्रत्यतिष्ठन्
प्रतिष्ठिता अभवन्। अपेताभिडाविनक्तिं प्रकीर्णांतरेणस्तोभ्यन्तवाड्धनात् इडानिधनस्यातिशयं दर्श
यति॥ नवाकसंवत्सरमतिवदतीडेवसंवत्सरमतिवदतिगर्भेणसंवत्सरपर्यायेणप्रजापतेर्नातिवद ४१०
ते

तीति॥ ॥वाकुर्वाद्भिः यनं संवत्सरं द्वादशमासात्मकं कालविशेषं नातिवदन्ति॥ अतिक्रम्य न वदन्ति। किंतु ततः पू
र्वमेव वदन्ति। जनेनात् पूर्वं पंचसु मासेषु हि वाला नोऽल्पितं भवति। इडैव इडानि यन्नमेवत्तु संवत्सरमतिवदन्ति॥
एतदेव विवृयते। गर्भे एतेति इडेति गोनामसु पाठात् पशवो वा इडेति। अतेश्च इडाशब्देन पशुरेवोच्यते। स
स च गर्भैण गर्भरूपेणावस्थितः सन् संवत्सरमासदशके सीदतः पर्यावर्त्य योनिदेशं प्रति स्वकीयं शि
रः प्रतिनिहत्य स्वयं प्रजायते उत्पद्यते। तेन प्रकारेण इडानि यन्नं संवत्सरमतिवदन्तीति॥ अस्त्वेवं ततः किमत आ
ह॥ ता वा एता अवतस्त्रः षड् हैः पराच्यः इडा अतियीत्येषानु ताः तैषा विषूच्येषां प्रतीच्येत द्वीडमिति॥ ॥एता
स्ताः पूर्वोक्ताः पराच्यं पराक् उपरिभागे वर्तमानाश्च तस्त्रः इडाः परिक्षुब्धे डाघाः षड् हन्त्रिवदादिषड्
ष्टक अतियन्ति। अतीत्य गच्छंति प्राक्तवीतीसर्पेः। इवद्भिडोर्ध्वे तु रथन्तरस्य बृहतश्चोभयोः प्र
तावेव सीवं धातृ तद्विषये एवेतिन्वाभ्यां षड्हव्याप्तिः। एषानु एषाखल्विडा [illegible] ता प्रोता षाउ [illegible] हि केषु सा
मसु संबन्धात् तेषां विषूची विष्वक् सर्वत्राञ्चन्ती साम्नामयस्मा उपरिष्टाच्च वर्तमानाः एषैव प्रतीची

अग्निस्तावत्संवत्सरस्तान्निष्पाद्य लोकान् ... संवत्सरः संवत्सरान्निष्क्रान्तः संवत्सरे पूर्णे एव त्रिशरीरो व्यक्तवर्णो वाचं प्राप्नुवंति। तस्मादेक
हायना मनुष्या वाचं वदंतीति श्रुतं तरात्। अतो वाचः संवत्सरात्मकत्वं। एवं परंपरया अग्निदेवता वाणी सुखं भवति ४

भ

भवंत्यन्नी प्रत्येकं सामान्निप्राप्नुवंती भवति। एतदिदं परिदृश्यमानं जगत्सर्वं एडमुपेडमेव इडाप्रैवमेव। इडा
४११ याः पशुरूपत्वात् पशुरूपत्वात् पशुभिश्च सर्वं जगत्पुष्टं भवतीति इडा जगतोऽसर्वेषां। यद्येवं इडानिध
नमेव स्यात्। न तर्हि वाग्निधननिबंधनाशाजं वेदि स्यादाशंक्य संपन्न्यातदपि लक्ष्मतश्चाह॥ ६॥ सवत्स
५॥ रोऽग्निर्वा अकसंवत्सरोऽयदग्निर्विभज्यते नाचमेवतद्विभजतीति। उक्तं वैनतद्गर्भे वांचोऽधिष्ठातृत्वात् श्रूयते हि
अग्निर्वाग्भूत्वा मुखं प्राविशदिति। एवं सतियदग्निर्हविर्भज्यते अन्न इति प्रथमस्याक्षरो रूपमित्यादिनोक्तेन प्रत्य
हं अग्निशब्दो विभक्तिभेदेनाभिधेते। तत्तेन वाचमेवतद्विभजति वाग्विभक्तिरेव सा एषा विभक्तिः अतो वाग्निध
नोऽस्मितमस्पिफलं संपद्यत इत्यर्थः। तत्रविभज्यमानाग्निशब्दगता संख्या मम्रूय प्रशंसति। द्वे द्वे अक्षरे विभज
ति द्वौ द्वौ हि मासावृतुः रथो मासानामेवतदृतुं पंक्रियत इति॥ ॥अग्निर्विभक्तो विन्दुर्विभक्तो च द्वे द्वे अक्षरे अग्नि
रिति अक्षरः इ ड इति अक्षरे च विभजंति। कुतः हि यस्मात् द्वौ द्वौ मासौ चैत्रादिकौ संभूय ऋतुः वसंतादि ४११
कऋतुर्भवति॥ अपोऽप्यपि च तदक्षरद्वयविभजंत मासानां द्वन्द्वशो वर्तमानानामेव रूपं क्रियते॥ अपोक्तं

नं नो

षडुहविभक्तिमन्त्रं प्रस्तौति। ७।।षड्ढानि विभजतीति षड्वृतव ऋतूनां प्रत्याकारेणं प्रतिष्ठित्या। अथो ऋतूनामेवत
द्रूपं क्रियते षड्पुरुषायानग्निरनुविक्रियत इति।। ।।दशरात्रस्याद्यतः संख्यान्यहानि विभजंत इति। एतिषु स्यात्मा
मद्दिस्याद्दिना पूर्वोक्तेन साधारणरूपेण विभजंति विभक्तानि कुर्वंति। ऋतवश्च षट्संख्याका भवंति। यथा चर्तु षड्[illegible] त
विभजनं ऋतूनां प्रत्यक्षैर्यं भवति तथा तेषामृतूनी प्रतिष्ठित्यै एव प्रतिष्ठानाय च भवति। अथो पि च तद्विभजनं कृ
तूनामेवरूपं क्रियते ऋतवो पि परस्परं विभक्ताकारा विभज्यमानान्यहानि च परस्परं विलक्षणानि भवंति इति। त
द्वैलक्षण्यमेव ऋतुवैलक्षण्यकारणमित्यर्थः।। यस्मादेतानि विभज्यमानान्यहानि षट्संख्यानि अत एव कारणात्।
सदसि निविष्टा होतमैत्रावरुणाच्छावाक नीरः पुरुषाः षट्संख्याका भवंति। यान्होत्रादीननुलक्ष्य समीपेऽग्
ग्निर्विक्रियते। होत्रीयादिषु धिष्ण्येषु आग्नीध्रीयादाहृत्याग्निः प्रक्षिप्यते। ननु सर्वासां देवतानामग्निरेवाग्नेरिंद्र
स्य चोभयोरेव विभक्तिरुक्ता कुतो नान्यस्य सोममिति सतन्त्र्याह।। ८।। यदि देव बहुधाग्निर्विक्रियते यस्मादादित्यः सर्वा
इमाः प्रजा प्रत्यङ् तस्मादेत एव वेदेते विभक्तिमान। शतेनातोन्याकाचनेति।। ।।यद्यस्मात् इदमयमग्निः बहुधा
बहुप्रकारं विक्रियते यस्माच्चासौ द्युलोकस्थः। आदित्यः सर्वा इमाः भूलोकवर्तिनीः प्रजाः प्रत्यङ् प्रत्यंचं चनप्रत्ये

कं सर्वस्यां दिशुद्भवति। अस्यांतरं च भवति। तस्मात्सर्व एव मन्यते। मांप्रति उदगादितीति॥ इंद्र एव आदित्यः तस्माद्भुव
न्तस्य। तस्माद्धेतोः एते एव अग्निरिंद्रश्चेति देवते विभक्तिं षष्ठे ह्यहनि भागिन्यान्न शातेश्च भवत्यो ग्रन्तो न्या एतद्व्य
तिरिक्ता काचन कांचिदपि देवतां न भाग्भवतीति॥ ॥इति सामवेदार्थप्रकाशे तांड्यमहाब्राह्मणे दशमाध्यायस्य द्वाद
शः खंडः॥ ॥वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्। पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥ ॥इति श्री
महाराजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण वि
रचिते माधवीये सामवेदार्थप्रकाशे तांड्यमहाब्राह्मणे दशमाध्यायः समाप्तः॥ ॥ शुभं भवतु॥ मित्रभट्टे
न लिखितं॥ श्रीविश्वेश्वराय नमः॥ ॥त्रिविक्रमेण न्नोधितमिदं दशकं॥ ॥श्रीरस्तु॥